THE THIRD MAYUKHA

SAMAYA MAYUKHA

BY

NILKANTH BHATTA

EDITED BY

MAHADEVA GANGADHAR BAKRE

AND

VYANKATESHA RAMACHANDRA LELE

Printed and Published by Manilal Itcharam Desai at

THE GUJARATI PRINTING PRESS

No. 8, SASSOON BUILDINGS, CIRCLE, FORT,

BOMBAY

V. S. 1975 A. D. 1918

भगवंतभास्करे

मीमांसकश्रीनीलकण्ठभट्टविरचितः

समयमयूखः

(तृतीयः)

आक्रेइत्युपाह्वमहादेवशर्मणा लेलेइत्युपाह्वव्यंकटेशशास्त्रिणाच संशोधितः ।

मुम्बय्यां

फोर्ट सर्केलाख्ये प्रविभागे ऽष्टमसंख्याके सासूनभवने
' मणिलाल इच्छाराम देसाई ' इत्यनेन स्वीये ' गुजराती '
मुद्रणयन्त्रालये मुद्रयित्वा तत्रैव प्रकाशितः ।

विक्रमसंवत् १९७५. क्रिस्ताब्दः १९१८.

रु 10

समयमयूखस्थविषयाणामनुक्रमणिका।

इति समयमयूखस्थविषयाणामनुक्रमणिका.

समयमयूखः ।

तृतीयः ३.

॥ श्रीगणेशाय नमः ॥

यो लीलया संतनुतेऽत्र विश्वं तत्पालयत्यात्मनि विश्वरूपे ।
लयं नयत्याशु च पूर्णरूपः शिवं तनोत्वाशु रविर्ममासौ ॥ १ ॥

[जज्ञे पितामहतनोः खलु कश्यपो य-
स्तस्मादजायत मुनिस्तु विभाण्डकाख्यः ।
तं पुत्रिणं सुरगुरूपम ऋष्यशृङ्गस्तस्या-
न्वयेऽप्यजनि शृङ्गिवराभिधानः ॥ २ ॥

तस्मिन्वंशे महति विततै सङ्गराख्ये नृपाणां
राजा कर्णः समजनि यथा सागरे शीतरश्मिः ।
कीर्त्या यस्य प्रथिततरया श्रोत्रजातेऽभिपूर्णे
कर्णस्यापि प्रविततकथा नावकाशं लभन्ते ॥ ३ ॥

विशोकाख्यदेवस्ततस्तत्सुतोऽभूद्विशोकीकृता येन सर्वा धरित्री ।
ततोप्यास राजा सुतोऽभूद्दयाख्यो दयैनैव सर्वाहितज्ञः प्रसिद्धः ॥४॥

बभूवाऽथ वैराटराजस्ततोऽभून्नृगो मेदिनीवल्लभो मीढुराजः ।
नरब्रह्मदेवस्ततो मन्युदेवस्ततोऽभून्नृपश्चन्द्रपालाभिधानः ॥ ५ ॥

शिवगणाख्यनृपः समजन्यथो शिवगणाख्यपुरं प्रचकार यः ।
शिवगणेन समः सकलैर्गुणैः शिव शिव प्रथमो गणनासु यः ॥ ६ ॥

रोलिचन्द्र इति तत्तनयोऽभूत्कर्मसेननृपतिस्तमथानु ।
लोकपो नरहरिर्नृपराजो रामचन्द्र इति तत्तनुजातः ॥ ७ ॥

यशोदेवस्ततो जातस्ताराचन्द्रनृपस्ततः ।
चत्रसेनस्ततो राजा राजसेननृपो यतः ॥ ८ ॥

ततोऽप्यभूद्भूपतिसाहिदेवः स्वकीर्तिभिर्निर्जितदुग्धसिन्धुः ।

---

१ एतेश्लोकाऽधिका दृश्यन्ते क पुस्तके—

अभूत्ततः श्रीभगवन्तदेवः सदैवभाग्योदयवान्क्षितीशः ॥ ९ ॥
यद्दानद्रविणाद्विनिर्जितवपू रत्नाकरो लज्जया
दूरे स्तब्ध इलावृते निविशते नो यत्र पुंसां गतिः ।
किंच त्रस्यदरातिवामनयनानेत्राम्बुभिर्वर्द्धित-
स्तेजोभिर्वडवामुखोत्थहुतभुक्तुल्यः कथं नो भवेत् ॥ १० ॥
आज्ञप्तस्तेन राज्ञा विबुधकुलमणिर्दाक्षिणात्यावतंसो
भट्टः श्रीनीलकण्ठः स्मृतिषु दृढमतिर्जैमिनीयेऽद्वितीयः ।
आज्ञामादाय मूर्ध्ना सविनयममुना तस्य सर्वान्निबन्धान्दृष्ट्वा
सम्यग्विचार्य त्रिजगति भगवद्भास्करस्तन्यतेऽयम् ॥ ११ ॥]
श्रुतीः स्मृतीर्वीक्ष्य पुराणजातं तत्तन्निबन्धानपि सन्निबन्धान् ।
श्रीशङ्करस्यात्मजनीलकण्ठस्तिथ्यादिकृत्यं विवृणोति सर्वम् ॥ १२ ॥
प्रतारकैरादृतमत्र किञ्चिन्मया तु निर्मूलतया तदुज्झितम् ।
ऊनोक्तिताऽतो नहि तेन काचित्खपुष्पहीनाऽपचितिर्न हीयते ॥ १३ ॥
समूलनिर्मूलमपि व्यवस्थां विनादृतं यद्विषयस्य कैरपि ।
नानौषधैस्तद्वणिगापणस्थैर्भिषग्वरानुक्तगुणैः समं स्मृतम् ॥ १४ ॥
संस्काराचारकालाः श्राद्धं नीतिर्विवाददाने च ।
अत्रोत्सर्गः प्रतिष्ठा प्रायश्चित्तं विशुद्धिशान्ती च ॥ १५ ॥

तिथिसामान्यनिर्णयः ।

तिथिर्द्वेधा पूर्णा खण्डा च । तत्राद्या स्कान्दे—

प्रतिपत्प्रभृतयः सर्वा उदयादोदयाद्रवेः ।
संपूर्णा इति विख्याता हरिवासरवर्जिताः ॥

हरिवासर एकादशी । तत्र वेधान्तरं वक्ष्यते । तद्भिन्ना खण्डा । तस्या वेधमाह पैठीनसिः—

---

१ जनोक्तिजातो इति पाठान्तरम् । २ मतमिति पाठान्तरम् । ३ संस्काराचारकालाः समुच्चितरचना श्राद्धनीतिर्विवादो दानोत्सर्गप्रतिष्ठा जगतिजयकराः सङ्गतार्थानुबद्धाः । प्रायश्चित्तं विशुद्धिस्तदनु निगदिता शान्तिरेवं क्रमेणख्याता ग्रन्थेऽत्र शुद्धे बुधजनसुखदा द्वादशैते मयूखाः । अयं श्लोको दृश्यते आर्यास्थाने । अयं चाधिकः भगवन्तभास्कराख्ये ग्रन्थेऽस्मिञ्छिष्टसंमते च ततः ॥ समयस्थविधिर्मयूखः प्रतन्यते नीलकण्ठेन ॥ इति ।

पक्षद्वयेऽपि तिथयस्तिथिं पूर्वां तथोत्तराम् ।
त्रिभिर्मुहूर्त्तैर्विध्यन्ति सामान्योऽयं विधिः स्मृतः ॥ इति ।

अत्र 'पूर्वया तिथ्योदयोत्तरमुत्तरया चोदयात्पूर्वं त्रिमुहूर्तया वेधो विधीयते' इति केचित् । निबन्धॄणां तु सर्वेषां दिनमध्य एव पूर्वोत्तरतिथ्योस्त्रिमुहूर्त्तयोः प्रवेशे वेधोऽभिमतः । वक्ष्यमाणशिवरहस्यविष्णुधर्मोत्तरादिवाक्यात् । सर्वथाऽहोरात्रद्वयगामिनी तिथिः संदिग्धत्वान्निर्णेया । सा च कर्माङ्गतया विहितैव न निषिद्धा । तथा च वृद्धगार्ग्यः—

विधिः पूज्यतिथौ तत्र निषेधः कालमात्रकः ॥ इति ।

यत्तु दक्षः—

त्रिमुहूर्ता न कर्त्तव्या या तिथिः क्षयगामिनी ।
द्विमुहूर्तापि कर्तव्या या तिथिर्वृद्धिगामिनी ॥ इति ।

अत्रापिशब्दस्य पूर्वार्द्धेऽप्यन्वयान्न त्रिमुहूर्त्तत्यागे द्विमुहूर्त्तग्रहणे च तात्पर्यम् । किन्तु द्विमुहूर्त्तस्यानुकल्पत्वे । अत एव शिवरहस्येऽपि—

यां प्राप्यास्तमुपैत्यर्कः सा चेत्स्यात्त्रिमुहूर्तगा ।
धर्मकृत्येषु सर्वेषु संपूर्णां तां विदुर्बुधाः ॥ इति ।

तेन विष्णुधर्मोत्तरे—

उदिते दैवतं भानौ पित्र्यं चास्तमिते रवौ ।
द्विमुहूर्त्तं त्रिरह्नश्च सा तिथिर्हव्यकव्ययोः ॥ इति ।

द्विमुहूर्त्तग्राह्यतोक्तिरनुकल्प एव । उदिते भानौ द्विमुहूर्त्तं दैवतम् अस्तमिते अस्तं गन्तुमारब्धेऽह्नस्त्रिमुहूर्त्तं पित्र्यमित्यर्थः । अह्न इत्यन्वयादस्तमित आदिकर्मणि क्तः । 'व्रतोपवासनियमे घटिकैकाऽपि या भवेत् । उदिते सा तिथिस्तत्र विपरीता तु पैतृके' इत्यादीनि । पाद्मानि वचनानि तु वैश्वानराधिकरणन्यायेन त्रिमुहूर्त्तवेधमेव स्तुवन्तीति माधवादयः । एकादशीपराणीति तु युक्तम् । अन्त्यपादस्त्वौचित्ये न स्तुत्यर्थः । कासुचित्तिथिषु निषेधप्रयोजको वेधः । स्कान्दे—

नागो द्वादशनाडीभिर्दिक् पञ्चदशभिस्तथा ।
भूतोऽष्टादशनाडीभिर्दूषयत्युत्तरां तिथिम् ॥ इति ।

नागः पञ्चमी । दिग्दशमी । भूतश्चतुर्दशी इति वेधः । तत्र विहिता तिथिर्विभक्तविभागेन षोढा । 'पूर्वेद्युरेव कर्मकालगा परेद्युरेव उभयोः

नोभयोः उभयोरंशेन । तत्रापि साम्येन वैषम्येण च[1] इति । तत्रान्यतर-दिने कर्मकालगा चेत्सैव ग्राह्या ।

यो यस्य विहितः कालस्तत्कालव्यापिनी तिथिः ॥
तया कर्माणि कुर्वीत ह्रासवृद्धी न कारणम् ॥

इति गार्ग्योक्तेः । अत एवाहोरात्रसाध्य उपवासादौ याऽहोरात्रगा सैव ग्राह्या । तदभावे त्वन्यतरगा ।

दिवारात्रिव्रतं यच्च एकमेकतिथौ गतम् ।
तस्यामुभययोगिन्यामाचरेत्तद्व्रतं व्रती ॥

इति स्मृतेश्च । वैषम्येण कर्मकालस्पर्शेऽधिका ग्राह्या । उभयोर्नोभयोः साम्येनैकदेशे उभयोरित्येतेषु पक्षेषु निर्णयो निगमे—

युग्माग्नियुगभूतानां षण्मुन्योर्वसुरन्ध्रयोः ।
रुद्रेण द्वादशी युक्ता चतुर्दश्या च पूर्णिमा ॥
प्रतिपद्यप्यमावास्या तिथ्योर्युग्मं महाफलम् ।
एतद्व्यस्तं महादोषं हन्ति पुण्यं पुराकृतम् ॥ इति ।

युग्मं द्वितीया, अग्निस्तृतीया, युगं चतुर्थी, भूतं पञ्चमी, षट् षष्ठी, मुनिः सप्तमी, वसुरष्टमी, रन्ध्रं नवमी, रुद्र एकादशी । तिथ्योर्युग्मं द्वितीया तृतीयायुता तृतीया च तद्युतेति । एवं चतुर्थीपञ्चम्यादीनां युग्मानि । अत्र दशम्यपि पूर्वविद्धा ग्राह्या । तथा च स्कान्दे—

दशमी चैव कर्तव्या सदुर्गा द्विजसत्तम ॥ इति ।

त्रयोदशी पूर्वविद्धा ग्राह्या । तथा च ब्रह्मवैवर्ते—

त्रयोदशी तु कर्तव्या द्वादशीसहिता मुने ॥ इति ।

यत्तु—षष्ठ्यष्टम्यप्यमावास्या कृष्णपक्षे चतुर्दशी ।
एताः परयुताः पूज्याः पराः पूर्वेण संयुताः ॥

इति युग्मवाक्यं तदप्येतत्संवाद्येव । यत्तु—

प्रतिपत्सद्वितीया स्याद्द्वितीया प्रतिपद्युता ॥ इति ।

यच्च—चतुर्थीसंयुता या च सा तृतीया फलप्रदा ।
चतुर्थी च तृतीयायां महापुण्यफलप्रदा ॥ इति ।

तदेतद्विरुद्धम् । अनयोश्च पक्षभेदेन व्यवस्थोक्ता विष्णुधर्मोत्तरे—

---

१ इत्यधिकम् ।

शुक्लपक्षे तिथिर्ग्राह्या यस्यामभ्युदितो रविः ।
कृष्णपक्षे तिथिर्ग्राह्या यस्यामस्तमितो रविः ॥ इति ।

कर्मकालव्याप्तौ तूपक्रमगा ।

योयस्य विहितः कालः कर्मणस्तदुपक्रमे ।
विद्यमानो भवेदङ्गं नोज्झितोपक्रमेण तु ॥

इति वचनात् । अयं च युग्मवाक्यकृतो निर्णयो दैव एव कर्मणि ।
पित्र्ये तु पूर्वोक्तपक्षेषु—

खर्वो दर्पस्तथा हिंसा त्रिविधं तिथिलक्षणम् ।
खर्वदर्पौ परौ पूज्यौ हिंसा स्यात्पूर्वकालिकी ॥

इति उशनसो वचसा निर्णयः । खर्वः साम्यं, दर्पो वृद्धिः, हिंसा-क्षयः । एते च खर्वादयः कचित्पूर्वतिथ्यपेक्षया ग्राह्यतिथेरेव । कचिद्ग्राह्यामपेक्ष्योत्तरोत्तरतिथेरिति तत्र तत्र वक्ष्यामः । तथा च निगमे—

द्वितीयादिकयुग्मानां पूज्यता नियमादिषु ।
एकोद्दिष्टादिवृद्ध्यादौ ह्रासवृद्ध्यादिचोदना ॥ इति ।

अत्राद्यमादिपदं तिथ्यन्तराणामुपादानार्थं, द्वितीयं सकलदैवकर्मणां, तृतीयं पार्वणस्य, चतुर्थं वृद्धिरादौ येषामित्यतद्गुणसंविज्ञानबहुव्रीहिणा सर्वदैवश्राद्धानां, मुख्यवृद्धिश्राद्धस्य तिथ्यप्रयुक्तत्वेन तन्निर्णयानुपयोगात् । वृद्धिपदं स्वनिमित्तकश्राद्धलक्षकम् । पञ्चमं साम्यस्य । 'ह्रासवृद्ध्यादिचोदना' खर्वदर्पादिवाक्यमित्यर्थः ।

यत्तु देवलः—

यां तिथिं समनुप्राप्य उदयं याति भास्करः ।
सा तिथिः सकला ज्ञेया स्नानदानजपादिषु ॥ इति ।

यदपि स्कान्दे—

यां तिथिं समनुप्राप्य यात्यस्तं पद्मिनीपतिः ।
सा तिथिः सकला ज्ञेया दानाध्ययनकर्मसु ॥ इति ।

तत्पूर्वोत्तरग्राह्यत्वसाधकानां युग्मखर्वशुक्लकृष्णादिवचसामुपोद्बलकम् ।
एतदपवादः स्कान्दे—

मन्वादौ च युगादौ च ग्रहणे चन्द्रसूर्ययोः ।
व्यतीपाते वैधृतौ च तत्कालव्यापिनी क्रिया ॥

अभ्यङ्गे चोदधिस्नाने दन्तधावनमैथुने ।
जाते च मरणे चैव तत्कालव्यापिनी तिथिः ॥

इति विरुद्धवचोऽव्यवस्था ।

अहर्विभागः

अन्हः सामान्यतो विभागमाह व्यासः—

मुहूर्तत्रितयं प्रातस्तावानेव तु सङ्गवः ।
मध्याह्नस्त्रिमुहूर्त्तः स्यादपराह्णोऽपि तादृशः ॥
सायाह्नस्त्रिमुहूर्त्तः स्यात्सर्वकर्मबहिष्कृतः ॥ इति ।

पूर्वाह्णमध्याह्नापराह्ण इति त्रेधा विभागस्य क्वचित् पूर्वाह्णोऽपराह्ण इति द्वेधाविभागस्य च पर्वनिर्णयादौ उपयोगो वक्ष्यते ।

अथैकभुक्तम् ।

देवलः—दिनार्द्धसमयेऽतीते भुज्यते नियमेन यत् ।
एकभक्तमिति प्रोक्तं न्यूनं ग्रासत्रयेण तु ॥

दिनार्द्धोत्तरं सामान्यतोऽप्युक्तः कालो मध्याह्नान्तावधिरेव ।

मध्याह्नव्यापिनी ग्राह्या एकभक्तव्रते तिथिः ॥

इति बौधायनोक्तेः । अत्र पूर्वोक्तषट्पक्षेषु उत्तरदिने एव कर्मकालव्याप्तौ अधिकस्पर्शे चोत्तराऽन्यथा पूर्वैवेति माधवादयः ।

अथ नक्तम् ।

व्यासः—त्रिमुहूर्तः प्रदोषः स्याद्भानावस्तंगते सति ।
नक्तं तत्र प्रकुर्वीत इति शास्त्रस्य निश्चयः ॥

यत्तु—सायंसन्ध्या त्रिघटिका ह्यस्तादुपरिभास्वतः ॥

इति स्कान्दोक्तसन्ध्यायां मार्कण्डेयेन—

चत्वारीमानि कर्माणि सन्ध्यायां परिवर्जयेत् ।
आहारं मैथुनं निद्रां स्वाध्यायं च चतुर्थकम् ॥

इति भोजनं निषिद्धं तद्रागप्राप्तं न वैधं नक्तभोजनं, विधिस्पृष्टे निषेधानवकाशात् । एतेन पर्वादिरात्रिभोजननिषेधोऽप्यत्र प्रत्युक्तः ।

प्रदोषव्याप्त्यभावे स्कान्दे—

प्रदोषव्यापिनी न स्याद्दिवा नक्तं विधीयते ।

आत्मनो द्विगुणा छाया मन्दीभवति भास्करे ॥
तन्नक्तं नक्तमित्याहुर्न नक्तं निशि भोजनम् ।
एवं ज्ञात्वा ततो विद्वान् सायाह्ने तु भुजिक्रियाम् ॥
कुर्यान्नक्तव्रती नक्तं फलं भवति निश्चितम् ॥ इति ।

सौरनक्ते—

त्रिमुहूर्तस्पृगेवाह्नि निशि चैतावती तिथिः ।
तस्यां सौरं भवेन्नक्तमहन्येव तु भोजनम् ॥

स्मृत्यन्तरे विशेषः—

यतिश्च विधवा चैव कुर्यात्तत्सदिवाकरम् ।
सदिवाकरं तु तत्प्रोक्तमन्तिमे घटिकाद्वये ॥ इति ।

इति नक्तनिर्णयः ।

अयाचितनिर्णयः ।

अथाऽयाचितं निर्णीयते । तच्च याचितभोजननिषेधरूपमयाचितं भोक्ष्य इति व्रतरूपं वा । तस्य च फलमुक्तं माधवीये स्मृत्यन्तरे—

अयाचिताशी मितभुक् परां सिद्धिमवाप्नुयात् ॥ इति ।

अत्र विशेषवचनाभावादुपवासवन्निर्णय इति केचित् । तन्न ।

एकभक्ताऽयाचितयोर्या विशद्घटिकावधिः ।
सा तिथिः सर्वदा ज्ञेया नक्ते सायाह्नसङ्गता ।

इति शार्ङ्गधरीये नारदीयोक्तेः ।

व्रतोपयोगिनिर्णयः

अथ प्रसङ्गाद्व्रतविषये किञ्चिदुच्यते । सत्यव्रते—

उदयस्था तिथिर्या हि न भवेद्दिनमध्यभाक् ।
सा खण्डा न व्रतानां स्यादारम्भश्च समापनम् ॥ इति ।

ब्रह्मयामले—

दिनभद्रा यदा रात्रौ रात्रिभद्रा यदा दिवा ।
न त्याज्या शुभकार्येषु प्राहुरेवं पुरातनाः ॥

व्रतखण्डेऽग्निपुराणे—

व्रीहिषष्टिकमुद्गाश्च कलायाः सलिलं पयः ।

श्यामाकाश्चैव नीवारा गोधूमाद्या व्रते हिताः ॥

तथा—कूष्माण्डालाबुवार्त्ताकपालक्यज्योत्स्निकास्त्यजेत् ।
चरुभैक्ष्यं सक्तुकणाः शाकं दधि घृतं मधु ॥
श्यामाकाः शालिनीवारा यावकं मूलतण्डुलम् ।
हविष्यं व्रतनक्तादावग्निकार्यादिके हितम् ॥
मधुमांसं विहायाऽन्यद्व्रते च हितमीरितम् ।

ज्योत्स्निका कोशातकी । हितं [1]विहितम् । मधु मद्यम् । छन्दोगपरिशिष्टे कात्यायनः—

हविष्येषु यवा मुख्यास्तदनु व्रीहयः स्मृताः ।
माषकोद्रवगौरादीन्सर्वाभावेऽपि वर्जयेत् ॥

भविष्योत्तरे—

हैमन्तिकं सितास्विन्नं धान्यं मुद्गा यवास्तिलाः ।
कलापकङ्गुनीवारवास्तुकं हिलमोचिका ॥
षष्टिकाः कालशाकं च मूलकं केमुकेतरत् ।
कन्दः सैन्धवसामुद्रे लवणे दधिसर्पिषी ॥
पयोऽनुद्धृतसारं च पनसाम्रहरीतकी ।
पिप्पली जीरकं चैव नागरङ्गाह्वतिन्तिणी ॥
कदलीलवलीधात्रीफलान्यगुडमैक्षवम् ।
अतैलपक्वं मुनयो हविष्याणि प्रचक्षते ॥

सर्पिः पयश्चात्र गव्यम् । अतैलपक्वमित्येतत् कथितहविष्याणामेव विशेषणम् । व्रताधिकारे सुमन्तुः—

विहितस्याननुष्ठानमिन्द्रियाणामनिग्रहः ।
निषिद्धसेवनं नित्यं वर्जनीयं प्रयत्नतः ॥ इति ।

विष्णुधर्मेषु—

असकृज्जलपानं च दिवास्वापं च मैथुनम् ।
ताम्बूलचर्वणं मांसं वर्जयेद्व्रतवासरे ॥ इति ।

मांसनिषेधः पारणादिने—'पारणान्तं व्रतं ज्ञेयम्' इत्युक्तेः । नतु प्रधानदिने प्रसक्त्यभावात् ॥

---

१ मधु घ. ङ. पाठः ।

वर्जयेत्पारणे मांसं व्रताहेऽप्यौषधं सदा ।

इत्युक्तेश्च ।

अष्टैतान्यव्रतघ्नानि आपो मूलं फलं पयः ।
हविर्ब्राह्मणकाम्या च गुरोर्वचनमौषधम् ॥

इत्यौषधरूपमपि मांसं व्रताहे वर्जयेदित्यर्थः ।

देवलः—असकृज्जलपानाच्च सकृत्ताम्बूलचर्वणात् ।
उपवासः प्रणश्येत दिवास्वापाच्च मैथुनात् ॥

अशक्तौ तु स एव—

अत्यये चाम्बुपानेन नोपवासः प्रणश्यति ॥ इति ।

अत्यये प्राणात्यये । वृद्धवसिष्ठः—

उपवासे तथा श्राद्धे न कुर्याद्दन्तधावनम् ।
दन्तानां काष्ठसंयोगो हन्ति सप्तकुलानि च ॥

पैठीनसिः—

अलाभे वा निषेधे वा काष्ठानां दन्तधावने ।
पर्णादिना विशुद्ध्येत जिह्वोल्लेखः सदैव च ॥ इति ।

हारीतः—'पतितपाखण्डिनास्तिकादिसंभाषणानृताश्लीलादिकमुपवासादिषु वर्जनीयम्' इति ।

अपां द्वादशगण्डूषैर्विदध्याद्दन्तधावनम् ।

व्यासः—अलाभे दन्तकाष्ठानां निषिद्धायां तथा तिथौ ।

कौर्मे—बहिर्ग्रामान्त्यजान्सूतिं पतितं च रजस्वलाम् ।
न स्पृशेन्नाभिभाषेत नेक्षेत व्रतवासरे ।

विष्णुरहस्ये—

स्मृत्यालोकनगन्धादिस्वादनं परिकीर्तनम् ।
अन्नस्य वर्जयेत्सर्वं ग्रासानां चाभिकाङ्क्षणम् ॥
गात्राभ्यङ्गं शिरोऽभ्यङ्गं तांबूलं चानुलेपनम् ।
व्रतस्थो वर्जयेत्सर्वं यच्चान्यद्बलरागकृत् ॥ इति ।

मैथुनं चाष्टाङ्गम् । तथा च—

स्मरणं कीर्तनं केलिः प्रेक्षणं गुह्यभाषणम् ।
संकल्पोऽध्यवसायश्च क्रियानिर्वृत्तिरेव च ।

एतन्मैथुनमष्टाङ्गं प्रवदन्ति मनीषिणः ॥ इति ।

देवलः—स्त्रीणां तु प्रेक्षणात्स्पर्शात्ताभिः संकथनादपि ।
विपद्यते ब्रह्मचर्यं न दारेष्वृतुसंगमात् ॥

इत्यपि क्वचित्पाठः । विष्णुधर्मोत्तरे—

तज्जपस्तवनध्यानं तत्कथाश्रवणादिकम् ।
तदर्चनं च तन्नामकीर्त्तनं श्रवणादयः ॥
उपवासवतामेते गुणाः प्रोक्ता मनीषिभिः ॥

तच्छब्देनोपास्या देवता व्रतदेवता वा ।

देवलः— ब्रह्मचर्यमहिंसा च सत्यमामिषवर्जनम् ।
व्रतेष्वेतानि चत्वारि कर्तव्यानीह सूरिभिः ॥

आमिषं मांसम् ।

आमिषं दृतिपानीयं गोवर्जं क्षीरमामिषम् ।
मसूरमामिषं सस्ये फले जम्बीरमामिषम् ॥
आमिषं शुक्तिकाचूर्णमारनालं तथामिषम् ।

इति स्मृत्यन्तरोक्तम् । पद्मपुराणे—

अष्टैतान्यव्रतघ्नानि आपो मूलं फलं पयः ।
हविर्ब्राह्मणकाम्या च गुरोर्वचनमौषधम् ॥

पयःपानादीनामव्रतघ्नत्वं स्त्रीबालाद्यत्यन्तपीडितव्रतविषयम् ।

सर्वभूतभयं चैव प्रमादो गुरुशासनम् ।
अव्रतघ्नानि पठ्यन्ते सकृदेतानि शास्त्रतः ॥

सर्वभूतभयं सर्वेभ्यो भूतेभ्यो भयम् ।

व्रत्तादौ परान्नभोजननिषेधो देवीपुराणे—

व्रते च तीर्थेऽध्ययने श्राद्धेऽपिच विशेषतः ।
परान्नभोजनादेवि यस्यान्नं तस्य तत्फलम् ॥ इति ।

हेमाद्रौ पाद्मे—

गर्भिणी सूतिकादिश्च कुमारी वाऽथ रोगिणी ।
यदा शुद्धा तदाऽन्येन कारयेत्प्रयता स्वयम् ॥ इति ।

---

१ संगमात् इति । २ स्वदारेषु । ३ कृतामिति क. पाठः ।

मदनरत्ने छागलेयः—

पूर्वं व्रतं गृहीत्वा यो नाचरेत्काममोहितः ।
जीवन्भवति चाण्डालो मृतः श्वा चाभिजायते ॥

गारुडे— क्रोधात्प्रमादाल्लोभाद्वा व्रतभङ्गो भवेद्यदि ।
दिनत्रयं न भुञ्जीत मुण्डनं शिरसोऽथवा ॥ इति ।

प्रायश्चित्तोत्तरमतिक्रान्तानुष्ठानं कार्यम् ।

प्रायश्चित्तमिदं कृत्वा पुनरेव व्रती भवेत् ॥

इति वायुपुराणोक्तेः ॥

इति व्रतोपयोगिप्रकरणम् ।

प्रतिपन्निर्णयः ।

अथ प्रतिपदमारभ्य क्रमेण सर्वतिथीनां निर्णयस्तत्कृत्यं चोच्यते । तत्रादौ प्रतिपन्निर्णीयते । तत्र प्रतिपदपराह्णव्यापिनी चेत् शुक्लपक्षे पूर्वा ग्राह्या 'प्रतिपद्यमावास्या' इति युग्मवाक्यात् । मदनरत्ने स्कान्देऽपि 'प्रतिपत्संमुखी कार्या या भवेदापराह्णिकी' इति । दीपिकाऽपि 'शुक्ला स्यात्प्रतिपत्तिथिः प्रथमतश्चेत्सा पराह्णे भवेत्' इति । तदभावे तूक्तं माधवेन 'तदभावे तु सायाह्नव्यापिनी परिगृह्यते' इति । कृष्णपक्षे परा ग्राह्या । तदुक्तं दीपिकायाम्—कृष्णातूत्तरतोऽखिलेति ।

अथ चैत्रकृष्णप्रतिपत्कृत्यं भविष्योत्तरे—

चैत्रे मासि महाबाहो पुण्या प्रतिपदा परा ।
या तस्यां श्वपचं स्पृष्ट्वा स्नानं कुर्यान्नरोत्तमः ॥
न तस्य दुरितं किञ्चिन्नाधयो व्याधयो नृप ।

तथा— कृत्वा चावश्यकार्याणि संतर्प्य पितृदेवताः ।
वन्दयेद्धोलिकाभूतिं[1] सर्वदुष्टोपशान्तये ॥

मन्त्रः— वन्दितासि सुरेन्द्रेण ब्रह्मणा शङ्करेण च ।
अतस्त्वं पाहि नो देवि भूते भूतिप्रदा भव ॥ इति ।

पुराणसमुच्चयेपि—

वृत्ते तुषारसमये सितपञ्चदश्यां
प्रातर्वसन्तसमये समुपस्थिते च ॥

---

१ धूलिं पाठः । घ. ङ.

सम्प्राश्य चूतकुसुमं सह चन्दनेन
सत्यं हि पार्थ पुरुषोथ समाः सुखी स्यात् ॥

पञ्चदश्यामतीतायां प्रातर्भक्षयेदित्यर्थः ।

ये पिबन्ति वसन्ताद्ये चूतपुष्पं सचन्दनम् ॥
सत्यं हृत्स्थस्य कामस्य पूजनं क्रियते जनैः ।

इति भविष्योत्तरात् । वसन्ताद्ये चैत्रप्रतिपदि । मन्त्रः—

चूतमग्र्यं वसन्तस्य माकन्द कुसुमं तव ।
सचन्दनं पिबाम्यद्य सर्वकामार्थसिद्धये ॥

भविष्ये—ततः प्रातर्द्वितीयायां पुत्रमित्रादिसंयुतः ।
नृपतिर्विततते देशे वितानवरशोभिते ॥
उपवेश्यासने रम्ये पौरजानपदैः सह ।
सिन्दूरकुङ्कुमैः क्षोदपट्टवासैः सचन्दनैः ॥
विकीर्य लोकांस्ताम्बूलैः संमान्य च पृथक् पृथक् ।
नृत्यगीतविनोदैश्च कुर्यात्काममहोत्सवम् ॥
एवं कुर्वन्नवाप्नोति यावत्संवत्सरं सुखम् ॥ इति ।

इदं तु पूर्वविद्धायामेव ।

वत्सरादौ वसन्तादौ बलिराज्ये तथैव च ।
पूर्वविद्धैव कर्त्तव्या प्रतिपत्सर्वदा बुधैः ॥

इति वृद्धवसिष्ठवाक्यात् । चैत्रशुक्लप्रतिपदपि वत्सरारम्भे उदयव्यापिनी ग्राह्या । तदुक्तं माधवीये ब्राह्मे—

चैत्रे मासि जगद्ब्रह्मा ससर्ज प्रथमेऽहनि ।
शुक्लपक्षे समग्रं तु तदा सूर्योदये सति ॥ इति ।

दिनद्वये उदयव्याप्तावव्याप्तौ वा पूर्वैव पूर्वोक्तवृद्धवसिष्ठवाक्यात् ।

वत्सरादौ वसंतादौ बलिराज्ये तथैव च ।
पूर्वविद्धैव कर्त्तव्या प्रतिपत्सर्वदा बुधैः ॥ इति ।

तत्र तैलाभ्यङ्ग उक्तस्तेनैव—

वत्सरादौ वसन्तादौ बलिराज्ये तथैव च ।
तैलाभ्यङ्गमकुर्वाणो नरकं प्रतिपद्यते ॥ इति ।

---

१ कामदम् ङ. पाठः ।

अत्र शकादिश्रवणमुक्तं ज्योतिःशास्त्रे—

शकवत्सरभूपमन्त्रिणां रसधान्येश्वरमेघपतीनाम् ।
श्रवणात्पठनाच्च वै नृणां शुभतां यात्यशुभं सह श्रिया ॥ इति ।

चैत्रस्य मलमासत्वे तैलाभ्यङ्गशकश्रवणादि शुद्ध एव कार्यम् । यद्यपि वत्सरवसन्तयोः प्रवृत्तिर्जाता तथापि तत्प्रयुक्तकृत्यम्—

षष्ट्या तु दिवसैर्मासः कथितो बादरायणैः ।
पूर्वमर्द्धं परित्यज्य कर्त्तव्या चोत्तरे क्रिया ॥

इति वचनादुत्कृष्योत्तर एव कार्यम् । नवरात्ररामनवम्यादिवत् । तथाऽत्र विशेषो भविष्ये—

अतीते फाल्गुने मासि प्राप्ते चैत्रमहोत्सवे ।
पुण्येऽह्नि विप्रकथिते प्रपादानं समारभेत् ॥ इति ।
ततश्चोत्सर्जयेद्विद्वान्मन्त्रेणानेन मानवः ।
प्रपेयं सर्वसामान्या भूतेभ्यः प्रतिपादिता ॥
अस्याः प्रदानात्पितरस्तृप्यन्तु हि पितामहाः ।
अनिवार्यं ततो देयं जलं मासचतुष्टयम् ॥
प्रपां दातुमशक्तेन विशेषाद्धर्ममीप्सुना ।
प्रत्यहं धर्मघटको वस्त्रसंवेष्टिताननः ॥
ब्राह्मणस्य गृहे देयः शीतामलजलः शुचिः ।

तत्र मन्त्रः—

एष धर्मघटो दत्तो ब्रह्मविष्णुशिवात्मकः ।
अस्य प्रदानात्सकला मम सन्तु मनोरथाः ॥
अनेन विधिना यस्तु धर्मकुम्भं प्रयच्छति ।
प्रपादानफलं सोऽपि प्राप्नोतीह न संशयः ॥ इति ।

ज्येष्ठशुक्लप्रतिपदि दशहरारम्भः । काशीखण्डे—

ज्येष्ठे मासि सिते पक्षे प्राप्य प्रतिपदं तिथिम् ।
दशाश्वमेधिके स्नात्वा मुच्यते सर्वपातकैः ॥
एवं सर्वासु तिथिषु क्रमस्नायी नरोत्तमः ।
आ शुक्लपक्षदशमीं प्रतिजन्माघमुत्सृजेत् ॥ इति ।

---

१ वचनेन पूर्वमासकृत्यस्योत्तरमासे कर्तव्यत्वाभिधानादिति घ. पाठः । २ नरो- भवेत् ।

अथाश्विनशुक्लप्रतिपदि नवरात्रारम्भः। तदुक्तं हेमाद्रौ धौम्येन—

आश्विने शुक्लपक्षे तु कर्त्तव्यं नवरात्रकम्।
प्रतिपदादिक्रमेणैव यावच्च नवमी भवेत्॥

तत्र पूर्वाह्णव्यापिनी ग्राह्या—

आश्विनस्य सिते पक्षे नवरात्रमुपोषितः।
सुस्नातस्तिलतैलेन पूर्वाह्णे पूजयेच्छिवाम्॥

इति देवीपुराणे तस्य कर्मकालतोक्तेः—

कर्मणो यस्य यः कालस्तत्कालव्यापिनी तिथिः।

इत्यनेन कर्मकालव्यापिन्यामेव कर्त्तव्योक्तेः। नचात्रोपवासानुरोधेन निर्णयः। तस्य नवरात्रमुपोषितः पूजयेत् इत्यादिदेवीपुराणादौ 'नखानि निकृन्तति स्नाति' इत्यादिवत्फलसंस्कारत्वेन पूजाङ्गत्वावगमात्। अतः प्रधानभूतपूजाकालपूर्वाह्णव्यापित्वेनैव निर्णयः। पूजायास्तु प्राधान्यं फलसंबन्धात्। सा च स्कान्दे—

आश्विने मासि मेघान्ते महिषासुरमर्दिनीम्।
देवीं संपूजयित्वा ये अर्द्धरात्रेऽष्टमीषु च॥
क्रीडन्ति विविधैर्भोगैर्देवलोके सुदुर्लभे।
नाधयो व्याधयस्तेषां न च शत्रुभयं भवेत्॥ इति।

कालिकापुराणे—

कृत्वैवं परमामायुर्निर्वृत्तिं त्रिदिवौकसः।
एवमन्यैरपि सदा देव्याः कार्यं प्रपूजनम्॥
विभूतिमतुलां लब्धुं चतुर्वर्गप्रदायकम्।

पूजयेदित्यधिकृत्य भविष्योत्तरेऽपि—

भवानीतुष्टये पार्थ संवत्सरसुखाय च।
भूतप्रेतपिशाचानां नाशाय चोत्सवाय च॥ इति।

अकरणे प्रत्यवायोपि कालिकापुराणे—

यो मोहादथवालस्याद्देवीं दुर्गां महोत्सवे।
न पूजयति दुष्टात्मा द्वेषाद्वाप्यथ भैरव॥
क्रुद्धा भगवती तस्य कामानिष्टानि हन्ति वै।

---

१ क. ख. ग. अधिकम्।

तथा देवीपुराणे—

पूजयित्वाऽऽश्विने मासि विशोको जायते नरः ।
वर्षेवर्षे विधातव्यं पूजनं च विसर्जनम् ॥ इति ।

यत्तु गोविन्दार्णवे देवीपुराणे—

शरत्काले महापूजा क्रियते या च वार्षिकी ।
सा कार्योदयगामिन्यां न तिथेस्तत्र युग्मता ॥ इति

तत्रोदयगामित्वमपि प्रायः पूर्वाह्णव्यापित्व एव भवतीति न विरोधाशङ्का । युग्मता युग्मवाक्यानुरोधेन निर्णय इत्यर्थः । वार्षिकीत्यनेन संवत्सरस्यादौ चैत्रशुक्लप्रतिपद्युपक्रम्य नवम्यन्ता पूजाऽभिधीयते । ततश्च शरद्वसन्तयोस्तुल्य एव दुर्गोत्सवः कार्यः । यानि तु—

यो मां पूजयते नित्यं द्वितीयादिगुणान्विताम् ।
प्रतिपच्छारदे ज्ञात्वा सोऽश्नुते सुखमव्ययम् ॥
यदि कुर्यादमायुक्ता प्रतिपत्स्थापने मम ।
तस्य शापायुतं दत्वा भस्मशेषं करोम्यहम् ॥
आग्रहात्कुरुते यस्तु कलशस्थापनं मम ।
तस्य संपद्विनाशः स्याज्ज्येष्ठः पुत्रो विनश्यति ॥

तथा— न दर्शकलया युक्ता प्रतिपच्चण्डिकार्चने ।
उदये द्विमुहूर्तापि ग्राह्या सोदयगामिनी ॥
या चाऽऽश्वयुजि मासे स्यात्प्रतिपद्भद्रयान्विता ।
शुद्धमम्बार्चनं तस्यां शतयज्ञफलप्रदम् ॥

इत्यमायोगनिषेधकानि, यानिच—

द्वितीयाशेषसंयुक्ता प्रतिपच्चण्डिकार्चने ।
मोहादथोपदेशाद्वा कृतं पुत्रविनाशकम् ॥
आरम्भे नवरात्रस्य द्वितीया त्रुटिसंयुता ।
न केवलं तिथिं हन्ति वेधात्सा पुत्रसंपदम् ॥

इत्यादीनि द्वितीयायोगनिषेधकानि तान्युभयविधान्यपि सर्वाणि निर्मूलानि । समूलत्वेऽपि परस्परं सत्प्रतिपक्षत्वादनिर्णायकानि । चन्द्रप्रकाशे—

प्रातरावाहयेद्देवीं प्रातरेव प्रवेशयेत् ।
प्रातः प्रातश्च संपूज्य प्रातरेव विसर्जयेत् ॥

इत्युक्तम् । सति संभवे प्रतिपदः आद्यं नाडीषोडशकं त्यक्त्वा कलशं स्थापयेत् ।

आद्याः षोडश नाडीस्तु लब्ध्वा यः कुरुते नरः ।
कलशस्थापनं तत्र ह्यरिष्टं जायते ध्रुवम् ॥

इति देवीपुराणवचनात् । कलशस्थापने वैधृतिचित्रादियोगनिषेधकानि वचनानि तानि निर्मूलानि ।

यथा—

भद्रायुता चेत्प्रतिपत्तु लभ्यते विरुद्धयोगैरपि सङ्गता सती ।
सैवापराह्णे विबुधैर्विधेया स्त्रीपुत्रराज्यादिविवृद्धिहेतुः ॥ इति ।

कलशस्थापनं तु दिवैव कार्यम् । न रात्रौ । तदुक्तं मात्स्ये—

न रात्रौ स्थापनं कार्यं न च कुंभाभिषेचनम् ॥ इति ।

अत्र त्रिरात्रमप्युक्तं धौम्येन—

त्रिरात्रं चापि कर्तव्यं सप्तम्यादि यथाक्रमम् ॥ इति ।

अथ विस्तरेण नवरात्रकृत्यं देवीपुराणे—

कन्यासंस्थे रवौ शक्र शुक्लामारभ्य नन्दिकाम् ।
अयाची त्वथवैकाशी नक्ताशी वाऽथ वाय्वदः ॥
प्रातःस्नायी जितद्वन्द्वस्त्रिकालं शिवपूजकः ।
जपहोमसदायुक्तः कन्यकां भोजयेन्मुदा ॥

शिवश्च शिवा च शिवौ तयोः पूजकः । नन्दा च प्रतिपदेव प्रथमोपस्थितत्वात् । भविष्ये—

त्रिरात्रं चापि कर्तव्यं सप्तम्यादि यथाक्रमम् ।

तत्र प्रतिपदि पूर्वाह्णे तिलतैलेन स्नातो यजमानो गणपतिं संपूज्य देशकालौ निर्दिश्य नवमीपर्यन्तमुपवासाद्यन्यतरनियमोपेतो दुर्गापूजनममुकफलकामः करिष्ये इति संकल्पयेत् । ततः कदलीस्तम्भवस्त्रादिमण्डिते गृहे चतुरस्रचतुर्हस्तवेदिकोपरि सर्वतोभद्रादिमण्डलं विधाय तत्र 'महीद्यौः' इत्यादिवरुणपूजान्तं कलशस्थापनं कुर्यात् । सौवर्णादिप्रतिमापूजार्थम् 'पूज्या मण्डलकुम्भस्थाः' इति देवीपुराणात् । मृन्मयादिका तु कलशस्य पश्चादासने स्थाप्या । वेदिकोणेष्वपि चत्वारः कलशाः स्थाप्याः ।

चतुरः कलशान्यस्तु दद्याद्देवगृहे नरः ।
चतुःसमुद्रवलयां स तु भुङ्क्ते वसुन्धराम् ।

इति विष्णुधर्मोत्तरात् । प्रतिमा च हेमादिमयी । देवीपुराणे—

हैमराजतमृद्धातुशैलचित्रार्पिताऽपि वा ।
खड्गे शूलेऽर्चिता देवी सर्वकामफलप्रदा ॥
मृन्मयीं प्रतिमां कृत्वा बिल्वे वा यस्तु पूजयेत् ।
आत्मवित्तानुसारेण स लभेन्मौक्तिकं फलम् ॥ इति ।

प्रतिमालक्षणं मत्स्यपुराणे—

जटाजूटसमायुक्तामर्द्धेन्दुकृतलक्षणाम् ।
लोचनत्रयसंयुक्तां पद्मेन्दुसदृशाननाम् ॥
अतसीपुष्पवर्णाभां सुप्रतिष्ठां सुलोचनाम् ।
नवयौवनसंपन्नां सर्वाभरणभूषिताम् ॥
सुचारुदर्शनां तद्वत्पीनोन्नतपयोधराम् ।
त्रिभङ्गस्थानसंस्थानां महिषासुरमर्दिनीम् ॥
त्रिशूलं दक्षिणे दद्यात्खड्गं चक्रं तथैव च ।
तीक्ष्णं बाणं तथा शक्तिं वामतोऽपि निवेशयेत् ॥
खेटकं पूर्णचापं च पाशमङ्कुशमूर्द्धजम्[1] ।
घण्टां वा परशुं वापि वामतः सन्निवेशयेत्[2] ॥
अधस्तान्महिषं तद्वद्विशिरस्कं प्रदर्शयेत् ।
शिरश्छेदोद्भवं तद्वद्दानवं खड्गपाणिनम् ॥
हृदि शूलेन निर्भिन्नं निर्यदन्त्रविभूषितम् ।
रक्तरक्तीकृताङ्गं च रक्तविस्फारितेक्षणम् ॥
वेष्टितं नागपाशेन भ्रुकुटीभीषणाननम् ।
सपाशवामहस्तेन धृतकेशं च दुर्गया ॥
वमद्रुधिरवक्त्रं च देव्याः सिंहं प्रदर्शयेत् ।
देव्यास्तु दक्षिणं पादं समं सिंहोपरिस्थितम् ॥
किञ्चिदूर्ध्वं तथा वाममङ्गुष्ठं महिषोपरि ।
स्तूयमानं च तद्रूपममरैः सन्निवेशयेत् ॥ इति ।

---

१ क्रमादधः पाठः । घ. ङ. ख. २ निबोधत पाठः । घ. ङ. ख.

ध्यानमप्येवम्—

एहि दुर्गे महाभागे रक्षार्थं मम सर्वदा ।
आवाहयाम्यहं देवि सर्वकामार्थसिद्धये ॥
अस्यां मूर्तौ समागच्छ स्थितिं मत्कृपया कुरु ।
रक्षां कुरु सदा भद्रे विश्वेश्वरि नमोऽस्तु ते ॥

इत्यावाहनम् ‘भगवति दुर्गे इहागच्छ इह तिष्ठ इह संनिधेहि स्थिरा भव सुप्रसन्ना भव’ इत्यपि पठन्ति । पूजादिमन्त्रश्च ‘कुर्याद्देव्याश्च मन्त्रेण’ इत्यभिधाय—

जयन्ती मङ्गला काली भद्रकाली कपालिनी ।
दुर्गा क्षमा शिवा धात्री स्वाहा स्वधा नमोऽस्तु ते ।
अनेनैव तु मन्त्रेण जपहोमादि कारयेत् ।

इति पुराणोक्तेः ।

तल्लिङ्गैः पूजयेन्मन्त्रैः सर्वदेवान्समाहितः ॥

इति अग्निपुराणाद्वैदिक आगमिको वा । ‘नाम्ना सर्वं समापयेत्’ इति साधारणवाक्यात्प्रणवादिचतुर्थ्यन्तनमोन्तनाममन्त्रो वा । स्कान्दे तु—

दुर्गमे दुस्तरे कार्ये भवदुःखविनाशिनि ।
पूजयामि सदा भक्त्या दुर्गां दुर्गार्त्तिनाशिनीम् ॥
अनेनैव तु मन्त्रेण जपहोमादि कारयेत् ।

इत्युक्तम् । छत्रचामरादिभी राजोपचारैः पूजा । तदन्ते प्रणम्य देवीं प्रार्थयेदनेन मन्त्रेण—

महिषघ्नि महामाये चामुण्डे मुण्डमालिनि ।
द्रव्यमारोग्यविजयं देहि देवि नमः सदा ॥
भूतप्रेतपिशाचेभ्यो रक्षोभ्यश्च महेश्वरि ।
देवेभ्यो मानुषेभ्यश्च भयेभ्यो रक्ष मां सदा ॥
सर्वमङ्गलमङ्गल्ये शिवे सर्वार्थसाधिके ।
शरण्ये त्र्यम्बके गौरि नारायणि नमोऽस्तु ते ॥
रूपं देहि यशो देहि भगं भगवति देहि मे ।
पुत्रान्देहि धनं देहि सर्वान्कामान्प्रदेहि मे ॥ इति ।

ततो दुर्गामन्त्रं वैदिकमागमिकं वा जपेत् । ‘दुर्गाग्रतो जपेन्मन्त्रमेकचित्तः समाहित’ इति देवीपुराणात् । यद्वा—

---

१ वीं पाठः घ. ।

माहात्म्यं भगवत्यास्तु पुराणादिषु कीर्त्तितम् ।
पठेच्च शृणुयाद्वापि सर्वकामसमृद्धये ॥

तथा— एकोत्तराभिवृद्ध्या तु नवमीं यावदेव हि ।
चण्डीपाठं जपेच्चैव जापयेद्वा विधानतः ॥

वाराहीतन्त्रे—

सङ्कल्पितस्तोत्रपाठे सङ्ख्यां कृत्वा पठेत्सुधीः ।

तत्रैव— चण्डीपाठफलं देवि शृणुष्व गदतो मम ।
एकावृत्त्यादिपाठानां यथावत्कथयामि ते ॥
सङ्कल्पपूर्वं संपूज्य न्यस्याङ्गेषु मनून्सकृत् ।
पाठाद्बलिप्रदानाच्च सिद्धिमाप्नोति मानवः ॥
उपसर्गोपशान्त्यर्थं त्रिरावृत्तं पठेन्नरः ।
ग्रहोपशान्तौ कर्त्तव्यं पञ्चावृत्तं वरानने ॥
महाभये समुत्पन्ने सप्तावृत्तं समुन्नयेत् ।
नवावृत्ताद्भवेच्छान्तिर्वाजपेयफलं लभेत् ॥
राजवश्याय भूत्यै च रुद्रावृत्तमुदीरयेत् ।
अर्कावृत्ते काम्यसिद्धिर्वैरहानिश्च जायते ॥
मन्वावृत्ताद्रिपुर्वश्यस्तथा स्त्री वश्यतामियात् ।
सौख्यं पञ्चदशावृत्ताच्छ्रियमाप्नोति मानवः ॥
कलावृत्त्या पुत्रपौत्रधनधान्यागमं विदुः ।
राज्ञां भीतिविमोक्षाय वैरस्योच्चाटनाय च ॥
कुर्यात्सप्तदशावृत्तं तथाष्टदशकं प्रिये ।
महारणविमोक्षाय विंशावृत्तं पठेत्सुधीः ॥
पञ्चविंशावर्त्तनात्तु भवेद्बन्धविमोक्षणम् ।
सङ्कटे समनुप्राप्ते दुश्चिकित्स्यामये तथा ॥
जातिध्वंसे कुलोच्छेदे आयुषो नाश आगते ।
वैरिवृद्धौ व्याधिवृद्धौ धननाशे तथा क्षये ॥
तथैव त्रिविधोत्पाते तथाचैवातिपातके ।
कुर्याद्यत्नाच्छतावृत्तं ततः संपद्यते शुभम् ॥
श्रेयोवृद्धिः शतावृत्ताद्राज्यवृद्धिस्तथा परा ।
मनसा चिन्तितं देवि सिद्ध्येदष्टोत्तराच्छतात् ॥

शताश्वमेधयज्ञानां फलमाप्नोति सुव्रते ।
सहस्रावर्त्तनाल्लक्ष्मीरावृणोति स्वयं स्थिरा ॥
भुक्त्वा मनोरथान्कामान्नरो मोक्षमवाप्नुयात् ।
यथाश्वमेधः क्रतूनां देवानां च यथा हरिः ॥
स्तवानामपि सर्वेषां तथा सप्तशतीस्तवः ।
अथवा बहुनोक्तेन किमेतेन वरानने ।
चण्ड्याः शतावृत्तिपाठात्सर्वाः सिद्ध्यन्ति सिद्धयः ॥ इति ।

पाठश्च नारायणादीन्नमस्कृत्य कार्यः ।

नारायणं नमस्कृत्य नरं चैव नरोत्तमम् ।
देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत् ॥

इतिवचनात् । जयशब्दार्थश्च भविष्यपुराणे—

अष्टादशपुराणानि रामस्य चरितं तथा ।
विष्णुधर्मादिशास्त्राणि शिवधर्माश्च भारत ॥
कार्ष्णं च पञ्चमो वेदो यन्महाभारतं स्मृतम् ।
शैवाश्च धर्मा राजेन्द्र मानवोक्ता महीपते ॥
जयेति नाम एतेषां प्रवदन्ति मनीषिणः ॥ इति ।

पाठप्रकारश्च मात्स्ये—

प्रणवं चाऽऽदितो जप्त्वा स्तोत्रं वा संहितां जपेत् ।
अन्ते च प्रणवं दद्यादन्यथा विफलं भवेत् ॥
शुद्धेनानन्यचित्तेन पठितव्यं प्रयत्नतः ।
न कार्यासक्तमनसा कार्यं स्तोत्रस्य वाचनम् ॥
आधारे स्थापयित्वा तु पुस्तकं प्रजपेत्सुधीः ।
हस्तसंस्थापनादेव यस्मादल्पफलं भवेत् ॥
स्वयं च लिखितं यत्तु कृतिना लिखितं च यत् ।
अब्राह्मणेन लिखितं तच्चापि विफलं भवेत् ॥

कृती लेखकः । तदुपजीवीत्यर्थः ।

ऋषिच्छन्दादिकं न्यस्य पठेत्स्तोत्रं विचक्षणः ।
सङ्कल्पिते स्तोत्रपाठे जपसङ्ख्यां पठेत्सुधीः ॥
अध्यायं प्राप्य विरमेन्नतु मध्ये कदाचन ।

---

१ 'क्रतूनामश्वमेधश्च' इत्यपि पाठः ।

कृते विरामे मध्ये तु अध्यायादि पठेत्पुनः ।

इति । श्रवणं ब्राह्मणादेव कार्यम्—

ब्राह्मणं वाचकं विन्द्यान्नान्यवर्णजमादरात् ।
श्रुत्वान्यवर्णजाद्राजन् वाचकान्नरकं व्रजेत् ॥

इति भविष्यत्पुराणात् । यद्यपि देवीपुराणे जपपूजादिवद्धोमोऽपि प्रत्यहमुक्तस्तथापि अष्टम्यां नवम्यामेव वा कार्यः । ब्रह्मपुराणे 'तत्राष्टम्यां भद्रकालीत्युपक्रम्य होमैर्ब्राह्मणतर्पणैः' इत्यष्टमीकृत्यमध्ये पाठात् ।

नवम्यां बलिदानं च कर्त्तव्यं वै यथाविधि ।
जपं होमं च विधिवत्कुर्यात्तत्र विभूतये ॥

इति कालिकापुराणात् शिष्टाचाराच्च बलिदानमप्यष्टमीनवम्योरेव ।

पुनः पूजां तथाऽष्टम्यां विशेषेण समाचरेत् ॥
जागरं च स्वयं कुर्याद्बलिदानं महानिशि ।
प्रभूतबलिदानं च नवम्यां विधिवच्चरेत् ॥

इतिकालिकापुराणवचनात् । अत्र यद्यपि शिष्टपरिगृहीतकालिकापुराणादिषु मद्यस्वगात्ररुधिरपशुघातादिकमुक्तं तथापि ब्राह्मणस्य न भवति ।

मद्यं दत्वा ब्राह्मणस्तु ब्राह्मण्यादेव हीयते ।
[1]स्वगात्ररुधिरं दत्वा ब्रह्महत्यामवाप्नुयात् ॥

इति कालिकापुराण एव निषेधात् । सात्विकी जपयज्ञाद्यैर्नैवेद्यैश्च निरामिषैरित्येतत्प्रकारकसात्विकपूजाया भगवद्गीतादिषु ब्राह्मणाधिकारिकताया एवोक्तेः । पशुबलिदानस्य तु 'विजयार्थं नृपोत्तमः' इति राजपुरस्कारेणैव विहितत्वाच्च । अतो माषभक्तादिना तेन बलिदान कार्यम्—

माषकुल्माषमांसाद्यैर्देयो दिक्षु बलिर्निशि ।
कूष्माण्डमिक्षुदण्डश्च मद्यं मांसं तथैव च ॥
एते बलिसमा ज्ञेयास्तृप्तौ छागसमाः[2]स्मृता ॥

इतिकालिकापुराणात् ।

---

१ मद्यमासव एव चेति पाठः । २ मता इति पाठः घ. ङ. ।

अथ कुमारीपूजा ।

देवीपुराणे । ब्रह्मोवाच—

न तथा तुष्यते शक्र होमदानजपादिना ।
कुमारीपूजनेनात्र यथा देवी प्रसीदति ॥

अत्र नवरात्रे ।

शुक्लाष्टमीचतुर्दश्योर्नवम्यां च विशेषतः ॥

इति प्रसङ्गादन्यत्रापि तद्विधानम् । कुमारीपूजने विशेषो मदनरत्ने स्कान्दे—

एकैकां पूजयेत्कन्यामेकवृद्ध्या तथैव च ।
द्विगुणां त्रिगुणां वाऽपि प्रत्येकं नवकं तु वा ॥
एकवर्षा तु या कन्या पूजार्थे तां विवर्जयेत् ।
गन्धपुष्पफलादीनां प्रीतिस्तस्या न विद्यते ॥
द्विवर्षकन्यामारभ्य दशवर्षावधि क्रमात् ।

यथोक्तालाभे तु देवीपुराणे—

विवाहानन्तरं कन्यां कन्यात्वमुपजायते ।
तावत्संपूज्यते कन्या यावत्पुष्पं न दृश्यते ॥ इति ।

पूजामन्त्रस्तु स्कान्दे—

मन्त्राक्षरमयीं लक्ष्मीं मातॄणां रूपधारिणीम् ।
नवदुर्गात्मिकां साक्षात्कन्यामावाहयाम्यहम् ॥
जगत्पूज्ये जगद्वन्द्ये सर्वशक्तिस्वरूपिणि ।
पूजां गृहाण कौमारि जगन्मातर्नमोऽस्तु ते ॥
एवमभ्यर्चनं कुर्यात्कुमारीणां प्रयत्नतः ।
कञ्चुकैः श्वेतवस्त्रैश्च गन्धपुष्पाक्षतादिभिः ॥
नानाविधैर्भक्ष्यभोज्यैर्भोजयेत्पायसादिभिः ।

अत्रापूज्यकन्यास्वरूपमुक्तं तत्रैव—

हीनाधिकाङ्गीं कुष्ठीं च विनाशिकुलसंभवाम् ।
ग्रन्थिस्फुटितसर्वाङ्गीं रक्तपूयव्रणाङ्किताम् ॥
जात्यन्धां केकरां काणीं कुरूपां तनुरोमशाम् ।
संत्यजेद्रोगिणीं कन्यां दासीगर्भसमुद्भवाम् ॥ इति ।

विनाशि संततिशून्यम् । ग्रन्थयः कूर्परजान्वाद्याः । तनुश्चासौ

रोमशा चेति कर्मधारयः । देवीगृहे दीपा अहोरात्रं प्रज्वलनीयाः ।
मत्स्यपुराणे—

गीतवादित्रनिर्घोषं देवस्याग्रे च कारयेत् ।
घण्टा भवेदशक्तस्य सर्ववाद्यमयी यतः ॥ इति ।

पूजा च प्रत्यहं त्रिकालं कार्या 'त्रिकालं शिवपूजक' इति पूर्वोक्त-देवीपुराणात् ।

बिल्वशाखापूजा ।

ज्योतिःशास्त्रे सप्तम्यां बिल्वशाखापूजोक्ता—

आश्विनस्य सिते पक्षे सुमुहूर्त्तेन सप्तमी ।
तस्यां च पत्रिकापूजा कर्त्तव्या न(वी?र)नायकैः ॥
प्रशस्तां सफलां बिल्वशाखामाहृत्य पूजयेत् ॥ इति ।

अथ बोधनप्रकारः । तत्कालो लिङ्गपुराणे—

कन्यायां कृष्णपक्षे तु पूजयित्वारभेद्दिवा ।
नवम्यां बोधयेद्देवीं महाविभवविस्तरैः ॥

भविष्ये—

षष्ठ्यां बिल्वतरौ बोधं सायंसन्ध्यासु कारयेत् ।

देवीपुराणे—

ज्येष्ठानक्षत्रयुक्तायां षष्ठ्यां बिल्वाभिमन्त्रणम् ॥

'बिल्ववृक्षायनमः' इति बिल्वतरुं संपूज्य बिल्ववृक्षे जयन्तीत्यादि च दुर्गे इहागच्छेत्यादिना दुर्गामावाह्य पूजयित्वा गीतवाद्यघोषपुरस्सरं देवीं विबोधयेत् । मन्त्रस्तु—

रावणस्य वधार्थाय रामस्यानुग्रहाय च ।
अकाले ब्रह्मणा बोधो देव्यास्त्वयि कृतः पुरा ॥
इषे मासि सिते पक्षे नवम्यां मार्गयोगतः ।
श्रीवृक्षे बोधयामि त्वां यावत्पूजां करोम्यहम् ॥ इति ।

षष्ठ्यां तु इष इत्यादेः स्थाने—

अहमप्याश्विने षष्ठ्यां सायाह्ने बोधयाम्यतः ॥ इति ।

ततो बिल्वतरोरामन्त्रणम् । मन्त्रस्तु—

मेरुमन्दारकैलासहिमवच्छिखरे गिरौ ।
जातः श्रीफलवृक्ष त्वमम्बिकायाः सदा प्रियः ॥
श्रीशैलशिखरे जातः श्रीफलः श्रीनिकेतन ।
नेतव्योऽसि मया वृक्ष पूज्यो दुर्गास्वरूपतः ॥

इति अपरेद्युः पुनरपि संपूज्य कृताञ्जलिः प्रसादयेत् ।

बिल्ववृक्ष महाभाग सर्वदा शंकरप्रिय ।
गृहीत्वा तव शाखां तु दुर्गापूजां करोम्यहम् ॥
शाखाछेदोद्भवं दुःखं न च कार्यं त्वया प्रभो ॥ इति ।

ततः फलयुतामपराजितादिग्गतामेकां शाखां छेदयेद्वानस्पत्येन मन्त्रेण । क्वचित्तु ' छिन्द्धि फट् ॐ हूं फट् स्वाहा ' इतिमन्त्रः । ततः शाखां गृह आनीय ' बिल्वशाखायैनमः ' इति पूजयित्वा बिल्वशाखायां मृन्मयप्रतिमायां वा देवीमावाहनपुरःसरं पूजयित्वा माषभक्तादि बलिं च दत्वा दोलादिना शाखां प्रतिमां च पूजागृहद्वारदेशे स्थापयित्वा माष-भक्तादिबलिं दत्वा पूजागृहस्थानि भूतानि ' भूतेभ्योनमः ' इति गन्धा-दिभिः संपूज्य—

भूताः प्रेताः पिशाचाश्च ये वसन्त्यत्र भूतले ।
ते गृह्णन्तु मया दत्तो बलिरेष प्रसाधितः ॥
पूजिता गन्धपुष्पाद्यैर्बलिभिस्तर्पितास्तथा ।
देशादस्माद्विनिःसृत्य पूजां पश्यन्तु मत्कृताम् ॥

भूतेभ्य एष माषभक्तबलिर्नमम इति बलिं दत्वा

अपसर्पन्तु ते भूता ये भूता भूमिपालकाः ॥
भूतानामविरोधेन पूजाकर्म करोम्यहम् ।

' फट् 'इति तान्यपसारयेत् ।

स्थितेषु तत्र भूतेषु नैवेद्यं मण्डलं तथा ।
विलुम्पन्ति महालुब्धा न च गृह्णन्ति देवताः ॥
तस्माद्यत्नेन कर्त्तव्यं भूतानामपसारणम् ।

इति कालिकापुराणात् । सर्षपादींश्च विकिरेत् । ततः पुनः शाखायां प्रतिमायां च देवीं संपूज्य गीतवाद्यादिपुरस्सरं पूजागृहं प्रवेश्य—

आरोपितासि दुर्गे त्वं मृन्मये श्रीफलेऽपि च ।
स्थिरा नितान्तं भूत्वा मे गृहे त्वं कामदा भव ।

इति पूजागृहे स्थापयेत् । ततः प्राणप्रतिष्ठां कृत्वा—

आवाहयाम्यहं देवीं मृन्मये श्रीफलेऽपि च ।
कैलासशिखराद्देवि विन्ध्याद्रेर्हिमपर्वतात् ॥
आगत्य बिल्वशाखायां चण्डिके कुरु सन्निधिम् ।

भगवति दुर्गे इहागच्छ इत्युभयोरावाह्य—

स्थापितासि मया देवि श्रीफले मृन्मयेऽपि च ।
आयुरारोग्यमैश्वर्यं देहि देवि नमोऽस्तु ते ॥

भगवति दुर्गे इह तिष्ठ इति स्थापयित्वा—

दुर्गे दुर्गस्वरूपासि सुरतेजोमहाबले ।
सदाऽऽनन्दकरे देवि प्रसीद मम सिद्धये ॥
एह्येहि भगवत्यम्ब शत्रुक्षयजयप्रदे ।
भक्तितः पूजयामि त्वां दुर्गे देवि सुरार्चिते ॥
पल्लवैश्च फलोपेतैः पुष्पैश्च सुमनोहरैः ।
पल्लवे संस्थिते देवि पूजये त्वां प्रसीद मे ॥
दुर्गे देवि इहागच्छ सान्निध्यमिह कल्पय ।
यज्ञभागान्गृहाण त्वं योगिनीकोटिभिः सह ॥

इति कृताञ्जलिः पठेत् । ततो जयन्तीत्यादिदुर्गायै नमः इदं पाद्यं पुष्पगन्धाक्षतकुङ्कुमदधिदूर्वाकुशतिलबिल्वपत्रसंहितजलेनार्घ्यमाचमनीयं पञ्चामृतस्नायीयं पुनराचमनीयं वस्त्रं पुनराचमनीयानुलेपनादि दत्वा ' ॐ दुर्गायै नमः ' इति पुष्पाञ्जलित्रयं दद्यात् । ततः—

अमृतोद्भवश्रीवृक्षोत्थं शङ्करस्य सदा प्रियम् ।
बिल्वपत्रं प्रयच्छामि पवित्रं ते सुरेश्वरि ॥ इतिबिल्वपत्रम् ,
ब्रह्मविष्णुशिवादीनां द्रोणपुष्पं सदाप्रियम् ।
तत्ते दुर्गे प्रयच्छामि सर्वकामार्थसिद्धये ॥

इति द्रोणपुष्पं च निवेद्य जयन्ती इत्यादिना पुष्पधूपदीपनैवेद्यपुनराचमनीयताम्बूलानि दत्वा पूजासाद्गुण्यार्थं दक्षिणां दत्वा स्तुतिभिः स्तुत्वा प्रणम्य बद्धाञ्जलिः प्रार्थयेत् ।

महिषघ्नि महामाये चामुण्डे मुण्डमालिनि ।
द्रव्यमारोग्यमैश्वर्यं देहि देवि नमोऽस्तु ते ॥

कुङ्कुमेन समालब्धे चन्दनेन विलेपिते ।
बिल्वपत्रकृतापीडे दुर्गेऽहं शरणङ्गतः ॥

'सर्व मङ्गलेति' 'रूपंदेहि' इति च श्लोकं पठेत् । बलिं च दद्यात् । एवमेव महाष्टम्यामपि देवीपूजनं विशेषतस्त्वर्द्धरात्रे जागरणं च राजा विजयरूपकामोऽर्द्धरात्रे विशेषपूजापूर्वकं बलिं दद्यात्,

तदर्धयामिनीशेषे विजयार्थं नृपोत्तमः ॥
पञ्चाब्दं लक्षणोपेतं गन्धधूपस्रगर्चितम् ।
विधिवत्कालि कालीति जप्त्वा खड्गेन घातयेत् ॥

इति देवीपुराणात् । पञ्चाब्दं महिषमजं वा । तत्रैव शस्त्रादिपूजनं च कुर्यात् । महानवम्यामेवमेव पूजा बलिदानं होमश्च होममन्त्रश्च जयन्ती इत्यादिः ।

अनेनैव तु मन्त्रेण जपहोमादि कारयेत् ।

इति देवीपुराणात् । होम द्रव्यं च तत्रैवोक्तम्—

पूजयेत्तिलहोमैश्च दधिक्षीरघृतादिभिः । इति ॥

केचित्तु 'प्रतिश्लोकं च जुहुयात्पायसं तिलसर्पिषा' इति रहस्यग्रन्थवचनात् सप्तशतीस्तवेन प्रतिश्लोकं तिलसर्पिर्मिश्रपायसेन होमं कुर्वन्ति ।

राज्ञा त्वश्वपीडाशान्तये ब्रह्मपुराणोक्ता रैवन्तपूजाऽपि कार्या । स च वडवारूपायामुखायां सूर्यादुत्पन्नो वाजिगणाधिपतिः । पूजामन्त्रः शालिहोत्रे—

नमो देवाधिदेवाय तुरङ्गबलचारिणे ।
सूर्यपुत्राय देवाय तुरङ्गसहिताय च ॥
तुरङ्गपरिषद्यस्य नृगजो परिधावति ।
साश्वमश्वाधिपं रक्ष सतूणं त्वां व्रजाम्यहम् ॥
मन्त्रेणानेन रैवन्तं पाद्याद्यैरर्चयेत्सुधीः ।

दशम्यां प्रातः पूजां विधाय विसर्जयेत्—

संपूज्य प्रेषणं कुर्याद्दशम्यां शाबरोत्सवैः ।

इति भविष्यपुराणात्,

ततः संप्रेषिता देवी दशम्यां शाबरोत्सवैः ।

---

१ षा इति पाठभेदः घ. २ शबरो इति पाठः घ.

इति कालिकापुराणाच्च । एवं पूजां विधाय प्रणम्य—

दुर्गां शिवां शान्तिकरीं ब्रह्माणीं ब्रह्मणः प्रियाम् ।
सर्वलोकप्रणेत्रीं च प्रणमामि सदा शिवाम् ॥
मङ्गलां शोभनां शुद्धां निष्कलां परमां कलाम् ।
विश्वेश्वरीं विश्वमातां चण्डिकां प्रणमाम्यहम् ॥
सर्वदेवमयीं देवीं सर्वरोगभयापहाम् ।
ब्रह्मेशविष्णुनमितां प्रणमामि सदा उमाम् ॥
विन्ध्यस्थां विन्ध्यनिलयां दिव्यस्थाननिवासिनीम् ।
योगिनीं योगमातां च चण्डिकां प्रणमाम्यहम् ॥
ईशानमातरं देवीमीश्वरीमीश्वरप्रियाम् ।
प्रणतोऽस्मि सदा दुर्गां संसारार्णवतारिणीम् ॥
य इदं पठति स्तोत्रं शृणुयाद्वापि यो नरः ।
स मुक्तः सर्वपापेभ्यो दुर्गया सह मोदते ॥

इत्यादिभिः स्तोत्रैः स्तुत्वा बद्धाञ्जलिर्महिषघ्नीत्यादिश्लोकचतुष्टयेन प्रार्थ्य—

विधिहीनं क्रियाहीनं भक्तिहीनं यदर्चितम् ।
पूर्णं भवतु तत्सर्वं त्वत्प्रसान्महेश्वरि ॥

इति प्रसाद्य 'क्षमस्व' इत्युक्त्वा एकपुष्पम् 'ॐ दुर्गायै नमः' इत्यैशान्यां निक्षिपन्विसृज्य—

उत्तिष्ठ देवि चण्डेशि शुभां पूजां प्रगृह्य च ।
कुरुष्व मम कल्याणमष्टाभिः शक्तिभिः सह ॥
गच्छ गच्छ परं स्थानं स्वस्थानं देवि चण्डिके ।
व्रज स्रोतोजले वृद्ध्यै तिष्ठ गेहे च भूतये ॥

इत्युत्थाप्य गीतवाद्यब्रह्मघोषपुरस्सरं स्रोतोजलसमीपं नीत्वा—

दुर्गे देवि जगन्मातः स्वस्थानं गच्छ पूजिते ।
संवत्सरे व्यतीते तु पुनरागमनाय वै ॥
इमां पूजां मया देवि यथाशक्त्या निवेदिताम् ।
रक्षणार्थं समादाय व्रज स्वस्थानमुत्तमम् ॥

इति प्रवाहयेत् । ततो देवीपूजास्थाने शान्तिकलशोदकेन ब्राह्मणै-

रभिषिक्तस्तेभ्यो दक्षिणां दत्वा ब्राह्मणान् भोजयित्वा बन्धुभिः सार्द्धं भुञ्जीत ।

अथ लोहाभिसारिकं कर्म ।

भविष्योत्तरे—

जयाभिलाषी नृपतिः प्रतिपत्प्रभृति क्रमात् ।
लोहाभिसारिकं कर्म कारयेद्यावदष्टमीम् ॥
प्रागुदक्प्रवणे देशे पताकाभिरलङ्कृतम् ।
मण्डपं कारयेद्दिव्यं नवसप्तकरं शुभम् ॥
आग्नेय्यां कारयेत्कुण्डं हस्तमात्रं सुशोभनम् ।
मेखलात्रयसंयुक्तं योन्याऽश्वत्थदलाभया ॥
राजचिह्नानि सर्वाणि शस्त्राण्यस्त्राणि यानि च ।
आनीय मण्डपे तानि सर्वाण्येवाधिवासयेत् ॥
ततस्तु ब्राह्मणः स्नातः शुक्लाम्बरधरः शुचिः ।
ॐकारपूर्वकैर्मन्त्रैस्तल्लिङ्गैर्जुहुयाद्घृतम् ॥
शस्त्रास्त्रमन्त्रैर्होतव्यं पायसं घृतसंयुतम् ।
हुतशेषं तुरङ्गाणां गजानामुपहारयेत् ॥
बद्धप्रतिसरान्पश्च गजाश्वान्समलङ्कृतान् ।
भ्रामयेन्नगरे नित्यं नन्दिघोषपुरःसरान् ॥
प्रत्यहं नृपतिः स्नात्वा संपूज्य पितृदेवताः ।
पूजयेद्राजचिह्नानि फलमाल्यविलेपनैः ॥
हुतशेषं प्रदातव्यमौपनायनिकेऽनले ।
लोहनामाऽभवत्पूर्वमसुरः सुमहाबलः ॥
स देवैः समरे क्रुद्धैर्बहुधा शकलीकृतः ।
तदङ्गसंभवं सर्वं लोहं यद्दृश्यते क्षितौ ॥
तस्याभिहरणाद्राज्ञो विजयः समुदाहृतः । इति ॥

पूजामन्त्रश्च तत्रैव—

---

१ जने पाठः । घ. ग.

छत्रस्य— यथाऽम्बुदश्छादयति शिवायेमां वसुन्धराम् ।
तथा छादय राजानं विजयारोग्यवृद्धये ॥

चामरस्य—

शशाङ्ककरसङ्काश क्षीरडिण्डीरपाण्डुर ।
प्रोत्सारयाशु दुरितं चामराऽमरभूषण ॥

ध्वजस्य—शक्रकेतो महावीर्य सुपर्णस्त्वय्युपाश्रितः ।
पतत्रिराड्वैनतेयस्तथा नारायणध्वजः ॥
काश्यपेयोऽमृताहर्ता नागारिर्बलवाहनः ।
अप्रमेयो दुराधर्षो रणे देवारिसूदनः ॥
गरुत्मान्मारुतगतिस्त्वयि सन्निहितः स्थितः ।
शस्त्रवर्मायुधान्योधान् रक्ष त्वं च रिपून्दह ॥

पताकायाः—

हुतभुग्वसवो रुद्रा वायुः सोमो महर्षयः ।
नागकिन्नरगन्धर्वा यक्षभूतगणा ग्रहाः ॥
प्रमथाश्च सहाऽऽदित्यैर्भूतेशा मातृभिः सह ।
शक्रसेनापतिः स्कन्दो वरुणश्चाश्रितास्त्वयि ॥
प्रदहन्तु रिपून्सर्वान् राजा विजयमृच्छतु ।
यानि प्रयुक्तान्यरिभिर्दूषणानि समंततः ॥
एतानि सर्वशत्रूणां हतानि तव तेजसा ।
कालनेमिवधे यद्वद्यद्वत्त्रिपुरघातने ॥
हिरण्यकशिपोर्युद्धे युद्धे देवासुरे तथा ।
शोभितासि तथैवाद्य शोभस्व समयं स्मर ॥
नीलाम्बरामिमां दृष्ट्वा नश्यन्त्वाऽशु ममारयः ।

दुन्दुभेः—दुन्दुभे त्वं सपत्नानां घोषाद्धृदयकम्पनः ।
भव भूमिपसैन्यानां तथा त्वं जयवर्द्धनः ॥
यथा जीमूतघोषेण प्रहृष्यन्ति सुबर्हिणः ।[१]
तथाऽस्तु तव शब्देन हर्षोऽस्माकं जयावहः ॥

शङ्खस्य—पुण्यस्त्वं शङ्ख पुण्यानां मङ्गलानां च मङ्गलम् ।
विष्णुना विधृतो नित्यमतः शान्तिं प्रयच्छ मे ॥

---

१ त्वं धृतो पाठः ।

शिबिकान्दोलिकयोः—

महेन्द्रनिर्मिते दिव्ये देवराजादिसेविते ।
शिबिके पाहि मां नित्यं सदा त्वं सन्निधौ भव ॥

सिंहासनस्य—

विजयो जयदो जेता रिपुघाती शुभङ्करः ।
दुःखहा धर्मदः शान्तः सर्वारिष्टविनाशनः ॥
एते वै सन्निधौ यस्मात्तव सिंहा महाबलाः ।
तेन सिंहासनेति त्वं वेदैर्मन्त्रैश्च गीयसे ॥
त्वयि स्थितः शिवः साक्षात्त्वयि शक्रः सुरेश्वरः ।
त्वयि स्थितो हरिर्देवस्त्वदर्थं तप्यते तपः ॥
नमस्ते सर्वतोभद्र भद्रदो भव भूपतेः ।
त्रैलोक्यं जय सर्वत्र सिंहासन नमोऽस्तु ते ॥

अश्वस्य—गन्धर्वकुलजातस्त्वं मा भूयाः कुलदूषकः ।
ब्रह्मणः सत्यवाक्येन सोमस्य वरुणस्य च ॥
तेजसा चैव सूर्यस्य मुनीनां तपसा सदा ।
रुद्रस्य ब्रह्मचर्येण पवनस्य बलेन च ॥
प्रभावाच्च हुताशस्य वर्द्धस्व त्वं तुरङ्गम ।
स्मर त्वं राजपुत्रोऽसि कौस्तुभं च मणिं स्मर ॥
सुरासुरैर्मथ्यमानक्षीरोदादमृतादिभिः ।
जात उच्चैःश्रवाः पूर्वं तेन जातोऽसि तत्स्मर ॥
यां गतिं ब्रह्महा गच्छेन्मातृहा पितृहा तथा ।
भूम्यर्थेऽनृतवादी च क्षत्रियश्च पराङ्मुखः ॥
सूर्याचन्द्रमसौ वायुर्यावत्पश्यन्ति दुष्कृतम् ।
व्रजाश्च तां गतिं क्षिप्रं तच्च पापं भवेत्तव ॥
विकृतिं यदि गच्छेथा युद्धाध्वनि तुरङ्गम ।
रिपून्विजित्य समरे सह भर्त्रा सुखी भव ॥

गजस्य— कुमुदैरावणः पद्मः पुष्पदन्तोऽथ वामनः ।
सुप्रतीकोऽञ्जनो नील एतेऽष्टौ देवयोनयः ॥
तेषां पुत्राश्च पौत्राश्च वनान्यष्टौ समाश्रिताः ।
मद्रो[1] भद्रो गजश्चैव राजसङ्कीर्ण एव च ॥

---

१ मन्दो पाठः । घ. ङ.

वने वने प्रसूतास्ते यूथानि सुमहान्ति च ।
पान्तु त्वां वसवो रुद्रा आदित्याः समरुद्गणाः ॥
भर्त्तारं रक्ष नागेन्द्र स्वामी च प्रतिपाल्यताम् ।
अवाप्नुहि जयं युद्धे गमने स्वस्ति नो व्रज ॥

कनकदण्डस्य—

प्रोत्सारणाय दुष्टानां साधुसंग्रहणाय च ।
ब्रह्मणा निर्मितश्चासि व्यवहारस्य सिद्धये ॥
यशो देहि सुखं देहि जयदो भव भूपतेः ।
ताडयाशु रिपून्सर्वान् हेमदण्ड नमोऽस्तु ते ॥

छुरिकायाः—

सर्वायुधानां प्रथमं निर्मितासि पिनाकिना ।
शूलायुधाद्विनिष्कृष्य कृत्वा मुष्टिग्रहं शुभम् ॥
चण्डिकायै प्रदत्तासि सर्वदुष्टनिबर्हिणि ।
तया विस्तारिता चासि देवानां प्रतिपादिता ॥
सर्वसत्वाङ्गभूतासि सर्वाशुभनिबर्हिणी ।
क्षुरिके रक्ष मां नित्यं शान्तिं यच्छ नमोऽस्तु ते ॥

कट्टारकस्य—

रक्षाङ्गानि गजांत्रक्ष रक्ष वाजिधनानि च ।
मम देहं सदा रक्ष कट्टारक नमोऽस्तु ते ॥

धनुषः— सर्वायुधमहामात्र सर्वदेवारिसूदन ।
चाप मां समरे रक्ष साकं सायकसत्तमैः ॥
धृतं कृष्णेन रक्षार्थे संहारार्थे हरेण च ।
त्रयीमूर्त्तिगतं तेजो धनुरत्नं नमाम्यहम् ॥

वर्मणः— शर्मप्रदस्त्वं समरे वर्म सैन्ये यशोऽद्य मे ।
रक्ष मां रक्षणीयोऽहं तापनेय नमोऽस्तु ते ॥

कुन्तस्य—प्रास तापय शत्रूंस्त्वमनया लोकमायया ।
गृहाण जीवितं तेषां मम सैन्यं च रक्षये ॥

खड्गस्य— असिर्विशसनः खड्गस्तीक्ष्णधारो दुरासदः ।
श्रीगर्भो विजयश्चैव धर्मधारस्तथैव च ॥
इत्यष्टौ तव नामानि स्वयमुक्तानि वेधसा ।

नक्षत्रं कृत्तिका तुभ्यं गुरुर्देवो महेश्वरः ॥
हिरण्यं च शरीरं ते धाता देवो जनार्दनः ।
पिता पितामहो देवस्त्वं मां पालय सर्वदा ॥
इयं येन धृता क्षोणी हतश्च महिषासुरः ।
तीक्ष्णधाराय शुद्धाय तस्मै खड्गाय ते नमः ॥
लोहाभिसारिकं कर्म कृत्वैवं मन्त्रपूर्वकम् ।
जयं प्राप्नोति नृपतिः सर्वान्कामान्समश्नुते ॥

इतिलोहाभिसारिकम्

अत्र सूतके विशेषो विश्वरूपनिबन्धे—

आश्विने शुक्लपक्षे तु प्रारब्धे नवरात्रके ॥
शावाशौचे समुत्पन्ने क्रिया कार्या कथं बुधैः ।
देवीपूजा च कर्त्तव्या पशुयज्ञविधानतः ॥
सूतके पूजनं प्रोक्तं दानं चैव विशेषतः ।
देवीमुद्दिश्य कर्त्तव्यं तत्र दोषो न विद्यते । इति ॥
सूतके पारणं कुर्यान्नवम्यां होमपूर्वकम् ।
तदन्ते भोजयेद्विप्रान्दानं दद्याच्च शक्तितः ॥

तदन्ते सूतकान्त इत्यर्थः । तथा—

मलमासे न कर्त्तव्यं नवदुर्गोत्सवव्रतम् ।
अस्तंगते गुरौ शुक्रे सिंहस्थे विबुधाधिपे ॥
देवीपूजनमुद्दिष्टं स्थविरे बालके तथा ।
आद्यारम्भे विरामः स्याद्द्वितीयादौ न चिन्तयेत् । इति ॥

तथा स्त्रीणां विशेष उक्तो गारुडे—

गन्धालङ्कारताम्बूलपुष्पमालानुलेपनम् ।
उपवासे न दुष्यन्ति दन्तधावनमञ्जनम् ॥

इति दिक् । इति नवरात्रकृत्यम् ।

कार्तिकशुक्लप्रतिपन्निर्णयः ।

कार्तिकशुक्लप्रतिपत्पूर्वविद्धा ग्राह्या,

पूर्वविद्धा प्रकर्त्तव्या शिवरात्रिर्बलेर्दिनम् ।

इति वृद्धयमोक्तेः । माधवोपि—

बल्युत्सवं च पूर्वेद्युरुपवासवदाचरेत् ।

इति। पूर्वविद्धायामित्यर्थः इह तैलाभ्यङ्ग आवश्यकः। तथा च
वृद्धवसिष्ठः—

वत्सरादौ वसन्तादौ बलिराज्ये तथैव च।
तैलाभ्यङ्गमकुर्वाणो नरकं प्रतिपद्यते॥ इति॥

अत्र विशेषः स्कान्दे—

मन्त्रः— प्रातर्गोवर्द्धनः पूज्यो द्यूतं चापि समाचरेत्।
पूजनीयास्तथा गावस्त्याज्ये वाहनदोहने॥
गोवर्द्धन धराधार गोकुलत्राणकारक।
बहुबाहुकृतच्छाय गवां कोटिप्रदो भव॥

अथ गोपूजनमन्त्रः—

या लक्ष्मीर्लोकपालानां धेनुरूपेण संस्थिता।
घृतं वहति यज्ञार्थे मम पापं व्यपोहतु॥
अग्रतः सन्तु मे गावो गावो मे सन्तु पृष्ठतः।
गावो मे हृदये सन्तु गवां मध्ये वसाम्यहम्॥ इति।
ततोऽपराह्णसमये पूर्वस्यां दिशि भारत।
मार्गपालीं प्रबध्नीयात्तुङ्गस्तम्भेऽथ पादपे॥
कुशकाशमयीं दिव्यां लम्बकैर्बहुभिर्मुने।

मन्त्रः— मार्गपालि नमस्तेऽस्तु सर्वलोकसुखप्रदे॥
विधेयैः पुत्रदाराद्यैः पुनरेहि व्रतस्य मे।
मार्गपालीतलेनेत्थं यान्ति गावो गजा वृषाः॥
राजानो राजपुत्राश्च ब्राह्मणाः शूद्रजातयः।
मार्गपालीं समुल्लंघ्य नीरुजः स्युः सुखान्विताः॥ इति।

भविष्ये—

कृत्वैतत्सर्वमेवेह रात्रौ दैत्यपतेर्बलेः।
पूजां कुर्यान्नृपः साक्षाद्भूमौ मण्डलके शुभे॥
बलिमालिख्य दैत्येन्द्रं वर्णकैः पञ्चरङ्गकैः।
गृहस्य मध्यशालायां विशालायां ततोऽर्चयेत्॥
लोकश्चापि गृहस्यान्तः शय्यायां शुक्लतण्डुलैः।
संस्थाप्य बलिराजानं फलैः पुष्पैश्च पूजयेत्॥

मन्त्रस्तु—बलिराज नमस्तुभ्यं देवदानववन्दित।

इन्द्रशत्रोऽमरारातें विष्णुसान्निध्यदो भव ॥ इति ॥

तत्रैव ब्राह्मे—

तस्माद्द्यूतं प्रकर्त्तव्यं प्रभाते तत्र मानवैः ।
तस्मिन्द्यूते जयो यस्य तस्य संवत्सरं जयः ॥
पराजयो विरुद्धश्च लाभनाशकरो भवेत् ।
दयिताभिश्च सहितैर्नेया सा च भवेन्निशा ॥ इति ।

इति प्रतिपन्निर्णयः ।

अथ द्वितीया ।

सा तु परैव । युग्माग्नीति वचनात्,
एकादश्यष्टमी षष्ठी द्वितीया च चतुर्दशी ।
त्रयोदशी अमावास्या उपोष्याः स्युः परान्विताः ॥

इति विष्णुधर्मोत्तराच्च । अत्र विशेषः स्कान्दे—

आषाढस्य सिते पक्षे द्वितीया पुष्यसंयुता ।
तस्यां रथे समारोप्य रामं वै भद्रया सह ॥
यात्रोत्सवं प्रवर्त्याथ प्रीणयेत द्विजान्बहून् । भद्रा सुभद्रा ।
श्रावणकृष्णद्वितीया बृहत्तपोच्यते ।

सा पूर्वविद्धा ग्राह्या । तदाह संवर्त्तः—

कृष्णाष्टमी बृहत्तपा सावित्री वटपैतृकी ।
कामत्रयोदशी रम्भा उपोष्याः पूर्वसंयुताः ॥ इति ।

उपोष्याः सेवनीया इति ।

कार्त्तिकशुक्लद्वितीया यमद्वितीयोच्यते । साऽपराह्णव्यापिनी ग्राह्या । कर्मकालवाक्यात् । तदुक्तं स्कान्दे—

ऊर्जे शुक्लद्वितीयायामपराह्णेऽर्चयेद्यमम् ।
स्नानं कृत्वा भानुजायां यमलोकं न पश्यति ॥
ऊर्जे शुक्लद्वितीयायां पूजितस्तर्पितो यमः ।
वेष्टितः किङ्करैर्हृष्टैस्तस्मै यच्छति वाञ्छितम् ॥

भविष्योत्तरेऽपि—

कार्त्तिके शुक्लपक्षस्य द्वितीयायां युधिष्ठिर ।

---

१ महाशत्र पाठः घ. ङ. २ 'तत्रैव' इति पाठः क्वाचित्को ।

यमो यमुनया पूर्वं भोजितः स्वगृहेऽर्चितः ॥
अतो यमद्वितीयेयं त्रिषु लोकेषु विश्रुता ।
अस्यां निजगृहे विप्र न भोक्तव्यं ततो नरैः ॥
स्नेहेन भगिनीहस्ताद्भोक्तव्यं पुष्टिवर्द्धनम् ।
दानानि च प्रदेयानि भगिनीभ्यो विशेषतः ॥
स्वर्णालङ्कारवस्त्रान्नपूजासंस्कारभोजनैः ।
सर्वा भगिन्यः संपूज्या अभावे प्रतिपन्नकाः ॥

अभावे भगिनीप्रतिपन्नकास्तत्स्थानीयाः ।
ब्रह्माण्डेऽपि—

या तु भोजयते नारी भ्रातरं युग्मके तिथौ ।
अर्चयेच्चापि ताम्बूलैर्न सा वैधव्यमाप्नुयात् ।
भ्रातुरायुःक्षयो राजन्न भवेत्तत्र कर्हिचित् ॥ इति ।

इति द्वितीयानिर्णयः ।

अथ तृतीयासामान्यनिर्णयः ।

सा तु परैव । तदुक्तं विष्णुधर्मोत्तरे—

एकादश्यष्टमी षष्ठी पौर्णमासी चतुर्दशी ।
अमावास्या तृतीया च ता उपोष्याः परान्विताः ॥

रम्भाव्रते तु पूर्वैव । तदुक्तं ब्रह्मवैवर्त्ते—

रम्भाख्यां वर्जयित्वैकां तृतीयां द्विजसत्तम ।
अन्येषु शुभकार्येषु गणयुक्ता प्रशस्यते ॥ इति ।

गणश्चतुर्थी । रामदोलोत्सवश्चैत्रशुक्लतृतीयायाम् । दोलोत्सवो रामार्चनचन्द्रिकायाम् । गारुडे—

मधौ शुक्लतृतीयायां जानकीरमणं प्रभुम् ।
राजोपचारैः संपूज्य मासमान्दोलयेत्कलौ ॥
दक्षिणाभिमुखं देवं दोलमानं सुरेश्वरम् ।
सुपूजितं सकृद्दृष्ट्वा सर्वपापैः प्रमुच्यते ॥
चैत्रे मासि सिते पक्षे तृतीयायां रमापतिम् ।
दोलारूढं समभ्यर्च्य मासमान्दोलयेत्कलौ ॥
दोलारूढं प्रपश्यन्ति ये कृष्णं मधुमाधवे ।
अपराधसहस्रैस्तैर्मुक्तास्ते नात्र संशयः ॥

दोलारूढस्य देवस्य येऽग्रे कुर्वन्ति जागरम् ।
सर्वपुण्यफलावाप्तिर्निमिषे निमिषे भवेत् ॥

सैव गौरीतृतीया इयमेव च गौरीतृतीयोच्यते । तत्र मुहूर्त्तमात्रा परयुता ग्राह्या । वचनन्त्वग्रे वक्ष्यते । मदनरत्ने स्कान्दे विशेषः—

तृतीयायां यजेद्देवीं शङ्करेण समन्विताम् ।
कुङ्कुमागरुकर्पूरमणिवस्त्रसुगन्धकैः ॥
स्रग्गन्धधूपदीपैश्च दमनेन विशेषतः ।
आन्दोलयेत्ततो वत्स शिवोमातुष्टये सदा ॥ इति ।

त्रिलोचनयात्रा ।

वैशाखशुक्लतृतीयायां त्रिलोचनयात्रोक्ता काशीखण्डे—

राधशुक्लतृतीयायां स्नात्वा पैपिल्लके ह्रदे ।
संतर्पयेत्पितॄन् देवांस्त्रिलोचनमथार्चयेत् ॥ इति ।

सैव अक्षयतृतीया । इयमेवाक्षयतृतीयोच्यते । तदुक्तं भविष्ये—

यात्वेषा कुरु शार्दूल वैशाखे तु महातिथिः ।
तृतीया साऽक्षया लोके गीर्वाणैरभिवन्दिता ॥
यत्किञ्चिद्दीयते दानं स्वल्पं वा यदि वा बहु ।
तत्सर्वमक्षयं यस्मात्तेनेयमक्षया स्मृता ॥ इति ।

इयमेव युगादिः । सा पूर्वाह्णव्यापिनी ग्राह्या । तदुक्तं नारदीये—

द्वे शुक्ले द्वे तथा कृष्णे युगादी कवयो विदुः ।
शुक्ले पूर्वाह्णिके ग्राह्ये कृष्णे चैवापराह्णिके ॥ इति ।

अत्र विशेषो गोविन्दार्णवे देवीपुराणे—

तृतीयायां तु वैशाखे रोहिण्यृक्षे प्रपूज्य च ।
उदकुम्भप्रदानेन शिवलोके महीयते ॥

कलशदानमन्त्रस्तु—

एष धर्मघटो दत्तो ब्रह्मविष्णुशिवात्मकः ।
अस्य प्रदानात्तृप्यन्तु पितरोऽपि पितामहाः ॥
गन्धोदकतिलैर्मिश्रं सान्नं कुम्भं सदक्षिणम् ।
पितृभ्यः संप्रदास्यामि अक्षय्यमुपतिष्ठतु ॥ इति ।

---

१ हरितालिकानिर्णये । २ "पैलिप्पिले" पाठः । ङ.

एतदसंभवे तिलतर्पणं वा कार्यमित्युक्तं तत्रैव विष्णुपुराणे—

पानीयमप्यत्र तिलैर्विमिश्रं दद्यात्पितृभ्यः प्रयतो मनुष्यः।
श्राद्धं कृतं तेन समाः सहस्रं रहस्यमेतन्मुनयो वदन्ति॥ इति।

तथा चात्र मलमासे सति विशेषश्चन्द्रिकायाम्—

यौगादिकं मासिकं च श्राद्धं चापरपक्षिकम्।
मन्वादिकं तैर्थिकं च कुर्यान्मासद्वयेऽपि च॥

अपरपक्षो नाम कृष्णपक्षोऽत्र गृह्यते। मलमासे महालयस्य निषेधात्॥

ज्येष्ठशुक्लतृतीया रम्भातृतीयोच्यते। सा पूर्वा ग्राह्या। तदुक्तं माधवीये स्कान्दे—

बृहत्तपा तथा रम्भा सावित्री वटपैतृकी।
कृष्णाष्टमी च भूता च कर्तव्या संमुखी तिथिः॥ इति।

सम्मुखी नाम सायाह्नव्यापिनीत्यर्थः। ब्रह्मवैवर्तेऽपि—

रम्भाख्यां वर्जयित्वैकां तृतीयां द्विजसत्तम।
अन्येषु सर्वकार्येषु गणयुक्ता प्रशस्यते॥ इति।

गणश्चतुर्थी।

भाद्रकृष्णतृतीयायां विशालाक्षीयात्रोक्ता काशीखण्डे—

भाद्रकृष्णतृतीयायामुपवासपरैर्नृभिः।
कृत्वा जागरणं रात्रौ विशालाक्षीसमीपतः॥ इति।

अत्र रात्रिव्यापिनी ग्राह्या। रात्रौ जागरणविधानात्।

भाद्रशुक्लतृतीया हरितालिकोच्यते। सा मुहूर्तमात्राऽपि परयुता ग्राह्या। तदाह वामनः—

मुहूर्तमात्रसत्त्वेऽपि दिने गौरीव्रतं परे।
शुद्धाधिकायामप्येवं गणयोगप्रशंसनात्॥ इति।

चतुर्थीयुक्तायां तु फलाधिक्यमाह माधवीये आपस्तम्बः—

चतुर्थीसहिता या तु सा तृतीया फलप्रदा।
अवैधव्यकरा स्त्रीणां पुत्रपौत्रप्रवर्द्धिनी॥

द्वितीयायोगे प्रत्यवायमप्याह—स एव।

द्वितीयाशेषसंयुक्तां या करोति विमोहिता।
सा वैधव्यमवाप्नोति प्रवदन्ति मनीषिणः॥ इति।

आश्विनकृष्णतृतीयायां ललितादेव्या यात्रोक्ता काशीखण्डे—

इषे कृष्णतृतीयायां ललितां प्रतिपूज्य वै ।
नारी वा पुरुषो वापि स लभेद्वाञ्छितं फलम् ॥ इति ।

इति तृतीयानिर्णयः ।

अथ चतुर्थी ।

सा परविद्धा ग्राह्या । 'युगभूतानाम्' इति युग्मवाक्यात् । माधवीये वृद्धवसिष्ठोऽपि—

एकादशी तथा षष्ठी अमावास्या चतुर्थिका ।
उपोष्याः परसंयुक्ताः पराः पूर्वेण संयुताः ॥ इति ।

सर्वासु चतुर्थीषु ढुण्ढियात्रोक्ता काशीखण्डे—

कुर्यात्प्रतिचतुर्थीह यात्रां विघ्नेशितुः सदा ।
ब्राह्मणेभ्यस्तदुद्देशाद्देया वै मोदका मुदा ॥ इति ।

लैङ्गे—

अङ्गारकचतुर्थ्यां ये स्नात्वोत्तरवहाम्भसि ।
अभ्यर्च्याऽङ्गारकेशानं नमस्यन्ति नरोत्तमाः ॥
न तेषां ग्रहपीडा च कदाचित्कापि जायते ॥ इति ।

नागचतुर्थी तु मध्याह्नव्यापिनी परविद्धा ग्राह्या । तदाह गोविन्दार्णवे देवलः—

युगं मध्यन्दिने यत्र तत्रोपोष्य फणीश्वरान् ।
क्षीरेणाप्याय्य पञ्चम्यां पूजयेत्प्रयतो नरः ॥ इति ।

युगं चतुर्थी । विनायकव्रते तृतीयायुतैव । तदुक्तं तत्रैव—

चतुर्थी तु तृतीयायां महापुण्यफलप्रदा ।
कर्तव्या व्रतिभिर्वत्स गणनाथसुतोषिणी ॥

श्रावणकृष्णचतुर्थी सङ्कष्टचतुर्थीत्युच्यते सा चन्द्रोदयव्यापिनी ग्राह्या । तदुक्तं स्कान्दे—

श्रावणे बहुले पक्षे चतुर्थ्यां च विधूदये ।
तस्मिन्दिने व्रतं कार्यं सङ्कटाख्यं सुरेश्वरि ॥ इति ।

दिनद्वये चन्द्रोदये सत्वेऽसत्वे वा पूर्वैव । 'मातृविद्धो गणेश्वरः' इति वचनात् । भाद्रकृष्णचतुर्थी बहुलाव्रतम् । तत्र पूर्वैव । तदुक्तं गोविन्दार्णवे पुराणसमुच्चये—

गौर्याश्चतुर्थी वटधेनुपूजा दुर्गार्चनं दुर्भरहोलिके च ।
वत्सस्य पूजा शिवरात्रिरेताः परान्विता घ्नन्ति नृपं सराष्ट्रम् ॥ इति ।

गणेशचतुर्थी वरदचतुर्थीत्युच्यते । सा मध्याह्नव्यापिनी पूर्वविद्धा ग्राह्या । पूर्वदिने मध्याह्नव्याप्त्यभावे परैव । तदुक्तं माधवीये बृहस्पतिना ।

चतुर्थी गणनाथस्य मातृविद्धा प्रशस्यते ।
मध्याह्नव्यापिनी चेत्स्यात्परतश्चेत्परेऽहनि ॥ इति ।

स्मृत्यन्तरेपि—

मातृविद्धा प्रशस्ता स्याच्चतुर्थी गणनायके ।
मध्याह्ने परतश्चेत्स्यान्नागविद्धा प्रशस्यते ॥ इति ।

सिद्धिविनायकव्रतेऽपि मध्याह्नव्यापिनी ग्राह्या ।

'प्रातःशुक्लतिलैः स्नात्वा मध्याह्ने पूजयेन्नृप' इति पूजायास्तत्कालत्वात् । उभयदिने मध्याह्नव्याप्त्यभावे व्याप्तिसत्वे वा पूर्वैव । 'मातृविद्धा प्रशस्यते' इति वाक्यात् । इयं च रविभौमाभ्यां युक्ता महतीत्युच्यते । तदुक्तं गोविन्दार्णवे वाराहे—

भाद्रे शुक्लचतुर्थी या भौमेनार्केण वा युता ।
महती साऽत्र विघ्नेशमर्चित्वेष्टं लभेन्नरः ॥ इति ।

अस्यां चन्द्रं न पश्येत् । तदाह तत्रैव मार्कण्डेयः—

भाद्रे मासि सिते पक्षे चतुर्थी स्वातियोगिनी ।
मिथ्याभिशापं कुरुते दृष्टचन्द्रा न संशयः ॥

पराशरोऽपि—

कन्यादित्ये चतुर्थ्यां तु शुक्ले चन्द्रस्य दर्शनम् ।
मिथ्याभिदूषणं कुर्याद्रात्रौ पश्येन्न तं सदा ॥

अत्र रात्रिग्रहणाद्दिवादर्शने न दोष इति । रात्रावेव चन्द्रप्राधान्यात् । तद्दोषशान्त्यर्थं तत्रैव पुराणान्तरम् ।

ततश्चतुर्थ्यां रात्र्यां यः प्रमादाद्वीक्ष्य मानवः ।
पठेत्पौराणिकं वाक्यं प्राङ्मुखो वाप्युदङ्मुखः ॥
सिंहः प्रसेनमवधीत्सिंहो जाम्बवता हतः ।
सुकुमारक मारोदीस्तव ह्येष स्यमन्तकः ॥ इति ।

वरदचतुर्थीत्वं चास्या विवृतं तत्रैव—

सुरासुरानाप्नुवतो गणेशं भक्तिपूर्वकम् ।

तस्यां प्रादाद्वरं यस्मात्तस्माद्वरचतुर्थिका ॥ इति ।
माघशुक्लचतुर्थी तिलचतुर्थी । तदुक्तं काशीखण्डे—

माघशुक्लचतुर्थ्यां तु नक्तव्रतपरायणाः ।
ये त्वां ढुण्ढेऽर्चयिष्यन्ति तेऽर्च्याः स्युरसुरद्रुहाम् ॥
विधाय वार्षिकीं यात्रां चतुर्थीं प्राप्य तापसीम् ।
शुक्लांस्तिलान्गुडैर्बद्ध्वा प्राश्नीयाल्लड्डुकान्व्रती ॥

तापसीं माघीम् । अत्र नक्तग्रहणात्प्रदोषव्यापिनी ग्राह्येति दिक् ।

इति चतुर्थी निर्णयः ।

अथ पञ्चमी ।

सा चतुर्थीयुतैव ग्राह्या । 'युग्मभूतानाम्' इति युग्मवचनात् ।

पञ्चमी सप्तमी चैव दशमी च त्रयोदशी ।
प्रतिपन्नवमी चैव कर्तव्या संमुखी तिथिः ॥

इति पैठीनसिवचनात् । संमुखी सायाह्नव्यापिनी । ब्रह्मवैवर्तेऽपि—

प्रतिपत्पञ्चमी भूतसावित्री (?) वटपूर्णिमा ।
नवमी दशमी चैव नोपोष्याः परसंयुताः ॥ इति ।

माधवीये स्कान्देऽपि—

पञ्चमी च तथा कार्या चतुर्थीसंयुता विभो ॥ इति ।

मात्स्ये—

ब्रह्मणो यो दिनस्यादिः कल्पादिः संप्रकीर्तितः ।
वैशाखस्य तृतीया या या कृष्णा फाल्गुनस्य च ॥
पञ्चमी चैत्रमासस्य तथैवान्त्या तथापरा ।
शुक्ला त्रयोदशी माघे कार्तिकस्य तु सप्तमी ॥
नवमी मार्गशीर्षस्य सप्तैताः संस्मराम्यहम् ।
कल्पानामादयो ह्येता दत्तस्याऽक्षयकारकाः ॥

अत्रैताः शुक्लाः पौर्वाह्णिक्यः कृष्णा आपराह्णिक्य इति युगादिवद्व्यवस्था ।

शुक्लपक्षे तिथिर्ग्राह्या यस्यामभ्युदितो रविः ।
कृष्णपक्षे तिथिर्ग्राह्या यस्यामस्तमितो रविः ॥ इतिवाक्यात् ।

अत्र पक्षविशेषानुपादाने शुक्लो ज्ञेयः । श्रावणशुक्लपञ्चमी नागपञ्चमीत्युच्यते । सा परविद्धा ग्राह्या । तदुक्तं चमत्कारचिन्तामणौ—

पञ्चमी नागपूजायां कार्या षष्ठीसमन्विता ।
तस्यां तु तुषिता नागा इतरा सचतुर्थिका । इति ॥
प्रतापमार्तण्डे स्मृत्यन्तरेऽपि—
श्रावणे पञ्चमी शुक्ला संप्रोक्ता नागपञ्चमी ।
तां परित्यज्य पञ्चम्यश्चतुर्थीसहिता हिताः ॥ इति ॥
अत्र कर्तव्यमुक्तं काशीखण्डे—
यः स्नातो नागपञ्चम्यां कुण्डे वासुकिसंज्ञके ।
न तस्य विषसंसर्गो भवेत्सर्पसमुद्भवः ॥
कर्तव्या नागपञ्चम्यां यात्रा वर्षासु तत्र वै ।
नागाः प्रसन्ना जायन्ते कुले तस्यापि सर्वदा ॥ इति ।
गोविन्दार्णवे भविष्येऽपि—
श्रावणे मासि पञ्चम्यां शुक्लपक्षे नराधिप ।
द्वारस्योभयतो लेख्या गोमयेन विषोल्बणाः ॥
पूजयेद्विधिवत्क्षीरदधिदूर्वाङ्कुरैः कुशैः ।
गन्धपुष्पोपहारैश्च ब्राह्मणानां च तर्पणैः ॥
ये तस्यां पूजयन्तीह नागान्भक्तिपुरस्सराः ।
न तेषां सर्पतो वीर भयं भवति कुत्रचित् ॥ इति ।
भाद्रशुक्लपञ्चमी ऋषिपञ्चमीत्युच्यते ॥ तदुक्तं ब्राह्मे—
नभस्ये शुक्लपक्षे तु यदा भवति पञ्चमी ।
नद्यादिके तदा स्नात्वा कृत्वा नियममेव च ॥
ब्राह्मणी क्षत्रिया वैश्या शूद्रा वाऽपि वरानने ।
कृत्वा नैमित्तिकं कर्म गत्वा निजगृहं पुनः ॥
वेदिं सम्यक् प्रकुर्वीत गोमयेनोपलिप्य ताम् ।
रङ्गवल्लिसमायुक्तां नानापुष्पोपशोभिताम् ॥
तत्र सप्तऋषीन्दिव्यान्भक्तियुक्ता प्रपूजयेत् ॥ इति ।
तत्र पञ्चमी पूर्वयुता ग्राह्येति मदनरत्ने । युग्मवाक्यात् ॥ माधवीयेऽप्येवम् । आश्विनस्य शुक्लपञ्चम्यामुपाङ्गललिताव्रतम् । तद्यपि महानिबन्धेष्वनुक्तं तथाप्यतिप्रचारत्वान्निर्णीयते । तत्र पञ्चमी मध्याह्नव्यापिनी ग्राह्या, तत्रैव पूजाविधानात् । माधवीये स्मृत्यन्तरेऽपि—
पूजाव्रतेषु सर्वेषु मध्याह्नव्यापिनी तिथिः ॥ इति ।
मार्गशीर्षशुक्लपञ्चम्यपि नागपञ्चमी—

शुक्ले मार्गशिरे पुण्या श्रावणे या च पञ्चमी ।
स्नानदानैर्बहुफला नागलोकप्रदायिनी ।। इति हेमान्द्रौ स्कान्दात् ।।

इयमपि परयुतैव ग्राह्या । पञ्चमी नागपूजायां कार्या षष्ठीसमन्विता इति पूर्वोक्तवचनात् ।।

इति पञ्चमीनिर्णयः ।

अथ षष्ठी ।

सा तु सर्वेषूपवासव्रतादिषु स्कन्दव्रतातिरिक्ता सप्तमीयुतैव ग्राह्या । 'षण्मुन्योः' इति युग्मवाक्यात् । माधवीये स्कान्देऽपि—

नागविद्धा न कर्तव्या षष्ठी चैव कदाचन ।
सप्तमीसंयुता कार्या षष्ठी धर्मार्थचिन्तकैः ।। इति ।

अत्र पञ्चमीवेधः षण्मुहूर्तात्मको ज्ञेयः । 'नागो द्वादशनाडीभिर्दूषयत्युत्तरां तिथिम्' इतिवचनात् । तेन षण्मुहूर्तन्यूनपञ्चमीयोगे पूर्वैव । अस्यामेव रविवासरयोगे लोलार्कयात्रोक्ता काशीखण्डे—

कृतानि यानि पापानि नरैः संवत्सरादपि ।
नश्यन्ति क्षणतस्तानि षष्ठ्यर्के लोलदर्शनात् ।।

लोलो लोलार्कः । वार्षिकयात्राप्युक्ता तत्रैव—

मार्गशीर्षस्य सप्तम्यां षष्ठ्यां वा रविवासरे ।
विधाय वार्षिकीं यात्रां नरः पापात्प्रमुच्यते ।। इति ।

आषाढशुक्लषष्ठी स्कन्दषष्ठीत्युच्यते । सा पञ्चमीयुता ग्राह्या । तदुक्तं स्कान्दे—

कृष्णाष्टमी स्कन्दषष्ठी शिवरात्रिश्चतुर्दशी ।
एताः पूर्वयुताः कार्यास्तिथ्यन्ते पारणं भवेत् ।। इति ।

भाद्रकृष्णषष्ठी योगविशेषेण कपिलाषष्ठीत्युच्यते । तदुक्तं पुराणसमुच्चये—

भाद्रे मास्यसिते पक्षे भानौ चैव करेस्थिते ।
पाते कुजे च रोहिण्यां सा षष्ठी कपिला भवेत् ।।
संयोगे तु चतुर्णां तु निर्दिष्टा परमेष्ठिना ।। इति ।

मार्गशुक्ला चम्पाषष्ठी । तस्यां खण्डेरायाख्यमल्लारिपूजा ब्राह्मणभोजनादि मल्लारिमाहात्म्ये दाक्षिणात्येषु प्रसिद्धम् । अस्यां योगविशेषस्तत्रैवोक्तः ।

मार्गे भाद्रपदे शुक्ला षष्ठी वैधृतिसंयुता ।
रविवारेण संयुक्ता सा चम्पेतीह कीर्तिता ॥ इति ।

तथा— मार्गशीर्षेऽमले पक्षे षष्ठ्यां वारेंऽशुमालिनः ।
शततारागते चन्द्रे लिङ्गं स्याद्दृष्टिगोचरम् ॥ इति ।

इयं च योगविशेषेण पूर्वा परा वा ग्राह्या । तदभावे सप्तमीयुता कार्या । पूर्वोक्तसामान्यनिर्णयादिति दिक् ।

इति षष्ठीनिर्णयः ।

अथ सप्तमी ।

सा सर्वत्र पूर्वैव । 'षण्मुन्योः' इति युग्मवचनात् । स्कान्देऽपि—

षष्ठ्या युता सप्तमी च कर्तव्या तात सर्वदा ॥ इति ।

वैशाखशुक्लसप्तम्यां गङ्गापूजोक्ता ब्राह्मे—

वैशाखे शुक्लसप्तम्यां जह्नुना जाह्नवी स्वयम् ।
क्रोधात्पीता पुनस्त्यक्ता कर्णरन्ध्रात्तु दक्षिणात् ।
तां तत्र पूजयेद्देवीं गङ्गां गगनमेखलाम् ॥ इति ।

अत्र पूर्वाह्णव्यापिनी ग्राह्या । दिनद्वये साम्येन पूर्वाह्णगामिन्यां पूर्वा, सामान्यनिर्णयात् । आश्विनशुक्लसप्तमी देवीपूजायां परयुता ग्राह्या—

युगाद्या वर्षवृद्धिश्च सप्तमी पार्वतीप्रिया ।
रवेरुदयमीक्षन्ते न तासु तिथियुग्मता ॥

इति प्रतापमार्तण्डे भविष्योक्तेः । वर्षवृद्धिर्जन्मतिथिः ।

अत्रैव मूलनक्षत्रे पुस्तकस्थापनमुक्तं रुद्रयामले—

मूलऋक्षे सुराधीश पूजनीया सरस्वती ।
पूजयेत्प्रत्यहं देव यावद्वैष्णवमृक्षकम् ॥
नाध्यापयेन्न च लिखेन्नाधीयीत कदाचन ॥ इति ।
पुस्तके स्थापिते देवि विद्याकामो द्विजोत्तमः ।

सङ्ग्रहेऽपि—

आश्विनस्य सिते पक्षे मेधाकामः सरस्वतीम् ॥
मूलेनाऽऽवाहयेद्देवीं श्रवणेन विसर्जयेत् ।

माघशुक्लसप्तमी रथसप्तमीत्युच्यते । साऽरुणोदयव्यापिनी स्नानादौ ग्राह्या—

सूर्यग्रहणतुल्या तु शुक्ला माघस्य सप्तमी ।
अरुणोदयवेलायां तस्यां स्नानं महाफलम् ।

इति चन्द्रिकायां विष्णूक्तेः । प्रयागे यदि लभ्येत कोटिसूर्यग्रहैः समा ॥ इति । स्मृत्यन्तराच्च । दिनद्वयेऽरुणोदये चेत्पूर्वैव 'षण्मुन्योः' इति युग्मवाक्यात् । अत्र कृत्यं भविष्ये—

सौवर्णे राजते ताम्रे भक्त्याऽलाबुमये तथा ।
तैलेन वर्तिर्दातव्या महारजनरञ्जिता ॥
समाहितमना भूत्वा दत्त्वा शिरसि दीपकम् ।
भास्करं हृदये ध्यात्वा इमं मन्त्रमुदीरयेत् ॥
नमस्ते रुद्ररूपाय रसानां पतये नमः ।
वरुणाय नमस्तेऽस्तु हरिवास नमोऽस्तु ते ॥
जले परिहरेद्दीपं ध्यात्वा संतर्प्य देवताः ॥ इति ।

महारजनं कुसुम्भम् । परिहरेत् मुञ्चेत् । काशीखण्डे विशेषः—

लोलार्के रथसप्तम्यां स्नात्वा गङ्गासिसङ्गमे ।
सप्तजन्मकृतैः पापैर्मुक्तो भवति तत्क्षणात् ॥ इति ।

इयं च षष्ठी रविवासरयोगेऽतिफलदा ।

षष्ठी च सप्तमीयोगे वारश्चेदंशुमालिनः ॥
योगोऽयं पद्मको नाम सहस्रार्कग्रहैः समः ॥

इति स्मृतिचन्द्रोदये गर्गोक्तेः ॥

अर्घ्यमन्त्रश्च काशीखण्डे—

यदाजन्मकृतं पापं मया सप्तसु जन्मसु ।
तन्मे रोगं च शोकं च माकरी हन्तु सप्तमी ॥ इति ।

इति सप्तमी ।

अथाष्टमीसामान्यनिर्णयः ।

सा कृष्णा पूर्वा, शुक्ला परा ग्राह्या—

शुक्लपक्षेऽष्टमी चैव शुक्लपक्षे चतुर्दशी ।
पूर्वविद्धा न कर्तव्या कर्तव्या परसंयुता ॥ इति ।
कृष्णपक्षेऽष्टमी चैव कृष्णपक्षे चतुर्दशी ।
पूर्वविद्धैव कर्तव्या परविद्धा न कुत्रचित् ॥ इति ।
उपवासेषु राजेन्द्र एष धर्मः सनातनः ।

इति नैगमात् । सर्वास्वष्टमीषु भैरवयात्रा काशीखण्डे—

अष्टम्यां च चतुर्दश्यां रविभूमिजवासरे ।
यात्रां च भैरवीं कृत्वा नरः पापैः प्रमुच्यते ॥ इति ।

तत्रैव— अष्टम्यां च चतुर्दश्यां भौमवारे विशेषतः ।
संपूज्य सततं काश्यां दुर्गां दुर्गार्तिनाशिनीम् ॥ इति ।

चैत्रशुक्लाष्टम्यां विशेषस्तत्रैव—

चैत्राष्टम्यां महायात्रां भवान्याः कारयेत्सुधीः ।
अष्टाधिकाः प्रकर्तव्याः शतकृत्वः प्रदक्षिणाः ॥ इति ।

इयं च परयुता ग्राह्या । युग्मवचनात् । श्रावणकृष्णाष्टमी द्वेधा । जन्माष्टमी जयन्ती च । तत्र केवला जन्माष्टमी । रोहिणीयुक्ता जयन्ती । तत्राद्योक्ता स्कान्दे—

अष्टमी श्रावणे मासि कृष्णपक्षे यदा भवेत् ।
कृष्णजन्माष्टमी ज्ञेया महापातकनाशिनी ॥ इति ।

पुराणान्तरेऽपि-

श्रावणे बहुले पक्षे कृष्णजन्माष्टमीव्रतम् ।
रात्रियुक्तां प्रकुर्वीत विशेषेणेन्दुसंयुताम् ॥ इति ।

जयन्ती तूक्ता वह्निपुराणे—

कृष्णाष्टम्यां भवेद्यत्र कलैका रोहिणी यदि ।
जयन्ती नाम सा प्रोक्ता उपोष्या सा प्रयत्नतः ॥ इति ।

स्कान्देऽपि—

प्राजापत्येन संयुक्ता अष्टमी तु यदा भवेत् ।
श्रावणे बहुले सा तु सर्वपापप्रणाशिनी ॥
जयं पुण्यं च कुरुते जयन्तीं तां विदुर्बुधाः ॥ इति ।

शैवपुराणे शिववाक्यम्—

शृणु वत्स प्रवक्ष्यामि अष्टमीभेदनिर्णयम् ।
श्रावणे कृष्णपक्षस्य घटिषष्टिर्यदा भवेत् ॥
तदा जन्माष्टमी ख्याता संपूर्णा सा प्रकीर्तिता ।
रोहिणीऋक्षसंयुक्ता जयन्ती सा तु कथ्यते ॥
जयन्ती यदि लभ्येत तत्र पुण्यं न गण्यते ॥ इति ।

पाद्मे— प्रेतयोनिगतानां तु प्रेतत्वं नाशितं नरैः ।
यैः कृता श्रावणे मासि अष्टमी रोहिणीयुता ॥

किं पुनर्बुधवारेण सोमेनापि विशेषतः ।
किं पुनर्नवमीयुक्ता कुलकोट्यास्तु मुक्तिदा ॥ इति ।
सोमः सोमवार इति केचित् । युक्तं तु चन्द्रोदय इति । 'अर्धरात्रे तु योगोऽयं तारापत्युदये सति' इति विष्णुधर्मोत्तरैकमूलकल्पनालाघवात् । तत्र जन्माष्टमी नित्या ।

ये न कुर्वन्ति जानन्तः कृष्णजन्माष्टमीव्रतम् ।
ते भवन्ति नराः प्राज्ञ व्याला व्याघ्राश्च कानने ॥

इति स्कान्देऽकरणेऽनिष्टश्रुतेः ।

श्रावणे बहुले पक्षे कृष्णजन्माष्टमीव्रतम् ।
न करोति महाप्राज्ञ व्यालो भवति कानने ॥

इति भविष्ये ।

जयन्त्यपि नित्या काम्या च । तत्र नित्या स्कान्दे—

शूद्रान्नेन तु यत्पापं शवहस्तस्थभोजने ।
तत्पापं लभते कुन्ति जयन्तीविमुखो नरः ॥
न करोति यदा विष्णोर्जयन्तीसंभवं व्रतम् ।
यमस्य वशमापन्नः सहते नारकीं व्यथाम् ॥

इत्यकरणे प्रत्यवायश्रवणात् । काम्याप्युक्ता स्कान्दे—

महाजयार्थं कुरुतां जयन्तीं मुक्तयेऽथवा ।
धर्ममर्थं च कामं च मोक्षं च मुनिपुंगव ॥
ददाति वाञ्छितानर्थान् ये चान्येऽप्यतिदुर्लभाः ।

इति फलविशेषश्रवणात् ।

अस्मिंश्च व्रते उपवासः पूजा चेत्युभयं प्रधानम्—

जन्माष्टमीदिने प्राप्ते येन भुक्तं द्विजोत्तम ॥
त्रैलोक्यसम्भवं पापं तेन भुक्तं न संशयः ।

इति स्कान्दात्,

अर्द्धरात्रे तु रोहिण्यां यदा कृष्णाष्टमी भवेत् ।
तस्यामभ्यर्चनं शौरेर्हन्ति पापं त्रिजन्मजम् ॥
सोपवासो हरेः पूजां कृत्वा तत्र न सीदति ॥

इति भविष्यपुराणाच्च फलसम्बन्धावगमादिति नव्याः । तन्न, चित्रोद्भिद्वन्निरपेक्षफलसम्बन्धात्प्रयोगभेदापत्तेः । ननु पूर्वोदाहृतेषु वाक्येषु गौरवपरिजिहीर्षया केवलं फलसम्बन्ध एव क्रियते ।

श्रावणे बहुले पक्षे कृष्णजन्माष्टमीव्रतम् ।
न करोति नरो यस्तु भवति ब्रह्मराक्षसः ॥

इत्यादिकालविधायकेषु भविष्यत्पुराणादिवचनेषु कृष्णजन्माष्टमीव्रतशब्देनोभयोरुपादानात् दर्शपूर्णमासराजसूयादिवत्प्रयोगैक्यमिति चेन्न । प्रातिस्विकवाक्यैः पृथक्फलसम्बन्ध उद्भिच्चित्रादिवत्परस्परनैरपेक्ष्येणेतिकर्तव्यतायां अप्यन्वयाद्भिन्न एव प्रयोगविधिः कल्प्यते । एवं चैकशब्दोपादानमपि 'य इष्ट्या पशुना सोमेन' इत्यादिवन्न विरुध्यते । अस्तु पृथक्प्रयोगतेतिचेन्न; अनन्तरस्वकृतव्रतानुष्ठानपद्धतौ एकप्रयोगलेखनविरोधात् । तस्मात् 'सोपवासो हरेः पूजाम्' इत्यनन्तरोपन्यस्ते

मासि भाद्रपदेऽष्टम्यां कृष्णपक्षेऽर्द्धरात्रके ।
शशाङ्के वृषराशिस्थे ऋक्षे रोहिणिसंज्ञके ॥
योगेऽस्मिन्वसुदेवाद्धि देवकी मामजीजनत् ।
तस्मान्मां पूजयेत्तत्र शुचिः सम्यगुपोषितः ॥

इत्यादावुपवासस्य गुणत्वप्रतीतेः स 'दतो धावति'इत्यादिवत्फलिसंस्कारः । पूजैव प्रधानम् । एवं चोपवासस्य पारार्थ्ये निर्ज्ञाते यस्तद्वाक्ये फलोल्लेखः स केवलः स्तावक एव पर्णतादिवत् । 'अङ्गे फलश्रुतिरर्थवादः' इतिन्यायात् ।

ननु— वासुदेवं समुद्दिश्य सर्वपापप्रशान्तये ।
उपवासं करिष्यामि कृष्णाष्टम्यां नभस्यहम् ॥
अथ कृष्णाष्टमीं देवीं नभश्चन्द्रं सरोहिणिम् ।
अर्चयित्वोपवासेन भोक्ष्येऽहमपरेऽहनि ॥

इतिभविष्यदुक्ते संकल्पवाक्ये उपवासस्य कर्तव्यत्वेनोल्लेखात्सोऽपि प्रधानमिति चेन्न । अङ्गत्वेऽप्युपवासस्य 'क्रियां क्रियासंबन्धिनं वा प्रकाशयन्मन्त्रः करणत्वं भजते' इतिन्यायात् क्रियासंबन्ध्युपवासप्रकाशकत्वेनापि मन्त्रस्य करणत्वोपपत्तेः । उपवासेनेति उपलक्षणे तृतीया । उपवासस्य पूजाकरणत्वासंभवात् । ननु पूर्वोदाहृतयोः पूजाफलसंबन्धबोधकवाक्ययोरकरणे निन्दार्थवादादेरभावात्कथं व्रतस्य नित्यत्वोद्घोष इतिचेन्न । उक्तयुक्त्या पूजाया एव फलसंबन्धे पूर्वोदाहृतेषु 'श्रावणे बहुले पक्षे' इत्यादिवाक्येषु कृष्णजन्माष्टमीव्रतशब्देन पूजाया ग्रहणात् युक्तोऽकरणनिन्दार्थवादश्रवणान्नित्यत्वोद्घोषः इति । तस्मादुपवासोऽङ्गं पूजैव तु प्रधानम् ।

अस्याश्च पूजायाः काल उक्तो विष्णुधर्मोत्तरे—

रोहिणीसहिता कृष्णा मासि भाद्रपदेऽष्टमी ।
सप्तम्यामर्द्धरात्राधःकलयाऽपि यदा भवेत् ॥
तत्र जातो जगन्नाथः कौस्तुभी हरिरीश्वरः ।
तमेवोपवसेत्कालं तत्र कुर्याच्च जागरम् ॥
अर्द्धरात्रे तु योगोऽयं तारापत्युदये तथा ।
नियतात्मा शुचिः स्नातः पूजां तत्र प्रवर्तयेत् ॥ इति ।

वसिष्ठस्तु स्पष्टमर्द्धरात्रस्य मुख्यकालत्वमाह—

अष्टमी रोहिणीयुक्ता निश्यर्द्धे दृश्यते यदि ।
मुख्यकालः स विज्ञेयस्तत्र जातो हरिः स्वयम् ॥ इति ।

मुख्यस्य प्रधानस्य कालो मुख्यकालः । अत्र केवलाष्टमी चतुर्द्धा । पूर्वेद्युरेव निशीथव्यापिनी परेद्युरेव उभयेद्युः नोभयेद्युश्चेति । तत्र प्रथमद्वितीयपक्षयोः कर्मकालव्यापित्वेनासंदिग्धैव । अन्त्ययोरपि पक्षयोः प्रातः सङ्कल्पकाले सत्वादाधिक्याच्च परैव । ब्रह्मवैवर्तेऽपि—

वर्जनीया प्रयत्नेन सप्तमीसंयुताऽष्टमी ॥ इति ।

रोहिणीयुतापि चतुर्द्धा पूर्वेद्युरेव निशीथयोगवती, परेद्युरेव तादृशी, उभयेद्युः, नोभयेद्युश्चेति । तत्र पूर्वेद्युर्निशीथयुता पूर्वैव—

कार्या विद्धापि सप्तम्या रोहिणीसहिताष्टमी ।

इति पाद्मात् ।

सप्तमीसंयुताष्टम्यां निशीथे रोहिणी यदि ।
भविता साऽष्टमी पुण्या यावच्चन्द्रदिवाकरौ ॥

इति वह्निपुराणात् ।

जयन्त्यां पूर्वविद्धायामुपवासं समाचरेत् ॥

इति गारुडाच्च । भविष्ये विष्णुधर्मोत्तरे च—

रोहिण्यामर्द्धरात्रे च यदा कृष्णाष्टमी भवेत् ।
तस्यामभ्यर्चनं शौरेर्हन्ति पापं त्रिजन्मजम् ॥
प्राजापत्यर्क्षसंयुक्ता कृष्णा नभसि चाष्टमी ।
सोपवासो हरेः पूजां कृत्वा तत्र न सीदति ॥
अर्द्धरात्रे तु योगोऽयं तारापत्युदये तथा ।
रोहिणीसहिता कृष्णा मासि भाद्रपदेऽष्टमी ॥
अर्द्धरात्रादधश्चोर्ध्वं कलयापि यदा भवेत् ।
तत्र जातो जगन्नाथः कौस्तुभी हरिरीश्वरः ॥

तथा— सोमयोगे तु रोहिण्यां निशीथे राजसत्तम।
समजायत गोविन्दो बालरूपी चतुर्भुजः ॥
तस्मात्तं पूजयेत्तत्र निशीथे राजसत्तम ॥ इति ।

अवशिष्टेषु त्रिषु पक्षेषु परदिन एव व्रतम् । तदुक्तं ब्रह्मवैवर्ते—
वर्जनीया प्रयत्नेन सप्तमी सहिताऽष्टमी ।
सऋक्षाऽपि न कर्तव्या सप्तमीसंयुताऽष्टमी ॥ इति ।

स्कान्दे—सप्तमीसहिताष्टम्यां भूत्वा ऋक्षं द्विजोत्तम ।
प्राजापत्यं द्वितीयेऽह्नि मुहूर्तार्द्धं भवेद्यदि ।
तदाऽष्टयामिकं ज्ञेयं प्रोक्तं व्यासादिभिः पुरा ॥

पाद्मे— मुहूर्तेनापि संयुक्ता संपूर्णा साऽष्टमी भवेत् ।
किं पुनर्नवमीयुक्ता कुलकोट्यास्तु मुक्तिदा ॥ इति ।

यदा तु पूर्वेद्यू रोहिणीरहिता निशीथगा च तिथिः परेद्युः रोहिणी-सहिता निशीथास्पृक्च तदा पूर्वैव ग्राह्या । कर्मकालशास्त्रस्य सर्वापेक्षया प्राबल्यस्य सर्वग्रन्थसिद्धत्वात् । रोहिणीयोगे तु प्राशस्त्यात्फलातिशयमात्रं न तु तस्य निर्णयोपयोगिता । नवमीबुधवारवत् ।

अन्यथा—प्रेतयोनिगतानां तु प्रेतत्वं नाशितं नरैः ।
यैः कृता श्रावणे मासि अष्टमी रोहिणीयुता ॥
किं पुनर्बुधवारेण सोमेनापि विशेषतः ।
किं पुनर्नवमीयुक्ता कुलकोट्यास्तु मुक्तिदा ॥

इति पाद्मवचसा पूर्वेद्युरर्द्धरात्रे वर्तमानां सरोहिणीमप्यष्टमीं त्यक्त्वा बुधनवमीयुता परैव कार्याऽऽपद्येत ।

यत्तु पुनर्नव्याः । सत्यं कर्मकालशास्त्रं सर्वापेक्षया प्रबलं तथापीयमस्मिन्व्रते परैव ग्राह्येत्येवंविधेन प्रातिस्विकेन शास्त्रेण बाध्यते । अत एव विष्णुरहस्ये—
प्राजापत्यर्क्षसंयुक्ता कृष्णा नभसि चाष्टमी ।
मुहूर्तमपि लभ्येत सोपोष्या सा महाफला ॥ इति ।

वह्निपुराणेऽपि—
कृष्णाष्टम्यां भवेद्यत्र कलैकाऽरोहिणी स्मृता ।
जयन्ती नाम सा प्रोक्ता उपोष्यैव प्रयत्नतः ॥

स्कान्दे— उदये चाष्टमी किञ्चिन्नवमी सकला यदि ।

भवेत्तु बुधसंयुक्ता प्राजापत्यर्क्षसंयुता ॥
अपि वर्षशतेनापि लभ्यते यदि वा नवा ॥ इति ।

ब्रह्मवैवर्ते—

दिवा वा यदि वा रात्रौ नास्ति चेद्रोहिणीकला ।
रात्रियुक्तां प्रकुर्वीत विशेषेणेन्दुसंयुताम् ॥

इति प्रातिस्विकशास्त्रस्य कर्मकालशास्त्रापेक्षया प्राबल्यं माधवाचार्यादिभिर्व्यवस्थापितमेवेत्याहुः । तदपि न, तदेव हि प्रातिस्विकं शास्त्रं कर्मकालबाधकं यदनन्यथासिद्धं भवति । संभवति त्वस्य न्याय्योऽन्योऽर्थः । तथाहि—यत्तावद्ब्रह्मवैवर्तीयं तत्र 'इन्दुसंयुताम्' इत्यस्य 'सोमेनापि विशेषत' इत्यनेनैकमूलकल्पनालाघवलिप्सया सोमवारपरत्वान्नास्य दिवावच्छेदेन रात्र्यवच्छेदेन वा रोहिणीकलायोगाभावे निशीथगा ग्राह्येत्ययमर्थः । निशीथगमकशब्दाभावात् । किन्तु सोमवारयुक्ता विशेषणाधिक्येन रात्रियुक्ता ग्राह्येति । एवं चोभयदिने निशीथस्पर्शाभावे सोमवाराधिकरात्रिव्याप्तेर्निर्णायकत्वमुक्तं भवति । यद्वा । 'इन्दुसंयुताम्' इत्यस्य निशीथपरत्वेऽपि रात्रिपदेनैवाधिकरात्रिं लक्षयित्वाहोरात्रावच्छेदेन कलयाऽपि रोहिणीयोगाभावेऽधिकरात्रिव्यापिनीं कुर्वीतेत्युक्त्वा विशेषेणेत्यादिना तदपोद्यते । सत्यपि रोहिणीयोगे इन्दुसंयुतैव ग्राह्येति । अथवा निशीथस्य मुहूर्तमात्रात्मकत्वादुभयदिने वैषम्येण निशीथस्पर्शेऽहोरात्रे रोहिणीयोगाभावे च विशेषेणाधिक्येनेन्दुसंयुक्ता निशीथगा ग्राह्या । अधिकनिशीथव्यापिनीति यावत् । रोहिणीयोगे त्वधिकनिशीथव्यापिनीमपि विहाय स्वल्पनिशीथयोगिनीं रोहिणीयुक्तामेव कुर्वीतेति । यच्च स्कान्दम् 'उदये चाष्टमी किञ्चित्' इति । तत्राप्युदयशब्दस्य 'तारापत्युदये सति' इत्याद्येकमूलकल्पनालाघवलिप्सया चन्द्रोदयपरतैवाङ्गीकार्या न सूर्योदयपरता । यदि त्वेवं न व्याख्यायते ततो यथाश्रुतवाक्यबलाद्यदा पूर्वेद्युर्निशीथेऽष्टमीमात्रसत्वमुत्तरेद्युश्च निशीथास्पर्शिन्यष्टमी रोहिणीयुक्तापि च सती यदा बुधयुक्ता तदैवोत्तरा स्यात् न तु तदभावे 'यावद्वचनं वाचनिकम्' इतिन्यायात् । यदि तु बुधाभावेऽपि रोहिणीमात्रवशादेवोत्तरोच्यते तदा रोहिणीयोगाभावेऽपि बुधमात्रसद्भावादुत्तरा स्यात् । अन्यतराभावेऽप्येतद्वचनप्रवृत्तेः स्वीकारादृक्षयोगवद्वारयोगस्यापि प्राशस्त्यहेतुत्वाच्च । अतोऽर्द्धजरती-

थापत्तिः। किंच यथा पूर्वेद्युर्निशीथेऽष्टमीमात्रसत्वे उत्तरेद्युश्च निशीथात्पूर्वमृक्षयोगे बुधसत्वे च एतद्वचनादुत्तरेद्युर्व्रतमेवं पूर्वेद्युर्निशीथे सर्क्षाष्टमीसत्वे बुधाधिक्यादुत्तरेद्युर्व्रतापत्तिः। प्रपञ्चिता चैतद्वचोव्याख्या द्वैतनिर्णये गुरुभिः। यच्च विष्णुरहस्यस्थं यदपि वह्निपुराणस्थं तत्र मुहूर्तपदं निशीथाख्यमुहूर्तपरं कलापदं तद्वर्तिकलापरमिति न विरोधः। वस्तुतस्त्वेतद्वाक्यद्वयमुभयदिनेऽनिशीथेऽष्टमीव्याप्तावव्याप्तावेकदेशव्याप्तौ वा सावकाशम्। अतो न कर्मकालव्याप्तिबाधकम्। तस्मात्कर्मकालशास्त्राबाधात्पूर्वैव ग्राह्या। यदि तु जयन्तीव्रतं जन्माष्टमी व्रताद्भिन्नं तदा तद्भवतु परेऽहनि। न तु जन्माष्टमीव्रतम्।

यत्तु माधवाचार्यैर्जयन्तीव्रतेन जन्माष्टमीव्रतस्य प्रसङ्गसिद्धिरभ्यधायि। तन्न। कालभेदात्। योऽपि च तैरेव नामभेदान्निमित्तभेदाद्रूपभेदाच्छुद्धमिश्रत्वभेदान्निर्देशभेदाच्च कर्मभेद उक्तः सोऽप्ययुक्तः। कर्मनामधेयभेदे हि स्यात्कर्मभेदः। नह्यत्र जयन्तीशब्दः कर्मनाम किंतु रोहिणीसहिताया अष्टम्याः। 'रोहिणी च यदा कृष्णपक्षेऽष्टम्यां द्विजोत्तम। जयन्ती नाम सा प्रोक्ता सर्वपापहरा तिथिः' इति विष्णुधर्मोत्तरात्। यदपि रूपभेदादित्युक्तं तत्र रूपशब्देन धात्वर्थभेदो गुणभेदो वाभिप्रेतः। नाद्यः। कर्मभेदसाधकतयाऽऽमिक्षाधिकरणोपन्यासासंगतेः। नह्यामिक्षाधिकरणे धात्वर्थभेदाद्भेदः सिध्यति। नान्त्यः। उत्पत्तिशिष्टस्य गुणस्य वाक्यान्तरे श्रवणात्। निमित्तभेदशुद्धमिश्रत्वभेदनिर्देशभेदानां तु कर्मभेदकत्वं न क्वापि व्युत्पादितम्।

ननु— जन्माष्टमी जयन्ती च शिवरात्रिस्तथैव च।
पूर्वे विद्धैव कर्तव्या तिथिभान्ते च पारणम्॥

इति भृगुवाक्येऽनन्यपरपुनःश्रवणलक्षणादभ्यासादेव भेद इति चेन्न, एतस्य वचसो जन्माष्टमीमत्स्यादिजयन्त्यनुवादेन पूर्वविद्धत्वगुणमात्रविधायकत्वेनाप्युपपत्तेः। अथ पूर्वोदाहृतेषु वाक्येषूपवसेत्पूजयेच्चेत्यपर्यायधातुनिष्पन्नाख्यातरूपाच्छब्दान्तरादेव भेद इष्यते। तत्र शब्दान्तरेणोपवासपूजयोर्भेदेऽप्युपवासस्य पूजाङ्गत्वस्य प्राक्स्थापितत्वेन न स्वातन्त्र्येण कालनिर्णयप्रयोजकत्वम्। प्रकरणान्तराद्भेद इति चेन्न। उपलभ्यमानस्मृतिपुराणादिषु असन्निध्यनुपलम्भात्। यदि स्यात्तदा किमितीमं राजमार्गं विहाय शुद्धमिश्रत्वादि कुमार्गो माधवाचार्यैराश्रि-

येत । एवमपि स्वमात्रसाक्षिकत्वेन प्रकरणान्तराद्भेदे समाश्रीयमाणे भवतु जयन्तीव्रतं परेऽहनि । जन्माष्टमीव्रते तु सत्यपि उत्तरदिने निशीथाव्यापिन्या अष्टम्या रोहिणीयोगे पूर्वदिने च केवलाया निशीथयोगे पूर्वैव ग्राह्येति दिक् ।

अथ जन्माष्टमीव्रतप्रयोगः ।

व्रतपूर्वदिने दन्तधावनं कृत्वोपवासदिने प्रातः—

सूर्यः सोमो यमः कालः संध्ये भूतान्यहः क्षपा ।
पवनो दिक्पतिर्भूमिराकाशं खचरा नराः ॥
ब्राह्मं शासनमास्थाय कल्पध्वमिह सन्निधिम् ।

इत्युक्त्वा—सफलपुष्पाक्षतजलपूर्णताम्रपात्रमादाय मासाद्युल्लिख्यामुकफलकामः पापक्षयकामो वा कृष्णप्रीतये कृष्णजन्माष्टमीव्रतमहं करिष्ये ।

तथा— वासुदेवं समुद्दिश्य सर्वपापप्रशान्तये ।
उपवासं करिष्यामि कृष्णाष्टम्यां नभस्यहम् ॥
अद्य कृष्णाष्टमीं देवीं नभश्चन्द्रसरोहिणीम् ।
अर्चयित्वोपवासेन भोक्ष्येऽहमपरेऽहनि ॥
एनसो मोक्षकामोऽस्मि यद्गोविन्दमयोनिजम् ।
तन्मे मुञ्चतु मां त्राहि पतितं शोकसागरे ॥
आजन्ममरणं यावद्यन्मया दुष्कृतं कृतम् ।
तत्प्रणाशय गोविन्द प्रसीद पुरुषोत्तम ।

इत्युक्त्वा पात्रस्थं जलं क्षिपेत् । ततः कदलीस्तम्भवासोभिराम्रपल्लवयुतसजलपूर्णकलशैर्दीपैः पुष्पमालादिभिर्युतमगुरुधूपितमग्निखड्गकृष्णच्छागरक्षामणिद्वारन्यस्तमुसलादियुतं मङ्गलोपेतं षष्ठ्या देव्या युतं देवक्याः सूतिकागृहं विधाय तस्य समन्ताद्भित्तिषु सकुसुमाञ्जलीन् देवगन्धर्वादीन् खड्गचर्मधरवसुदेवदेवकीनन्दयशोदागर्गगोपीगोपान् कंसनियुक्तान्गोधेनुकुञ्जरान् यमुनां तन्मध्ये कालियमन्यच्च तत्कालीनं गोकुलचरितं यथासंभवं लिखित्वा सूतिकागृहमध्ये प्रच्छदपटावृत्तं मञ्चकं स्थापयित्वा मध्याह्ने नद्यादिजले तिलैः स्नात्वाऽर्धरात्रे 'सपरिवारश्रीकृष्णपूजां करिष्ये' इति संकल्प्य—

काञ्चनी राजती ताम्री पैत्तली मृण्मयी तथा ।
वार्क्षी मणिमयी चैव वर्णकैर्लिखिता तथा ॥

इत्युक्तान्यतमेन प्रतिमां विधायाग्न्युत्तारणं कृत्वा प्रतिमाकपोलौ स्पृष्ट्वा तद्देशस्थाने तत्तद्देवतानां मूलमन्त्रं प्रणवादिचतुर्थ्यन्तं नाम च 'अस्मै देवत्वं सङ्ख्यायै(?)स्वाहा' इति मन्त्रं पठन्प्राणप्रतिष्ठां कुर्यात् । अस्मा इत्यस्य स्थाने तत्तद्देवतानाम ग्राह्यम्—

गायद्भिः किन्नराद्यैः सततपरिवृता वेणुवीणानिनादैः
शृङ्गारीदर्शकुन्तप्रवरकृतकरैः किङ्करैः सेव्यमाना ॥
पर्यङ्के स्वास्तृते या मुदिततरमुखी पुत्रिणी सम्यगास्ते
सा देवी देवमाता जयति सुवदना देवकी दिव्यरूपा ॥

इति देवकीम्,

मां चापि बालकं सुप्तं पर्यङ्के स्तनपायिनम् ।
श्रीवत्सवक्षसं शान्तं नीलोत्पलदलच्छविम् ॥

इति श्रीकृष्णं च ध्यात्वा 'ॐनमो देव्यै श्रियै' इति श्रियं देवकीसहितं वसुदेवं यशोदासहितं नन्दं श्रीकृष्णसहितं बलदेवं चण्डिकां च नमोन्तैर्नाममन्त्रैः पूजयेत् । तत्र मन्त्राः—

योगेश्वराय देवाय योगानां पतये विभो ।
योगोद्भवाय नित्याय गोविन्दाय नमोनमः ॥ स्नाने ।
यज्ञेश्वराय यज्ञाय तथा यज्ञोद्भवाय च ।
यज्ञानां पतये नाथ गोविन्दाय नमोनमः ॥ धूपादौ ।
विश्वेश्वराय देवाय तथा विश्वोद्भवाय च ।
विश्वस्य पतये तुभ्यं गोविन्दाय नमोनमः ॥ नैवेद्ये ।

गारुडे तु—यज्ञाय यज्ञेश्वराय यज्ञपतये यज्ञसम्भवाय गोविन्दाय नमोनमः इत्यर्घम्, सर्वेषां यज्ञपदानां स्थाने योगपदान्युक्त्वायमेव मन्त्रः । स्नाने, विश्वाय विश्वेश्वराय इत्याद्युक्त्वा नैवेद्ये, धर्मायधर्मेश्वराय इत्यादिस्वाहान्त, स्तिलहोमे विश्वाय विश्वेश्वराय इत्यादिः शयने, सोमाय सोमेश्वराय इत्यादिश्चन्द्रपूजायामिति मन्त्रा उक्ताः । ततो गव्यघृतेनाग्नौ वसोर्द्धारा कश्चिद्गुडघृतेनेति । ततो जातकर्मनालच्छेदषष्ठीपूजानामकर्माणि संक्षेपेण कार्याणि । ततश्चन्द्रोदये रोहिणीयुतं चन्द्रं स्थण्डिले प्रतिमायां वा नाममन्त्रेण संपूज्य—

शङ्खे तोयं समादाय सपुष्पकुशचन्दनम् ।
जानुभ्यां धरणीं गत्वा चन्द्रायार्घ्यं निवेदयेत् ॥
क्षीरोदार्णवसंभूत अत्रिगोत्रसमुद्भव ।
गृहाणार्घ्यं शशाङ्केमं रोहिण्या सहितो मम ॥ इति ।
ततः— ज्योत्स्नायाः पतये तुभ्यं ज्योतिषां पतये नमः ।
नमस्ते रोहिणीकान्त सुधावास नमोऽस्तु ते ॥
नभोमण्डलदीपाय शिरोरत्नाय धूर्जटेः ।
कलाभिर्वर्द्धमानाय नमश्चन्द्राय चारवे ॥ इति प्रणमेत् ॥
ततः— अनघं वामनं शौरिं वैकुण्ठं पुरुषोत्तमम् ।
वासुदेवं हृषीकेशं माधवं मधुसूदनम् ॥
वाराहं पुण्डरीकाक्षं नृसिंहं दैत्यसूदनम् ।
दामोदरं पद्मनाभं केशवं गरुडध्वजम् ॥
गोविन्दमच्युतं कृष्णमनन्तमपराजितम् ।
अधोक्षजं जगद्बीजं सर्गस्थित्यन्तकारिणम् ॥
अनादिनिधनं विष्णुं त्रिलोकेशं त्रिविक्रमम् ।
नारायणं चतुर्बाहुं शङ्खचक्रगदाधरम् ॥
पीताम्बरधरं नित्यं वनमालाविभूषितम् ।
श्रीवत्साङ्कं जगत्सेतुं श्रीकृष्णं श्रीधरं हरिम् ॥
शरणं तु प्रपद्येऽहं सर्वकामार्थसिद्धये ।
प्रणमामि सदा देवं वासुदेवं जगत्पतिम् ॥
इति मन्त्रैः प्रणम्य ।
त्राहि मां सर्वलोकेश हरे संसारसागरात् ।
त्राहि मां सर्व पापघ्न दुःखशोकार्णवात्प्रभो ॥
सर्वलोकेश्वर त्राहि पतितं मां भवार्णवे ।
देवकीनन्दन श्रीश हरे संसारसागरात् ॥
त्राहि मां सर्वदुःखघ्न रोगशोकार्णवाद्धरे ।
दुर्गतांस्त्रायसे विष्णो ये स्मरन्ति सकृत्सकृत् ॥
सोऽहं देवातिदुर्वृत्तस्त्राहि मां शोकसागरात् ।
पुष्कराक्ष निमग्नोऽहं मायाविज्ञानसागरे ॥

त्राहि मां देवदेवेश त्वत्तो नान्योऽस्ति रक्षिता ।
यद्बाल्ये यच्च कौमारे यौवने यच्च वार्द्धके ॥
तत्पुण्यं वृद्धिमाप्नोतु पापं हर हलायुध ।

इति मन्त्रैः प्रार्थयेत् । ततः स्तोत्रश्रवणपुराणश्रवणादिना जागरणं कृत्वा द्वितीयेऽन्हि प्रातःकालीनं नित्यं कृत्वा पूर्ववद्देवं पूजयित्वा ब्राह्मणान् भोजयित्वा तेभ्यः सुवर्णधेनुवस्त्रादि 'कृष्णो मे प्रीयताम्' इति दत्वा—

यं देवं देवकी देवी वसुदेवादजीजनत् ।
भौमस्य ब्रह्मणो गुप्त्यै तस्मै ब्रह्मात्मने नमः ॥
सुजन्मवासुदेवाय गोब्राह्मणहिताय च ।

शान्तिरस्तु शिवं चास्तु इत्युक्त्वा प्रतिमामुद्वास्य तां ब्राह्मणाय दत्वा पारणां कृत्वा व्रतं समापयेत् । 'सर्वाय सर्वेश्वराय सर्वपतये सर्वसंभवाय गोविन्दाय नमोनमः' इति पारणायाम् । 'भूताय भूतपतये नमः' इत्यादि समापने मन्त्रः । उद्यापनं त्वनुक्तत्वान्नास्ति—

एवं यथोक्ततिथौ व्रतं कृत्वा परदिने पारणं कुर्यात् ।
अष्टम्यामथ रोहिण्यां न कुर्यात् पारणं क्वचित् ॥
हन्यात्पुराकृतं कर्म उपवासार्जितं फलम् ।
तिथिरष्टगुणं हन्ति नक्षत्रं च चतुर्गुणम् ॥
तस्मात्प्रयत्नतः कुर्यात्तिथिभान्ते च पारणम् । इति ।

तत्र दिवसे उभयान्ते पारणमितिमुख्यः कल्पः । एकतरान्तस्त्वनुकल्पः । तत्र यदि तिथिनक्षत्रयोरन्यतरस्य चान्तो रात्रा भवति तदा तद्रात्रौ न कुर्यात्किन्तु दिवैव—

सर्वेष्वेवोपवासेषु दिवा पारणमिष्यते ।
अन्यथा पुण्यहानिः स्यादृते धारणपारणात् ॥

इति ब्रह्मवैवर्ते निषेधात् ।

अन्यतिथ्यागमो रात्रौ तामसस्तैजसो दिवा ।
तामसे पारणं कुर्वंस्तामसीं गतिमश्नुते ॥

इति गरुडपुराणाच्च । यत्तु केनचिदुक्तं तिथिनक्षत्रयोगाद्दिवापारणस्यासम्भवे रात्रावपि कुर्यात् । तदुक्तं माधवीये स्मृत्यन्तरे—

तिथ्यृक्षयोर्यदा छेदो नक्षत्रान्तमथापि वा ।

अर्द्धरात्रेऽपि तत्कुर्यात्पारणं त्वपरेऽहनि ॥ इति ।

ब्रह्माण्डपुराणेपि—

न रात्रौ पारणं कुर्याद्व्रते वै रोहिणीव्रतात् ।
तत्र निश्यपि तत्कुर्याद्वर्जयित्वा महानिशाम् ॥

इति । पूर्वोदाहृतं सामान्यवाक्यद्वयं जन्माष्टमीपारणातिरिक्तपारणपरमिति । तन्न । ब्रह्माण्डीयवचने तावदपिशब्दश्रवणात् 'अपि वेदान्तगं रणे' इति वत्स्वार्थत्यागेनोभयान्तादरः प्रतीयते न रात्रिविधिः । एवं च स्तुत्यर्थत्वे संभवति न सामान्यवचनबाधकत्वमेतस्य युज्यते । यदपि 'तिथ्यृक्षयोः' इति वचनं तत्रापि एकं पदमेकत्रान्वितमन्यत्र विना बलवदनुपपत्त्या नान्वेति इति न्यायात् । अर्द्धरात्रे यदोभयान्तस्तदा वचनान्तरबोधितदिन एव पारणं कुर्यान्न त्वर्द्धरात्रे पारणमित्येवंपरम् । न्यायश्चायं तृतीये सिद्धः । 'यथाचमसमन्यांश्चमसांश्चमसिनो भक्षयन्ति । अथैतस्यहारियोजनस्य सर्व एव लिप्सन्ति' इत्यत्र चमसिपदस्य हारियोजनान्वयानभ्युपगमात् । किञ्च त्वयापि हि परेऽहनीत्यस्याविवक्षाऽङ्गीक्रियत एव । अन्यथा तृतीयदिने पारणापत्तिः । यदप्यत्र माधवेनोक्तम्—अर्द्धरात्रशब्देन रात्रिमात्रं गृह्यत इति तदपि प्रमाणाभावेनैवापास्तम् । यद्यविवक्षा तदा दिनस्यैव ग्रहणौचित्यात् । तस्मादस्मदुक्त एव पक्षः श्रेयान् । तत्र शक्त उभयान्तेऽशक्तस्त्वन्यतरान्ते उत्सवान्ते वा—

'तिथ्यन्ते चोत्सवान्ते वा व्रती कुर्वीत पारणम्' इति कालादर्शादिनिबन्धवचनात् । उत्सवान्ते जागराद्युत्सवान्ते ।

दूर्वाष्टमी ।

भाद्रशुक्लाष्टमी दूर्वाष्टमी । भविष्ये—

शुक्लाष्टमी तिथिर्या तु मासि भाद्रपदे भवेत् ।
दूर्वाष्टमी तु सा ज्ञेया नोत्तरा सा विधीयते ॥ इति ।

इयं च पूर्वविद्धा । तदुक्तं बृहद्यमेन—

श्रावणी दुर्गनवमी दूर्वा चैव हुताशिनी ।
पूर्वविद्धा प्रकर्तव्या शिवरात्रिर्बलेर्दिनम् ॥ इति ।

अत्र स्त्रीणामेवाधिकारो न पुंसाम्—

या न पूजयते दूर्वां मोहादिह यथाविधि ।
जन्मानि त्रीणि वैधव्यं लभते नात्र संशयः ।
तस्मात्संपूजनीया सा प्रतिवर्षं वधूजनैः ॥

इति चन्द्रप्रकाशे पुराणसमुच्चयेऽकरणे वैधव्यरूपानिष्टश्रुतेः । अतएव नित्यमपीदम् । इदं तु व्रतं भाद्रशुक्ले अगस्त्योदयसंभावनायां भाद्रकृष्णाष्टम्यां कार्यम्—

शुक्ले भाद्रपदे मासि दूर्वासंज्ञा तथाष्टमी ।
सिंहार्के एव कर्तव्या न कन्यार्के कदाचन ।
सिंहस्थे चोत्तमा सूर्येऽनुदिते मुनिसत्तमे ॥

इति गोविन्दार्णवे स्कान्दात् । अत्र कृत्यमुक्तं मदनरत्ने भविष्यपुराणे—

शुचौ देशे प्रजातायां दूर्वायां ब्राह्मणोत्तम ।
स्थाप्य लिङ्गं ततो गन्धैः पुष्पैर्धूपैः समर्चयेत् ॥
दध्यक्षतैर्द्विजश्रेष्ठ अर्घ्यं दद्यात्रिलोचने ।
दूर्वाशमीभ्यां विधिवत्पूजयेच्छ्रद्धया युता ॥

तत्र मन्त्रः—

त्वं दूर्वेऽमृतजन्मासि वन्दितासि सुरासुरैः ।
सौभाग्यं सन्ततिं देहि सर्वकार्यकरी भव ॥
यथा शाखाप्रशाखाभिर्विस्तृतासि महीतले ।
तथा ममापि सन्तानं देहि त्वमजरामरम् ॥ इति ।

भक्ष्यनियमोऽपि भविष्ये—

अनग्निपक्वमश्नीयादन्नं दधि फलं तथा ।
अक्षारलवणं ब्रह्मन्नश्नीयान्मधुनान्वितम् ॥ इति ।

इयं च ज्येष्ठामूलशून्यरौहिणमुहूर्तव्यापिनी ग्राह्या—

मुहूर्ते रौहिणेऽष्टम्यां पूर्वा वा यदि वा परा ।
दूर्वाष्टमीति सा कार्या ज्येष्ठां मूलं च वर्जयेत् ॥

इति पुराणसमुच्चयात् । दिनद्वये रौहिणज्येष्ठामूलयोगे तदभावे वा पूर्वैव । 'श्रावणी दुर्गनवमी' इतिपूर्वोक्तवाक्यात् ।

अत्रैव ज्येष्ठापूजनं लैङ्गे—

कन्यार्के याऽष्टमी शुक्ला ज्येष्ठर्क्षे महती स्मृता ।
अलक्ष्मीपरिहाराय ज्येष्ठां तत्र प्रपूजयेत् ॥

तथा— मासि भाद्रपदे शुक्ले पक्षे ज्येष्ठर्क्षसंयुते ।
यस्मिन्कस्मिन्दिने कुर्याज्ज्येष्ठायाः परिपूजनम् ॥

इतिस्कान्दोक्तेः । इयं ज्येष्ठायोगवशेन ग्राह्या । नक्षत्रयोगाभावे तु परैव । पूर्वेद्यू रात्रौ नक्षत्रयोगे तु पूर्वैव । तथा च तत्रैव—

नवमीसहिता कार्या अष्टमी नात्र संशयः ।
मासि भाद्रपदे शुक्ले पक्षे ज्येष्ठर्क्षसंयुते ॥
रात्रिर्यस्मिन्दिने कुर्याज्ज्येष्ठायाः परिपूजनम् ॥ इति ।

तत्रैव— यस्मिन्दिने भवेज्ज्येष्ठा मध्याह्नादूर्ध्वमप्यणुः ।
तस्मिन्हविष्यं पूजा च न्यूना चेत्पूर्ववासरे ॥ इति ।

निर्णीतपूजादिनात्पूर्वदिनेऽनुराधायामावाहनम् । उत्तरदिने मूले च विसर्जनम् । तथाच स्कान्दे—

मैत्रेणावाहयेद्देवीं ज्येष्ठायां तु प्रपूजयेत् ।
मूले विसर्जयेद्देवीं त्रिदिनं व्रतमुत्तमम् ॥ इति ।

महालक्ष्मीयात्राप्यस्यामेवोक्ता काशीखण्डे—

महालक्ष्म्यष्टमीं प्राप्य तत्र यात्रा कृता नृणाम् ।
संपूजितेह विधिवत्पद्मा सद्म न मुञ्चति ॥

व्रतवन्तस्तु एतदारभ्याश्विनकृष्णाष्टमीपर्यन्तं षोडशदिनानि प्रत्यहं यात्रां कुर्युरिति शिष्टाः । अत्र व्रतमुक्तं पुराणसमुच्चये—

श्रियोऽर्चनं भाद्रपदे सिताष्टमी
प्रारभ्य कन्यामगते च सूर्ये ।
समापयेत्तत्र तिथौ च याव-
त्सूर्यस्तु पूर्वार्द्धगतो युवत्याः ॥ इति ।

कन्यामगते सिंहस्थे सूर्ये प्रारम्भः युवत्याः कन्यायाः पूर्वार्द्धे सूर्येऽवस्थिते सति समाप्तिरित्यर्थः । प्रथमारम्भ एवायं नियमः षोडशवार्षिके तत्प्रयोगगतद्वितीयादिवर्षे तु न नियमः । एतच्चार्द्धरात्रातिक्रमवर्तिन्यामष्टम्यां कार्यम्—

अर्द्धरात्रमतिक्रम्य वर्तते योत्तरा तिथिः ।
तदा तस्यां तिथौ कार्यं महालक्ष्मीव्रतं सदा ॥

इतिचन्द्रप्रकाशे स्मृत्यन्तरात्—

आश्विनशुक्लाष्टमी महाष्टमीत्युच्यते । तथाच ब्रह्मपुराणे—

तत्राष्टम्यां भद्रकाली दक्षयज्ञविनाशिनी ।
प्रादुर्भूता महाघोरा योगिनीकोटिभिर्वृता ।
अतोऽत्र पूजनीया सा तस्मिन्नहनि मानवैः ॥ इति ।

तत्र आश्विनशुक्लपक्षे । इयं चाष्टमी नवमीयुता ग्राह्या । तथा च देवीपुराणे—

सप्तमीवेधसंयुक्ता यैः कृता तु महाष्टमी ।
पुत्रदारधनैर्हीना भ्रमन्तीह पिशाचवत् ॥

मदनरत्ने स्मृतिसङ्ग्रहेऽपि—

शरन्महाष्टमी पूज्या नवमीसंयुता सदा ।
सप्तमीसंयुता नित्यं शोकसन्तापकारिणी ॥
जम्भेन सप्तमीयुक्ता पूजिता तु महाष्टमी ।
इन्द्रेण निहतो जम्भस्तस्माद्दानवपुङ्गवः ॥
तस्मात्सर्वप्रयत्नेन सप्तमीसहिताष्टमी ।
वर्जनीया प्रयत्नेन मनुजैः शुभकाङ्क्षिभिः ॥
सप्तमी कलया यत्र परतश्चाष्टमी भवेत् ।
तेन शल्यमिदं प्रोक्तं पुत्रपौत्रक्षयप्रदम् ॥
पुत्रान्हन्ति पशून्हन्ति हन्ति राष्ट्रं सराजकम् ।
हन्ति जातानजातांश्च सप्तमीसहिताष्टमी ॥ इति ।

ब्रह्मवैवर्ते—

शुक्लपक्षेऽष्टमी चैव शुक्लपक्षे चतुर्दशी ।
पूर्वविद्धा न कर्तव्या कर्तव्या परसंयुता ॥ इति ।

वसुरन्ध्रयोरिति युग्मवचनम् । अत्र त्रिमुहूर्तन्यूनापि सप्तमी वर्जनीया-प्रयोजिका, न त्रिमुहूर्तैव । तथाच ब्रह्मपुराणे—

सप्तमीशल्यसंयुक्ता वर्जनीया सदाऽष्टमी ।
स्तोकाऽपि सा तिथिः पुण्या यस्यां सूर्योदयो भवेत् ॥ इति ।

स्तोका कलाकाष्ठादिमात्राऽपीत्यर्थः । इयमेव भौमयुताऽतिप्रशस्ता ।

अष्टम्यामुदिते सूर्ये दिनान्ते नवमी भवेत् ।
कुजवारो भवेत्तत्र पूजनीया प्रयत्नतः ॥

इति मदनोक्तस्मृत्यन्तरात् । नवमीयुक्तालाभे तु सप्तमीयुतैव कार्या । तत्पराण्येव—

सप्तम्याऽपि युता कार्या मूलेनापि विशेषतः ।

इत्यादीनि वचनानि । नवरात्राशक्तौ त्रिरात्राद्युक्तं देवीपुराणे—

नवरात्रव्रतेऽशक्तस्त्रिरात्रं चैकरात्रकम् ।
व्रतं चरति यो भक्तस्तस्मै दास्यामि वाञ्छितम् ॥ इति ।

केवलाष्टम्युपवासस्तु पुत्रवता न कार्यः ।

उपवासं महाष्टम्यां पुत्रवान्न समाचरेत् ॥
यथा तथा वा पूतात्मा व्रती देवीं प्रपूजयेत् ।

इति कालिकापुराणात् ।

मार्गशीर्षकृष्णाष्टम्यां काशीखण्डे काशीवासनिर्विघ्नतासिद्ध्यर्थंकालभैरवपूजोक्ता ।

कृत्वा च विविधां पूजां महासंभारविस्तरैः ।
नरोमार्गासिताष्टम्यां वार्षिकं विघ्नमुत्सृजेत् ॥ इति ।

तत्रैव— तीर्थे कालोदके स्नात्वा कृत्वा तर्पणमत्वरः ।
विलोक्य कालराजानं निरयादुद्धरेत्पितॄन् ॥ इति ।

उपोषणमप्युक्तमस्यामेव काशीखण्डे—

मार्गशीर्षासिताष्टम्यां कालभैरवसन्निधौ ।
उपोष्य जागरं कुर्वन्सर्वपापैः प्रमुच्यते ॥ इति ।

अत्रोपोषणाङ्गतयाऽर्घ्यदानमपि कार्यमिति शिवरहस्ये । अत्रोपवासजागरणयोः प्रधानयोरहोरात्रसाध्यत्वेनाहोरात्रयुताष्टमी ग्राह्या—

अहोरात्रव्रतं यच्च एकमेकतिथौ गतम् ।
तस्यामुभययोगिन्यामाचरेत्तद्व्रतं व्रती ॥

इति स्मृतेः । यदा तु पूर्वदिने सायाह्ने उत्तरे प्रदोषे तुल्या तदा पूर्वैव—रुद्रव्रतेषु सर्वेषु कर्तव्या संमुखी तिथिः । इति ब्रह्मवैवर्तात् ।
यत्तु कश्चित् उपोषणस्यांगभूतमर्घ्यदानमितिस्थितम् इति,शिवरहस्याद्उपोषणमेव प्रधानं न जागरणमिति । तत्तुच्छम् , अर्घ्यदानस्योपोषणाङ्गत्वेऽपि जागरणे तत्त्वाप्रयोगात् । यदपि 'मध्याह्ने संस्थिते रवौ' इत्युपक्रम्य—

तदोग्ररूपादनघान्मत्तः श्रीकालभैरवः ।
आविरासीत्ततो लोकान् भीषयन्नखिलानपि ॥

इति शिवरहस्ये मध्याह्ने कालभैरवाविर्भावात्तद्व्यापिनी ग्राह्येति कश्चित्तदपि तुच्छम् । शिवरहस्ये मध्याह्नोत्तरं कृत्तिवासेश्वरं प्रापुर्देवा बिल्वादिसाधना इत्यादिना भूयः कर्मकलापमुक्त्वा भैरवाविर्भावं चोक्त्वा अनुपदमेव सूर्योऽप्यस्तमुपागमत् इत्युक्तं, तत्र मध्याह्नेऽपराह्ने सायाह्ने वाविर्भावानिश्चयात् । अस्तु वा मध्याह्न आविर्भावस्तथापि तत्कालीनग्राह्यतायां मानाभावः । नह्याविर्भावकालीना ग्राह्येति वाक्यमस्ति किञ्चित् । जन्माष्टम्यादौ तु पूजाख्यकर्मकालत्वेन निशीथव्यापिनी ग्राह्येत्युक्तं, न जन्मकालतयेति संक्षेपः ।

माघशुक्लाष्टम्यां भीष्मतर्पणं श्राद्धं चोक्तम् । हेमाद्रौ पाद्मे—

माघे मासि सिताष्टम्यां सतिलं भीष्मतर्पणम् ।
श्राद्धं च ये नराः कुर्युस्ते स्युः सन्ततिभागिनः ॥ इति ।

तर्पणमन्त्रस्तु भारते—

भीष्मः शान्तनवो वीरः सत्यवादी जितेन्द्रियः ।
आभिरद्भिरवाप्नोतु पुत्रपौत्रोचितां क्रियाम् ॥
वैयाघ्रपादगोत्राय सांकृत्यप्रवराय च ।
अपुत्राय ददाम्येतज्जलं भीष्माय वर्मणे ॥
वसूनामवताराय शन्तनोरात्मजाय च ।
अर्घ्यं ददामि भीष्माय आबाल्यब्रह्मचारिणे ॥ इति ।

पाद्मे— ब्राह्मणाद्याश्च ये वर्णा दद्युर्भीष्माय नो जलम् ।
संवत्सरकृतं तेषां पुण्यं नश्यति सत्तम ॥ इति ।

इदं च जीवत्पितृकोऽपि कुर्यात् निषेधाभावात् । यत्तु, 'सपितुः पितृकृत्येषु नाधिकारः कथंचन' इतिनिषेधः, स पित्र्यकर्मपर इति दिक् ।

इत्यष्टमीनिर्णयः

अथ नवमी ।

सा तु पूर्वा, वसुरन्ध्रयोः इति युग्मवचनात् । ब्रह्मवैवर्तेऽपि—

अष्टम्या नवमी विद्धा कर्तव्या फलकाङ्क्षिभिः ।
न कुर्यान्नवमीं तात दशम्या तु कदाचन ॥ इति ।

चैत्रे शुक्ला रामनवमी सा परविद्धा मध्याह्नव्यापिनी ग्राह्या । तदुक्तमगस्तिसंहितायाम्—

चैत्रे शुद्धा तु नवमी पुनर्वसुयुता यदि ।
सैव मध्याह्नयोगेन महापुण्यतमा भवेत् ॥ इति ।
नवमी चाष्टमीविद्धा त्याज्या विष्णुपरायणैः ।
उपोषणं नवम्यां वै दशम्यां पारणं भवेत् ॥

इति वचनाच्च । तत्रैव—

चैत्रे मासि नवम्यां तु जातो रामः स्वयं हरिः ।
पुनर्वस्वृक्षसंयुक्ता सा तिथिः सर्वकामदा ॥
श्रीरामनवमी प्रोक्ता कोटिसूर्यग्रहाधिका ।

तथा— केवलापि सदोपोष्या नवमीशब्दसंग्रहात् ॥
तस्मात्सर्वात्मना सर्वैः कार्यं वै नवमीव्रतम् ।
उपोषणं जागरणं पितॄनुद्दिश्य तर्पणम् ॥
तस्मिन्दिने तु कर्तव्यं ब्रह्म प्राप्तुमभीप्सुभिः ।

अत्र पूर्वदिन एव मध्याह्नव्यापिनी चेत्पूर्वा, दिनद्वये तद्व्याप्तावव्याप्तावेकदेशसमव्याप्तौ च सनक्षत्रा चेत्पूर्वाऽन्यथोत्तरेति । अष्टमीविद्धानिषेधादिति ।

तत्रैव— यस्तु रामनवम्यां तु भुङ्क्ते मोहाद्विमूढधीः ।
कुम्भीपाकेषु घोरेषु पच्यते नात्र संशयः ॥

इति प्रत्यवायश्रुतेर्नित्यं फलश्रुतेश्च काम्यं रामनवमीव्रतम् ।
यत्तु—तद्भक्तानामेव नित्यमिति, तन्न । सङ्कोचे मानाभावात् । जन्माष्टमीशिवरात्र्यादिव्रतेऽपि तथात्वापत्तेः ।

अथ व्रतपद्धतिः ।

व्रतपूर्वदिने सायं दन्तधावनं व्रतदिने च प्रातः ।

सूर्यः सोमो यमः कालः सन्ध्ये भूतान्यहः क्षपा ॥
पवनो दिक्पतिर्भूमिराकाशं खचरा नराः ।
ब्राह्मं शासनमास्थाय कल्पध्वमिह संनिधिम् ॥

इत्युक्त्वा फलपुष्पाक्षतसहितजलपूर्णं वा ताम्रपात्रं गृहीत्वा मासाद्युल्लिख्य पापक्षयकामोऽमुककामो वा श्रीरामचन्द्रप्रीतये श्रीरामनवमीव्रतमहं करिष्ये—

उपोष्ये नवमीत्वद्य यामेष्वष्टसु राघव ।
तेन प्रीतो भव त्वं भोः संसारात्त्राहि मां हरे ॥

इत्युक्त्वा पात्रस्थं जलं क्षिपेत् । ततः—शक्तितो हैमीं रामप्रतिमामग्न्युत्तारणपूर्वकं कपोलौ स्पृष्ट्वा मूलमन्त्रप्रणवादिचतुर्थ्यन्तं नाम रामाय देवत्वसङ्ख्यायै स्वाहेति च मन्त्रं पठन् प्राणप्रतिष्ठां कुर्यात् ।

ततः— कोमलाङ्गं विशालाक्षमिन्द्रनीलसमप्रभम् ।
दक्षिणाङ्के दशरथं पुत्रावेक्षणतत्परम् ॥
पृष्ठतो लक्ष्मणं देवं सच्छत्रं कनकप्रभम् ।
पार्श्वे भरतशत्रुघ्नौ तालवृन्तकरावुभौ ॥
अग्रे व्यग्रं हनूमन्तं रामानुग्रहकाङ्क्षिणम् ।

इति ध्यात्वा षट्कोणमध्ये पूजयेत् । श्रीरामप्रतिमासमीपे षट्कोणमध्ये कौशल्यां दशरथं च पूजयेत् । षट्कोणकोणेषु रां हृदयाय नमः । रीं शिरसे स्वाहा । रूं शिखायै वषट् । रैं कवचायहुम् । रौं नेत्रत्रयाय वौषट् । रः अस्त्रायफडिति हृदयादीनि षट् । षट्कोणबाह्याष्टदलकमलदलमूलेषु हनूमन्तं सुग्रीवं भरतं बिभीषणं लक्ष्मणमङ्गदं शत्रुघ्नं जाम्बवन्तं च, दलमध्येषु धृष्टिं जयन्तं विजयं सुराष्ट्रं राष्ट्रवर्द्धनमकोपं धर्मपालं सुमन्तं च, दलाग्रेषु इन्द्रं, अग्निं यमं निर्ऋतिं वरुणं वायुं कुबेरं ईशानं चाष्टौ लोकपालान्, तदग्रे, वज्रं, शक्तिं, दण्डं, खड्गं, पाशम्, अङ्कुशं, गदां, शूलं चेति तेषामायुधानि च पूजयेत् । श्रीरामपूजायां मूलमन्त्रः, वैदिको वा वैष्णवः, प्रणवादिचतुर्थ्यन्तं नमोऽन्तं नाम वा मन्त्रः ।

इन्द्रोऽग्निश्च यमश्चैव नैर्ऋतो वरुणोऽनिलः ।
कुबेर ईशो ब्रह्मादिर्दिक्पालाः स्नापयन्तु ते ॥ इति स्नाने ॥
रामस्य जननी चासि रामात्मकमिदं जगत् ।
अतस्त्वां पूजयाम्यद्य लोकमातर्नमोऽस्तु ते ॥

इति कौशल्यापूजायाम् । ॐ नमो दशरथायेति दशरथपूजायाम् । इतरेषां तु मूलमन्त्राः प्रणवादिचतुर्थ्यन्तनमोऽन्तनामानि वा ।

उच्चस्थे ग्रहपञ्चके सुरगुरौ सेन्दौ नवम्यां तिथौ
लग्ने कर्कटके पुनर्वसुदिने मेषं गते पूषणि ॥

निर्दग्धुं निखिलाः पलाशसमिधो मध्याद्योध्यारणे-
राविर्भूतमसूत पूर्वविभवं यत्किञ्चिदेकं महः ॥

इति । मध्याह्ने जन्मभावना । वाद्यादिवादनं च पुष्पांजलिपूर्वकम् ।

फलपुष्पाम्बुसंपूर्णं गृहीत्वा शङ्खमुत्तमम् ॥
अशोकरत्नकुसुमैर्युक्तं च तुलसीदलैः ।
दशाननवधार्थाय धर्मसंस्थापनाय च ॥
दानवानां विनाशाय दैत्यानां निधनाय च ।
परित्राणाय साधूनां जातो रामः स्वयं हरिः ॥
गृहाणार्घ्यं मया दत्तं भ्रातृभिः सहितो मम ॥

इति मन्त्रेणार्घ्यं दद्यात् ।

पुष्पाञ्जलिं पुनर्दत्त्वा यामे यामे ह्यतन्द्रितः ।
पूजयन्विधिवद्भक्त्या दिवारात्रं नयेद्बुधः ॥ इति ॥

ततः—स्तोत्रपाठपुराणश्रवणादिना रात्रौ जागरणं कृत्वा द्वितीयेऽह्नि प्रातःकालीनं नित्यं कृत्वा पूर्ववदेव श्रीरामं परिवारदेवताश्च संपूज्य विप्रान्संभोज्य श्रीरामः प्रीयतामिति तेभ्यः सुवर्णधेनुवस्त्रादि दत्त्वा प्रतिमामुद्वास्य तां विप्राय दत्त्वा पारणां कृत्वा व्रतं समापयेत् ।

आश्विनशुक्लनवमी महानवमीत्युच्यते ।

तदुक्तं प्रतापमार्तण्डे लैङ्गे—

दुर्गापूजासु नवमी मूलाद्यृक्षत्रयान्विता ।
महती कीर्तिता तस्यां दुर्गां महिषमर्दिनीम् ॥ इति ।

पूजयेदिति शेषः । तत्र पूर्वविद्धा ग्राह्या युग्मवचनात् ।

बृहद्यमोऽपि—

श्रावणी दुर्गनवमी दूर्वा चैव हुताशनी ।
पूर्वविद्धा प्रकर्तव्या शिवरात्रिर्बलेर्दिनम् ॥ इति ।

अस्यामेव दुर्गापूजनहोमबलिदानादि कार्यमिति राजमार्तण्डे—

नवम्यां तु जपं होमं समाप्य विधिवद्बलिम् ॥ इति ।

ब्रह्मवैवर्तेऽपि—

अत्रापराह्णिके काले बलिदानं प्रशस्यते ।
दशमीं वर्जयेत्तत्र नात्र कार्या विचारणा ॥ इति ।

तेन नवम्यामुपक्रम्य नवम्यामेव समापयेत् । गौडनिबन्धेऽप्येवम्—

केचिदप्यष्टम्यामारभ्य नवम्यां समापयन्ति तत्र मूलं शिष्टाचार एव ।
अत्र डामरतन्त्रे विशेषः—

पायसं सर्पिषा युक्तं तिलैः शुक्लैर्विमिश्रितम् ॥
होमयेद्विधिवद्भक्त्या दशांशेन नृपोत्तम ।
रुद्राध्याये यथा होमं मन्त्रेणानेन साधयेत् ॥

रुद्रयामलेऽपि—

प्रधानद्रव्यमुद्दिष्टं पायसान्नं तिलांस्तथा ।
किंशुकैः सर्षपैः पूगैर्लाजादूर्वाङ्कुरैरपि ॥
यवैर्वा श्रीफलैर्दिव्यैर्नानाविधफलैरपि ।
रक्तचन्दनखण्डैश्च गुग्गुलैश्च मनोहरैः ॥
प्रतिश्लोकं च जुहुयात्सर्वद्रव्याणि च क्रमात् ॥ इति ।

यत्तु केचित्—

अष्टम्यां जागरं कुर्यान्नवम्यां पारणं तथा ।
दशम्यां च विसर्गः स्यादभिषेकश्च माधवे ॥

इति रुद्रयामलात्—

नवम्यां च विशालाक्ष कार्या होमादिकाः क्रियाः ।
पारणं चैव कुर्वीत देवीपूजनपूर्वकम् ॥
दशम्या मिश्रिता यत्र पारणे नवमी भवेत् ।
सप्तजन्मकृतं पुण्यं तत्क्षणादेव नश्यति ॥

तथा— यो मोहात्पारणं कुर्याद्दशमे दिवसे विभो ।
तद्राष्ट्रं नाशमायाति दुर्भिक्षादि भयं भवेत् ॥
नृपहीनं भवेद्राष्ट्रं दशम्यां पारणे कृते ।
तस्मात्तु पारयेद्देव नवम्यां भक्तितत्परः ॥
नवम्यां पारिता देवी कुलवृद्धिं प्रयच्छति ।
दशम्यां पारिता देवी कुलनाशं करोति वै ॥
तस्मात्तु पारणं कुर्यान्नवम्यां विबुधाधिप ।

इति देवीपुराणादेश्च नवम्यामेव नवरात्रपारणमित्याहुः । तन्न—

एवं च विन्ध्यवासिन्यां नवरात्रोपवासतः ।
एकभक्तेन नक्तेन स्वशक्त्याऽयाचितेन वा ॥
अथवा नवनक्तैश्च नवरात्रं समापयेत् ॥

इति भविष्यादिवचोभिरुपवासादिषु शक्त्या विहितस्य नवतिथ्या-

धिकरणत्वस्य बाधापत्तेः । अस्मिन्वाक्ये एकभक्तादिशब्दसमभिव्याहारेण 'नवरात्रं समापयेत्' इति नामधेयान्तरसत्वाच्च नवतिथिरूपगुणविधिरेव युक्तो नवरात्रोपवास इति न नामधेयम् । नवमीपारणविधायकानि दशमीनिषेधकानि च पूर्वोक्तानि वचांसि तु महानिबन्धादिष्वदर्शनात्प्रायो निर्मूलान्येव । समूलत्वेऽपि तेषां पूर्वेद्युरष्टमीविद्धत्वेन नवमीप्रयुक्त उपवासे जाते परेद्युश्चावशिष्टकिञ्चिन्नवमीसत्वे नवम्यन्तःपारणविधायकत्वं नतु प्राप्तोपवासबाधकत्वम् । एवं च 'सर्वेषामुपवासानां प्रातरेव हि पारणम्' इतिवचोवगतावशिष्टनवम्यन्तःपारणस्योपोष्य तिथ्यन्तपारणविधिना बाधितस्य प्रतिप्रसवविधित्वेनैषां लाघवम् । अन्यथाऽप्राप्तविधितया गौरवात्[1] । अतश्च दशम्यां पारणं न कार्यमित्येतेषामनुवादकत्वमेव न विधायकत्वम् । *तिथिवृद्धौ ह्रासे वा नवम्यां पूजोपवासादि कार्यमेव ।

आश्विने शुक्लपक्षे तु कर्तव्यं नवरात्रकम् ।
प्रतिपदादिक्रमेणैव यावच्च नवमी भवेत् ॥

इति हेमाद्रौ धौम्योक्तेः । यावच्छब्दोऽभिव्याप्तौ ।

नवम्यां पूर्ववत्पूजा कर्तव्या भूतिमिच्छता ।
दक्षिणां वस्त्रयुग्मं च आचार्याय निवेदयेत् ॥

इति मात्स्यात् ।

उत्तरेण नवम्यां तु बलिना पूजयेच्छिवाम् ।
श्रवणेन दशम्यां तु प्रणिपत्य विसर्जयेत् ॥

इति देवीपुराणात् । तत्रैव—

महानवम्यां पूजेयं स्वर्गमोक्षप्रदायिनी ॥

इत्युक्तेश्च । अष्टम्यां दशम्यां वा समाप्तौ त्वेतद्वचोबाधः स्यात् । नचैकतिथिक्षये 'आश्विने प्रतिपन्मुख्याः पुण्यास्तु तिथयो नव' इत्यादिदेवीपुराणीयनवतिथिरूपकालविधिविरोधः, सावनाष्टदशदिनापत्तावपि चान्द्रतिथिनवसङ्ख्याया अबाधात् । चान्द्रप्रतिपदादीनामेव तिथिपदशक्यत्वाच्च । वस्तुतस्तु 'प्रतिपदादिक्रमेणैव यावच्च नवमी भवेत्' इत्यादिपूर्वोक्तानेकवचनैर्नवमीपर्यन्तं व्रतानुष्ठानोक्त्या च तिथिनव-

---

[1] गौरवमिति पाठः । * तिथिवृद्धावित्यारभ्य नवसंख्यानित्यप्राप्तैवेति दिगित्यन्तो पाठः पुस्तकान्तरे न दृश्यते ।

सङ्ख्यायाः प्रचयशिष्टत्वेन विध्यभावान्नाङ्गत्वम् । यथा 'दश दशैकं चमसमनुभक्षयन्ति' इति दशचमसेषु दशब्राह्मणविधिना 'शतं ब्राह्मणाः सोमान्भक्षयन्ति' इति शतसङ्ख्यायाः प्रचयशिष्टतयाऽनुवादः । यथा वा प्रातिस्विकसमिदादिविधिसिद्धायाः 'पञ्च प्रयाजा इज्यन्ते' इति पञ्चतायाः । येषु तु वचस्सु 'नवरात्राभिधं कर्म नक्तव्रतमिति स्थितिः' इति । 'आश्विने शुक्लपक्षे तु नवरात्रव्रतं शुभम्' इत्यादिव्रतशब्दसामानाधिकरण्यं तत्रापि कादाचित्कविधित्सितनवसङ्ख्यारूपगुणप्राप्तावपि नामधेयमेव नवरात्रपदं, दृष्टं च तथा वाजपेये कादाचित्कसुराग्रहविधानेऽपि नामधेयत्वम् । वस्तुतस्तु चान्द्रतिथिगतनवसङ्ख्या नित्यप्राप्तैवेति दिक् । विस्तरश्चात्र तातचरणकृते द्वैतनिर्णये बोध्यः । पारणं तु सूतकेऽपि कार्यम् । तदुक्तं रुद्रयामले—

सूतके पारणं कुर्यान्नवम्यां होमपूर्वकम् ॥ इति ।

एवं स्त्रीभिरपि रजोदर्शनमध्येऽपि कार्यम् । तदाह सत्यव्रतः—

प्रारब्धदीर्घतपसां नारीणां यद्रजो भवेत् ।
न तत्रापि व्रतस्य स्यादुपरोधः कदाचन ॥ इति ।

एतच्च सधवापरं ज्ञेयम् । विधवायास्तु त्रिरात्रमध्ये भोजननिषेधादिति केचित्तन्न । निषेधस्य रागप्राप्तभोजनगोचरत्वेन वैधपारणविषयत्वायोगात् । वस्तुतस्तु रजस्वलाया विधवायास्त्रिरात्रमध्ये भोजननिषेध एव खपुष्पायमाण इति दिक् ।

इति नवमीनिर्णयः ।

अथ दशमीसामान्यनिर्णयः ।

संपूर्णा दशमी कार्या परया पूर्वयाथवा ।
युक्ता न दूषिता यस्मादिति सा सर्वतोमुखी ॥

इत्यङ्गिरःस्मृतेः । अयं च विकल्पो व्यवस्थितः

शुक्लपक्षे तिथिर्ग्राह्या यस्यामभ्युदितो रविः ।
कृष्णपक्षे तिथिर्ग्राह्या यस्यामस्तमितो रविः ॥

इति वचोन्तरात् । माधवोऽप्येवम् । यत्तु हेमाद्रिः—दिनद्वये कर्मकालव्याप्त्यभावे ऐच्छिको विकल्प इत्याह तन्न, शास्त्रतो व्यवस्थासंभवे ऐच्छिकत्वायोगात् । उपवासे तु सर्वमते पूर्वैव—

नागविद्धा तु या षष्ठी शिवविद्धा तु सप्तमी ।
दशम्येकादशीविद्धा नोपोष्या सा कथञ्चन ॥

इति शिवरहस्योक्तेः । यत्तु प्रतापमार्तण्डे स्कान्दे—

दशमी चैव कर्तव्या सदुर्गा द्विजसत्तम ।

इति तदृष्युपवासपरम् ।

ज्येष्ठशुक्लदशमी दशहरा ।

ज्येष्ठे मासि सिते पक्षे दशमी हस्तसंयुता ।
हरते दशपापानि तस्माद्दशहरा स्मृता ॥

भविष्ये—ज्येष्ठे शुक्लदशम्यां तु भवेद्भौमदिनं यदि ।
ज्ञेया हस्तर्क्षसंयुक्ता सर्वपापहरा तिथिः ॥
एतानि दशपापानि हर त्वं देवि जाह्नवि ।
दशपापहरा गङ्गा तस्माद्दशहरा स्मृता ॥
तस्यां स्नानं प्रकुर्वीत दानं चैव विशेषतः ॥

इति हेमाद्रौ ब्राह्मोक्तेः । दशपापानि चाह मनुः—

पारुष्यमनृतं चैव पैशुन्यं चापि सर्वशः ।
असंबद्धप्रलापश्च वाङ्मयं स्याच्चतुर्विधम् ॥
अदत्तानामुपादानं हिंसा चैवाऽविधानतः ।
परदारोपसेवा च कायिकं त्रिविधं स्मृतम् ॥
परद्रव्येष्वभिध्यानं मनसानिष्टचिन्तनम् ।
वितथाभिनिवेशश्च त्रिविधं कर्म मानसम् ॥ इति ।

स्कान्देपि—

ज्येष्ठे मासि सिते पक्षे दशम्यां बुधहस्तयोः ।
व्यतीपाते गरानन्दे कन्याचन्द्रे वृषे रवौ ॥
दशयोगे नरः स्नात्वा सर्वपापैः प्रमुच्यते ॥ इति ।

इयं च योगविशेषवशात्पूर्वा परा वा ग्राह्या । काशीखण्डे—

दशाश्वमेधिके स्नात्वा सर्वपापैः प्रमुच्यते ।
लिङ्गं दशाश्वमेधेशं दृष्ट्वा दशहरातिथौ ॥
दशजन्मार्जितैः पापैस्त्यज्यते नात्र संशयः ।

स्कान्दे—यां काञ्चित्सरितं प्राप्य दद्याद्दर्भैः तिलोदकम् ।
मुच्यते दशभिः पापैः स महापातकोपमैः ॥

यदा ज्येष्ठो मलमासो भवति तदा मलमास एव कार्यम् । तदाह हेमाद्रौ ऋष्यश्रृङ्गः—

दशहरासु नोत्कर्षश्चतुर्ष्वपि युगादिषु ।
उपाकर्ममहाषष्ठ्योर्ह्येतदिष्टं वृषादितः ॥ इति ।

आश्विनशुक्लदशमी विजयादशमीत्युच्यते । सा तु शमीपूजायात्रादौ नक्षत्रोदयव्यापिनी ग्राह्या ।

तदुक्तं रत्नकोशे—

ईषत्सन्ध्यामतिक्रान्तः किञ्चिदुद्भिन्नतारकः ।
विजयो नाम कालोऽयं सर्वकार्यार्थसाधकः ॥ इति ।

चिन्तामणावपि—

आश्विनस्य सिते पक्षे दशम्यां तारकोदये ।
स कालो विजयो ज्ञेयः सर्वकार्यार्थसिद्धये ॥

दिनद्वये तद्व्याप्तौ पूर्वैव—

या पूर्णा नवमीयुक्ता तस्यां पूज्याऽपराजिता ।
क्षेमार्थं विजयार्थं च पूर्वोक्तविधिना नरैः ॥
नवमीशेषयुक्तायां दशम्यामपराजिता ।
ददाति विजयं देवी पूजिता जयवर्द्धिनी ॥
एकादश्यां न कुर्वीत पूजनं चापराजितम् ॥

इति स्कान्दोक्तेः । तत्रैव—

दशमीं यः समुल्लङ्घ्य प्रस्थानं कुरुते नरः ।
तस्य संवत्सरं राज्ये न क्वापि विजयो भवेत् ॥ इति ।

दिनद्वये तारकोदयकालाभावे परदिने एकादशमुहूर्ते यात्रा[1] कार्या—

आश्विनस्य सिते पक्षे दशम्यां सर्वराशिषु[2] ।
सायंकाले शुभा यात्रा दिवा वा विजयक्षणे ॥
एकादशो मुहूर्तोऽपि विजयः परिकीर्तितः ।
तस्मिन्सर्वैर्विधातव्या यात्रा विजयकाङ्क्षिभिः ॥

इति भृगूक्तेः । परदिन एकादशमुहूर्तव्याप्त्यभावेऽपि श्रवणयोगश्चेत्तदैव यात्रा कार्या पूजा तु पूर्वदिन एव—

---

१ यात्रादि कार्यम् पाठः क. ग. । २ ' सर्वे रात्रिषु ' इति पाठः ।

उदये दशमी किञ्चित्संपूर्णैकादशी यदि ।
श्रवणर्क्षं यदा काले सा तिथिर्विजयाभिधा ॥

इति मदनरत्ने दक्षोक्तेः ।

श्रवणर्क्षे तु पूर्णायां काकुत्स्थः प्रस्थितो यतः ।
उल्लङ्घयेयुः सीमानं तद्दिनर्क्षे ततो नराः ॥

इति भविष्योक्तश्च । अत्र कृत्यं भविष्ये—

शमीं सलक्षणोपेतामीशानाशाप्रतिष्ठिताम् ।
संप्रार्थ्य तां च संपूज्य ईशानीसंमुखो भवेत् ॥
शमी शमयते पापं शमी लोहितकण्टका ।
धारयत्यर्जुनास्त्राणि रामसंवाददायिनी ॥
करिष्यमाणयात्रायां यथाकालं सुखं मम ।
तत्र निर्विघ्नकर्त्री त्वं भव श्रीरामपूजिते ॥
गृहीत्वा साक्षतामार्द्रां शमीमूलगतां मृदम् ।
गीतवादित्रनिर्घोषैरानयेत्स्वगृहं प्रति ॥
ततो भूषणवस्त्रादि धारयेत्स्वजनैः सह ॥

इति दिक् ।

इति दशमीनिर्णयः ।

अथ एकादशीसामान्यनिर्णयः ।

अथ उपवासविचारः ।

तत्रोपवासो नित्यः काम्यश्च । तत्राद्यमाह सनत्कुमारः—

न करोति हि यो मूढ एकादश्यामुपोषणम् ।
स नरो नरकं याति रौरवं तमसा वृतम् ॥ इति ।

गारुडे— उपोष्यैकादशी नित्यं पक्षयोरुभयोरपि ॥ इति ।

काम्यस्तु कौर्मे—

यदीच्छेद्विष्णुसायुज्यं श्रियं सन्ततिमात्मनः ।
एकादश्यां न भुञ्जीत पक्षयोरुभयोरपि ॥ इति ।

स्कान्देऽपि—

यदीच्छेद्विपुलान्भोगानभक्तिं चात्यन्तदुर्लभाम् ।
एकादश्यामुपवसेत्पक्षयोरुभयोरपि ॥ इति ।

अथ उपवासाधिकारी ।

कात्यायनः—

अष्टवर्षाधिको मर्त्यो ह्यशीतिन्यूनवत्सरः ।
एकादश्यामुपवसेत्पक्षयोरुभयोरपि ॥ इति ।

'अष्टवर्षाधिक'इत्युपनयनोत्तरत्वस्योपलक्षणम् 'अपि वा वेदतुल्यत्वादुपायेन प्रवर्त्तेरन्' इति षष्ठे स्थापितत्वात् । एतच्च गृहस्थव्यतिरिक्तपरम् । तदुक्तं कौर्मे—

एकादश्यां न भुञ्जीत पक्षयोरुभयोरपि ।
वनस्थयतिधर्मोऽयं शुक्लामेव सदा गृही ॥ इति ।

भविष्येऽपि—

एकादश्यां न भुञ्जीत पक्षयोरुभयोरपि ।
ब्रह्मचारी च नारी च शुक्लामेव सदा गृही ॥ इति ।

नारी विधवा, ब्रह्मचारिसाहचर्यात् । सधवायास्तु पक्षद्वयेऽपि निषेधः ।

पत्यौ जीवति या नारी उपोष्य व्रतमाचरेत् ।
आयुष्यं हरते भर्तुः सा नारी नरकं व्रजेत् ॥

इति विष्णूक्तेः ।

नास्ति स्त्रीणां पृथग्यज्ञो न व्रतं नाप्युपोषणम् ।
पतिं शुश्रूषते या तु तेन स्वर्गे महीयते ॥

इति मनूक्तेश्च । तथा—

यद्देवेभ्यो यच्च पित्रादिकेभ्यः
कुर्याद्भर्ताभ्यर्चनं सत्क्रियां च ।
तस्य ह्यर्द्धं सा फलं नान्यचित्ता
नारी भुङ्क्ते भर्तृशुश्रूषयैव ॥ इति ।

भर्त्राज्ञया तु सधवाया अप्यधिकारोऽस्त्येव—

भार्या पत्युर्मते चैव व्रतादीनाचरेत्सदा ॥

इति कात्यायनोक्तेः । चातुर्मास्यान्तर्गता तु कृष्णापि गृहिणोपोष्या

शयनीबोधिनीमध्ये या कृष्णैकादशी भवेत् ।
सैवोपोष्या गृहस्थेन नान्या कृष्णा कदाचन ।

१ त्वर्धमिति पाठः क. ख. ङ.

इति पाद्मात् । एतच्चापुत्रिगृहिविषयम् । पुत्रवतस्त्वत्रापि निषेधः ।

सङ्क्रान्त्यामुपवासं च कृष्णैकादशिवासरे ।
चन्द्रसूर्यग्रहे चैव न कुर्यात्पुत्रवान् गृही ॥

इति नारदोक्तेः ।

आदित्येऽहनि सङ्क्रान्तौ ग्रहणे चन्द्रसूर्ययोः ।
पारणं चोपवासं च न कुर्यात्पुत्रवान् गृही ॥
तत्प्रयुक्तोपवासस्य निषेधोऽयमुदाहृतः ।
प्रयुक्त्यन्तरयुक्तस्य न विधिर्न निषेधनम् ॥

इति जैमिनिस्मृतेश्च । स्मृत्यन्तरेऽपि—

विधवाया वनस्थस्य यतेश्चैकादशीद्वये ।
उपवासो गृहस्थस्य शुक्लायामेव पुत्रिणः ॥ इति ।

हेमाद्रिरप्येवम् । काम्यायां कृष्णापवादमाह नारदः—

पुत्रवांश्च सभार्यश्च बन्धुयुक्तस्तथैव च ॥
उभयोः पक्षयोः काम्यं व्रतं कुर्यात्तु वैष्णवम् ॥ इति ।

वैष्णवैस्तु कृष्णाप्युपोष्येत्याह स एव—

नित्यं भक्तिसमायुक्तैर्नरैर्विष्णुपरायणैः ।
पक्षे पक्षे च कर्तव्यमेकादश्यामुपोषणम् ॥
सपुत्रश्च सभार्यश्च स जनो भक्तिसंयुतः ।
एकादश्यामुपवसेत्पक्षयोरुभयोरपि ॥

तत्रैकादशी द्वेधा । शुद्धा दशमीविद्धा च । आद्या गारुडे—

उदयात्प्राग्यदा विप्र मुहूर्तद्वयसंयुता ।
संपूर्णैकादशी ज्ञेया तत्रैवोपवसेद्गृही ॥ इति ।

गृही वैष्णवः । स्मार्तविषये तु तत्रैव—

आदित्योदयवेलायामारभ्य षष्टिनाडिकाः ।
संपूर्णैकादशी नाम कार्या धर्मफलेप्सुभिः ॥ इति ।

दशमीविद्धापि द्वेधा । अरुणोदयवेलायां सूर्योदये च दशमीसत्त्वेन ।
तत्राऽऽद्या भविष्यपुराणे—

अरुणोदयकाले तु दशमी यदि दृश्यते ।
सा विद्धैकादशी तत्र पापमूलमुपोषणम् ॥

---

१ अरुणोदये सूर्योदये इति पाठः क. ख. ग.

तथा— अरुणोदयवेलायां दिशागन्धो भवेद्यदि ।
दुष्टं तत्तु प्रयत्नेन वर्जनीयं नराधिप ॥

दिशा दशमी ।

दशमीशेषसंयुक्तो यदि स्यादरुणोदयः ।
नैवोपोष्यं वैष्णवेन तद्दिनैकादशीव्रतम् ॥

इत्यादिभिर्वाक्यैररुणोदये दशमीसत्त्व एकादशी विद्धा । यदपि सौरधर्मेषु—

आदित्योदयवेलायां या मुहूर्तद्वयान्विता ।
सैकादशी तु संपूर्णा विद्धान्या परिकीर्तिता ॥ इति ।

तदप्यरुणोदयवेलायां दशमीसत्त्व एकादश्या विद्धत्वपरं, मुहूर्तद्वयस्यारुणोदयपरिमाणत्वात् । अत एव हेमाद्रौ स्मृतिः—

निशिप्रान्ते तु यामार्द्धे देववादित्रवादने ।
सारस्वतानध्ययने चारुणोदय उच्यते ॥ इति ।

यामार्द्धमपि मुहूर्तद्वयमेव । यत्तु—

उदयात्प्राक्चतस्रस्तु नाडिका अरुणोदयः ॥ इति ।

तदपि द्वात्रिंशद्घटिकारात्रिमानपक्षे मुहूर्तद्वयस्य तावत्परिमाणत्वादुक्तमिति तातचरणाः । यदपि ब्रह्मवैवर्तीयम् ।

चतस्रो घटिकाः प्रातररुणोदयनिश्चयः ।
चतुष्टयविभागोऽत्र वेधादीनां किलोदितः ॥
अरुणोदयवेधः स्यात्सार्द्धं तु घटिकात्रयम् ।
अतिवेधो द्विघटिकः प्रभासंदर्शनाद्रवेः ॥
महावेधोऽपि तत्रैव दृश्यतेऽर्को न दृश्यते ।
तुरीयस्तत्र विहितो योगः सूर्योदये सति ॥

इत्यरुणोदयवेधातिवेधमहावेधयोगसंज्ञाकरणमर्वाग्दोषातिशयार्थम् । सार्द्धं तु घटिकात्रयं चतस्रो घटिकाः इति द्विमुहूर्तरूपानुगतव्यवहारार्थं, तावत्परिमाणस्यापि मुहूर्तद्वयस्य रात्रिमानवशेन कदाचित्संभवान्मुहूर्तद्वयारुणोदयपरमेव । यत्तु ब्रह्मवैवर्ते—

अर्द्धरात्रे तु केषांचिद्दशम्या वेध इष्यते ।
कपालवेध इत्याहुराचार्या ये हरिप्रियाः ॥ इति ।

तत्कैमुतिकरीत्या अरुणोदयवेधनिन्दार्थमिति माधवः । तत्त्वं तु पूर्वचतुर्यामेषु व्रतसङ्कल्पपूजावर्जनार्थमित्यनुपदमेव वक्ष्यते । यदपि—

नागो द्वादशनाडीभिर्दिक्पञ्चदशभिस्तथा ।
भूतोऽष्टादशनाडीभिर्दूषयत्युत्तरां तिथिम् ॥

इति स्कान्दे । तद्व्यवस्थोक्ता निगमे—

सर्वप्रकारवेधोऽयमुपवासस्य दूषकः ।
सार्द्धसप्तमुहूर्तैस्तु योगोऽयं बाधते व्रतम् ॥ इति ।

व्रतमुपवासभिन्नमिति माधवः । तत्रारुणोदयवेधो वैष्णवपरः, तद्वाक्ये वैष्णवग्रहणात् । परिशेषात्सूर्योदयवेधो वैष्णवभिन्नपरः । त एव स्मार्त्त-पदेन व्यवह्रियन्ते ग्रन्थेषु । वैष्णवलक्षणं तु गारुडे—

वैखानसाद्यागमोक्तदीक्षां प्राप्तो हि वैष्णवः ।

माधवीये स्कान्देऽपि—

परामापदमापन्नो हर्षे वा समुपस्थिते ।
नैकादशीं त्यजेत्सोऽपि यस्य दीक्षास्ति वैष्णवी ॥

अन्यच्च— विष्ण्वर्पिताखिलाचारः स हि वैष्णव उच्यते ।

भविष्येऽपि—

यथा शुक्ला तथा कृष्णा यथा कृष्णा तथोत्तरा ।
तुल्ये ते मन्यते यस्तु स हि वैष्णव उच्यते ॥

तत्र शुद्धैकादशी चतुर्द्धा । अधिकैकादशिका । अधिकद्वादशिका । उभयाधिका । अनुभयाधिका चेति । एवं विद्धापि । शुद्धायामेकाद-श्याधिक्ये नारदः—

संपूर्णैकादशी यत्र द्वादश्यां वृद्धिगामिनी ।
द्वादश्यां लङ्घनं कार्यं त्रयोदश्यां तु पारणम् ॥

इति माधवाद्यनुसारिणः । वस्तुतस्तु वैष्णवानां शुद्धाधिकोनद्वादशि-कोदाहरणस्य ज्योतिःशास्त्रेऽप्रसिद्धत्वान्नारदवचनं निष्कामस्मार्तविषयं ज्ञेयम् । तेन वैष्णवानां शुद्धा त्रिविधैव । तादृशस्मार्ते प्रत्येवेदृग्विषये शक्तस्योपवासद्वयमाह बृहद्यमः—

संपूर्णैकादशी यत्र प्रभाते पुनरेव सा ।
लुप्यते द्वादशी तत्र उपवासः कथं भवेत् ।
उपोष्ये द्वे तिथी तत्र विष्णुप्रीणनतत्परैः ॥ इति ।

विष्णुप्रीणनतत्परा वैष्णवाः । शुद्धाया द्वादशीमात्राधिक्ये परेद्युरुप-वासः । तथा च भागवतादितन्त्रे ।

संपूर्णैकादशी त्याज्या परतो द्वादशी यदि ।

उपोष्या द्वादशी शुद्धा द्वादश्यामेव पारणम् ॥

शुद्धायामेवैकादशीमात्राधिक्ये तदितरस्मार्त्तान्प्रति तु स्कान्दे—

प्रथमेऽहनि संपूर्णा याप्यहोरात्रसंयुता ।
द्वादश्यां तु तथा तात दृश्यते पुनरेव च ।
पूर्वा कार्या गृहस्थैश्च यतिभिश्चोत्तरा विभो ॥ इति ।

एतच्च परेद्युर्द्वादश्यभावपरम् । गारुडेऽपि—

पुनः प्रभातसमये घटिकैका यदा भवेत् ।
तत्रोपवासो विहितो वनस्थस्य यतेस्तथा ।
विधवायाश्च तत्रैव परतो द्वादशी न चेत् ॥ इति ।

शुद्धायां द्वादशीमात्राधिक्ये तु नारदः—

नचेदेकादशी विष्णौ द्वादशी परतः स्थिता ।
उपोष्यैकादशी तत्र यदीच्छेत्परमं पदम् ॥ इति ।

विष्णौ द्वादश्यां । उभयाधिक्ये तु शुद्धा विद्धा च सर्वैः परैव कार्या ।

संपूर्णैकादशी यत्र प्रभाते पुनरेव सा ।
सर्वैरेवोत्तरा कार्या परतो द्वादशी यदि ॥

इति गारुडात् । यत्तु हेमाद्रौ पाद्मे—

विद्धाप्यविद्धा विज्ञेया परतो द्वादशी न चेत् ।
अविद्धापि च विद्धा स्यात्परतो द्वादशी यदि ॥ इति ।

तदप्युभयवृद्धौ ज्ञेयम् । अनुभयाधिक्ये त्वसन्देह एव । विद्धैकादश्याधिक्ये तु प्रचेताः—

एकादशी विवृद्धा चेच्छुक्ले कृष्णेऽविशेषतः ।
उत्तरां तु यती कुर्यात्पूर्वामुपवसेद्गृही ॥ इति ।

अरुणोदयविद्धायां 'द्वादशीमात्राधिक्ये तु परेद्युरुपोष्या । तदाह व्यासः—

एकादशी यदा लुप्ता परतो द्वादशी भवेत् ।
उपोष्या द्वादशी तत्र यदीच्छेत्परमां गतिम् ॥'

इति माधवः । तन्न । तत्र लोपपदस्य सूर्योदयास्पर्शाख्येऽवमे प्रसिद्धया सूर्योदयगतदशमीविद्धायामेतद्वचनप्रवृत्तेः । अतो नेदं शुद्धन्यूनाधिकद्वादशिकायामुत्तरदिन उपवासविधायकम् । यदपि कैश्चिदलुप्तेति छित्वेदमेतत्परतया योजितं तच्चिन्त्यम् । अकारप्रश्लेषे मानाभावात् । दिनक्षये तु पुत्रवद्गृहस्थेनोपवासो न कार्यः । तदाह पितामहः—

एकादश्यां दिनक्षये उपवासं करोति यः ।
तस्य पुत्रा विनश्यन्ति मघायां पिण्डदो यथा ॥ इति ।

दिनक्षयस्तु पाद्मे—

द्वौ तिथ्यन्तावेकवारे यस्मिन्स स्याद्दिनक्षयः ॥ इति ।

दिनक्षये च उपवासस्य निषेधः स निराहारस्यैव । तथा च वायवीये—

उपवासनिषेधे तु भक्ष्यंकिञ्चित्प्रकल्पयेत् ।
न दुष्यत्युपवासेन उपवासफलं लभेत् ।

एवं कृष्णैकादश्यादावपि गृहस्थस्य ।

तत्रैव—नक्तं हविष्यान्नमनोदनं वा
फलं तिलाः क्षीरमथाम्बु वाज्यम् ॥
यत्पञ्चगव्यं यदिवाऽपि वायुः
प्रशस्तमत्रोत्तरमुत्तरं च ॥ इति ।

व्रते विशेषः स्मृत्यन्तरे—

दशम्यादि महीपाल त्रिदिनं परिवर्जयेत् ।
गन्धताम्बूलपुष्पादि स्त्रीसंभोगं महायशाः ॥

स्त्रीसंभोगनिषेधस्तु ऋतुकालादन्यत्रेति आह्निकान्त उक्तम् ।

स्कान्दे—कांस्यं मांसं मसूरं च क्षौद्रं चानृतभाषणम् ।
पुनर्भोजनमायासं दशम्यां परिवर्जयेत् ॥

कौर्मे— कांस्यं मांसं मसूरं च चणकान्कोरदूषकान् ।
शाकं मधु परान्नं च त्यजेदुपवसन् स्त्रियम् ॥

मात्स्ये— कांस्यं मांसं सुरां क्षौद्रं तैलं वितथभाषणम् ।
व्यायामं च प्रवासं च दिवास्वापं च मैथुनम् ॥
तिलपिष्टं मसूरं च दशम्यादिषु वर्जयेत् ।

दशमीं प्रकृत्य नारदीये—

अक्षारलवणाः सर्वे हविष्यान्ननिषेविणः ।
अवनीतलपशयनाः प्रियासङ्गविवर्जिताः ॥

अन्यत्रापि—

दशम्यामेकभक्तं तु कुर्वीत नियतेन्द्रियः ।
आचम्य दन्तकाष्ठं तु खादेत तदनन्तरम् ॥
ततश्चानन्तरं विप्रब्रह्मचारी जितेन्द्रियः ।

रात्रिं नयेत्ततः पश्चात्प्रातः स्नात्वा समाहितः ॥
उपवासं तु संकल्प्य मन्त्रपूतं जलं पिबेत् ।
दशम्यामेकभक्तं तु काम्यैकादशीपरम् ।
सायमाद्यन्तयोरह्नोः सायं प्रातश्च मध्यमे ।
उपवासफलं प्रेप्सुर्जह्याद्भुक्तचतुष्टयम् ॥
अथ नित्योपवासी चेत्सायं प्रातर्भुजिक्रियाम् ।
वर्जयेद्भक्तिमान् विप्रः संप्राप्ते हरिवासरे ॥

इति विष्णूक्तेः,

दशम्यामेकभुक्तस्तु मांसमैथुनवर्जितः ।
एकादशीमुपवसेत्पक्षयोरुभयोरपि ॥
देवतास्तस्य तुष्यन्ति कामितं चास्य सिद्ध्यति ॥

इति देवलोक्तेश्च । अन्येपि दिनत्रयनियमा नित्यव्रते नावश्यकाः । तथा च ब्रह्मवैवर्ते—

इति विज्ञाय कुर्वीतावश्यमेकादशीव्रतम् ।
विशेषनियमाशक्तोऽहोरात्रं भुक्तिवर्जितः ॥ इति ।

कात्यायनोऽपि—

शक्तिमांस्तु पुनः कुर्यान्नियमं सविशेषणम् ॥ इति ।

ब्रह्मवैवर्ते—

प्राप्ते हरिदिने सम्यग्विधाय नियमं निशि ।
दशम्यामुपवासस्य प्रकुर्याद्वैष्णवं व्रतम् ॥

देवलः—

गृहीत्वौदुम्बरं पात्रं वारिपूर्णमुदङ्मुखः ।
उपवासं तु गृह्णीयाद्यथा संकल्पयेद्बुधः ॥

औदुम्बरं ताम्रमयम् । यथासंकल्पयेद्यथाकामं फलमुल्लिखेदित्यर्थः । वाराहे 'इत्युच्चार्य ततो विद्वान् पुष्पाञ्जलिमथार्पयेत्' । इत्युच्चार्य संकल्प्येत्यर्थः ।

अष्टाक्षरेण मन्त्रेण त्रिर्जप्तेनाभिमन्त्रितम् ।
उपवासफलं प्रेप्सुः पिबेत्पात्रगतं जलम् ॥

पूर्वोक्तकपालवेधे तु विशेषो नारदीये—

दशम्यां सङ्गदोषेण अर्द्धरात्रात्परेण तु ॥
वर्जयेच्चतुरो यामान्सङ्कल्पार्चनयोः सदा ।

विद्धोपवासेऽनश्नंस्तु दिनं त्यक्त्वा समाहितः ॥
रात्रौ संपूजयेद्विष्णुं संकल्पं तु तदा चरेत् ।

पूजाप्रकारश्च ब्राह्मे—

एकादश्यामुभे पक्षे निराहारः समाहितः ।
नानापुष्पैर्मुनिश्रेष्ठ विचित्रं मण्डपं शुभम् ॥

कृत्वेति शेषः ।

स्नात्वा सम्यग्विधानेन सोपवासो जितेन्द्रियः ।
संपूज्य विधिवद्विष्णुं श्रद्धया सुसमाहितः ॥
पुष्पैर्गन्धैस्तथा धूपैर्दीपैर्नैवेद्यकैः परैः ।
उपचारैर्बहुविधैर्जपहोमैः प्रदक्षिणैः ।
स्तोत्रैर्नानाविधैर्दिव्यैर्गीतवाद्यमनोहरैः ।
दण्डवत्प्रणिपातैश्च जयशब्दैस्तथोत्तमैः ॥
एवं संपूज्य विधिवद्रात्रौ कृत्वा प्रजागरम् ।
याति विष्णोः परं स्थानं नरो नास्त्यत्र संशयः ॥ इति ।

विशेषो बृहन्नारदीये—

पञ्चामृतेन संस्नाप्य एकादश्यां जनार्दनम् ।
द्वादश्यां पयसा स्नाप्य हरिसारूप्यमश्नुते ॥ इति ।

सूतकादौ तु वाराहे—

सूतके च नरः स्नात्वा प्रणम्य मनसा हरिम् ।
एकादश्यां न भुञ्जीत व्रतमेवं न लुप्यते ।
मृतकेऽपि न भुञ्जीत एकादश्यां सदा नरः ॥ इति ।

स्त्रीणां रजोदर्शने त्वाह माधवीये ऋष्यशृङ्गः—

संप्रवृत्तेऽपि रजसि न त्याज्यं द्वादशीव्रतम् ॥ इति ।

एकादश्यां श्राद्धप्राप्तौ त्वाह माधवीये स एव—

उपवासो यदा नित्यः श्राद्धं नैमित्तिकं यदा ।
उपवासं तदा कुर्यादाघ्राय पितृसेवितम् ॥ इति ।

उपवासासामर्थ्ये त्वाह माधवीये मार्कण्डेयः—

एकभक्तेन नक्तेन तथैवायाचितेन च ।
उपवासेन दानेन न निर्द्वादशिको भवेत् ॥

हेमाद्रौ पुराणे—

उपवासासमर्थश्चेदेकं विप्रं तु भोजयेत् ।
तावद्धनानि वा दद्याद्भुक्तश्चेद्द्विगुणं तथा ॥
सहस्रसंमितां देवीं जपेद्वा प्राणसंयमान् ।
कुर्याद्द्वादशसङ्ख्याकान्यथाशक्त्यातुरो नरः ॥

व्रताकरणे प्रायश्चित्तं स्मृत्यन्तरे—

अर्के पर्वद्वये रात्रौ चतुर्दश्यष्टमी दिवा ।
एकादश्यामहोरात्रं भुक्त्वा चान्द्रायणं चरेत् ॥ इति ।

निर्जलैकादशी ।

ज्येष्ठशुक्लैकादशी निर्जला ।

ज्येष्ठे मासि नृपश्रेष्ठ या शुक्लैकादशी भवेत् ।
निर्जलं समुपोष्यात्र जलकुम्भान्सशर्करान् ।
प्रदाय विप्रमुख्येभ्यो मोदते विष्णुसन्निधौ ॥

इतिस्कान्दोक्तेः ।

विष्णुशयनव्रतम् ।

आषाढशुक्लैकादश्यां विष्णुशयनम् ।

ब्राह्मे— एकादश्यां तु शुक्लायामाषाढे भगवान्हरिः ।
भुजङ्गशयने शेते क्षीरार्णवजले सदा ॥

स्वापविधिर्भविष्ये—

महापूजां ततः कुर्याद्देवदेवस्य चक्रिणः ।
जातीकुसुममालाभिर्मन्त्रेणानेन पूजयेत् ॥
सुप्ते त्वयि जगन्नाथ जगत्सुप्तं भवेदिदम् ।
विबुद्धे च विबुध्येत प्रसन्नो मे भवाच्युत ॥ इति ।

चातुर्मास्यव्रतम् ।

अत्रैव चातुर्मास्यव्रतारम्भ उक्तो महाभारते—

आषाढे तु सिते पक्षे एकादश्यामुपोषितः ।
चातुर्मास्यव्रतं कुर्याद्यत्किञ्चिन्नियतो नरः ॥ इति ।

व्रतानि चातुर्मास्यप्रकरणे वक्ष्यन्ते । चातुर्मास्यव्रतारम्भस्य कालान्तरमपि ब्रह्मवैवर्ते—

एकादश्यां तु गृह्णीयात्संक्रान्तौ कर्कटस्य च ।

आषाढ्यां वा नरो भक्त्या चातुर्मास्यव्रतक्रियाम् ॥ इति ।

व्रतग्रहणप्रकारो भविष्ये—

प्रभाषेताग्रतो विष्णोः कृताञ्जलिपुटस्तथा ।
चतुरो वार्षिकान्मासान्देवस्योत्थापनावधि ॥
इमं करिष्ये नियमं निर्विघ्नं कुरु मेऽच्युत ।
इदं व्रतं मया देव गृहीतं पुरतस्तव ॥
निर्विघ्नं सिद्धिमायातु प्रसादात्तव केशव ।
गृहीतेऽस्मिन्व्रते देव पञ्चत्वं यदि मे भवेत् ॥
तदा भवतु संपूर्णं त्वत्प्रसादाज्जनार्दन ।

गार्ग्यः— न शैशवं न मौढ्यं च शुक्रगुर्वोर्न वा तिथेः ।
खण्डत्वं चिन्तयेच्चातुर्मास्यव्रतविधौ नरः ॥ इति ।

एतद्द्वितीयाद्यारम्भे प्रथमारम्भस्तु न भवतीति कश्चित् । तत्तुच्छम् । व्यवस्थायां मानाभावात् । यदपि हेमाद्रौ चातुर्मास्यव्रतप्रकरणे भविष्ये—

असंक्रान्तं तथा मासं दैवे पित्र्ये च कर्मणि ।
मलमासमशौचं च वर्जयेन्मतिमान्नरः ॥ इति ।

तदारम्भसमाप्त्योरन्तरालमासे व्रताननुवृत्तिसिध्यर्थमिति केचित् । युक्तं तु—

श्रावणे वर्जयेच्छाकं दधि भाद्रपदे त्यजेत् ।
दुग्धमाश्वयुजे मासि कार्तिके द्विदलं त्यजेत् ॥ इति ।

श्रावणादिमासविशेषव्रताननुवृत्त्यर्थत्वम् । 'स्पष्टमासविशेषाख्याविहितं वर्जयेन्मले' इतिवचनात् । चातुर्मास्यव्रतानि त्वन्तरा मलमासेऽप्यनुवर्तन्त एवेति परे । नित्यानामारम्भः काम्यानां तु वर्जनमिति युक्तम् ।

एकादश्यामाशौचे पौर्णिमायां कर्कसङ्क्रान्तौ वाऽऽरभेत । त्रितयत्राप्याशौचे नारम्भ एव—

आरब्धे सूतकं न स्यादनारब्धे तु सूतकम् ॥

इतिविष्णूक्तेः । यत्त्वर्चनदीपिकायां स्कान्दे—

अशुचिर्वा शुचिर्वाऽपि यदि स्त्री यदि वा पुमान् ।
व्रतमेतन्नरः कृत्वा मुच्यते सर्वपातकैः ॥ इति ।

तदारम्भोत्तरं बोध्यम् ।

परिवर्तनं हरेः ।

भाद्रशुक्लैकादश्यां विष्णोरङ्गपरिवर्तनमुक्तं भविष्योत्तरे—

प्राप्ते भाद्रपदे मासि एकादश्यां दिने सिते ।
कटिदानं भवेद्विष्णोर्महापातकनाशनम् ॥ इति ।

कटिदानमङ्गपरिवर्तनम् ।

देवोत्थापनाविधिः ।

कार्त्तिकशुक्लैकादश्यां देवस्योत्थापनमुक्तं हेमाद्रौ पाद्मे—

एकादश्यां तु शुक्लायां कार्तिके मासि केशवम् ।
प्रसुप्तं बोधयेद्रात्रौ श्रद्धाभक्तिसमन्वितः ॥ इति ।

उत्थापनविधिर्भविष्ये—

तथैव देवदेवस्य स्नानपूर्वं महद्भवेत् ।
महापूजां ततः कृत्वा देवमुत्थापयेत्सुधीः ॥

रामार्चनचन्द्रिकायाम्—

इदं विष्णुरनेनाम्बुतल्पादुत्थापयेत्प्रभुम् ।

पौराणमन्त्रः—

महेन्द्ररुद्राग्निकुबेरसूर्यसोमादिभिर्वन्दित वन्दनीय ।
बुध्यस्व देवेश जगन्निवास मन्त्रप्रभावेण सुखेन देव ॥
इयं तु द्वादशी देव प्रबोधाय विनिर्मिता ।
त्वयैव सर्वलोकानां हितार्थं शेषशायिना ॥
उत्तिष्ठोत्तिष्ठ गोविन्द त्यज निद्रां जगत्पते ।
त्वयि सुप्ते जगन्नाथ जगत्सुप्तं भवेदिदम् ॥
उत्थिते चेष्टते सर्वमुत्तिष्ठोत्तिष्ठ माधव ।
गता मेघा वियच्चैव निर्मलं निर्मला दिशः ॥
शारदानि च पुष्पाणि गृहाण मम केशव ॥ इति ।

ततस्तदग्रे व्रतं समापयेत् । मन्त्रश्च निर्णयामृते—

इदं व्रतं मया देव कृतं प्रीत्यै तव प्रभो ।
शून्यं संपूर्णतां यातु त्वत्प्रसादाज्जनार्दन ॥ इति ।

यत्तु वाराहे—

आषाढमासे द्वादश्यां सर्वशान्तिकरं शुभम् ।

इत्यादिना द्वादश्यां शयनादिकमुक्तम् । तन्मिथुनार्के एव

आभाकाद्येषु मासेषु मिथुने माधवस्य च ।
द्वादश्यां शुक्लपक्षे च प्रस्वापावर्तनोत्सवः ॥

इति भविष्योक्तेः । तत्रैव—

आभाकासितपक्षेषु मैत्रश्रवणरेवती ।
आदिमध्यावसानेषु प्रस्वापावर्तनोत्सवाः ॥ इति ।

रेवतीत्यत्र सप्तमीलोपः । उत्सवो जागरः । मात्स्ये—

निशि स्वापो दिवोत्थानं सन्ध्यायां परिवर्तनम् ।

निशादौ नक्षत्रपादयोगानामभावे नक्षत्रमात्रयोगोऽपि ग्राह्यः '. पादयोगो यदा न स्यादृक्षेणाऽपि सदा भवेत् ' इति वाराहपुराणात् ।

द्वादश्यामृक्षसंयोगे पादयोगो न कारणम् ।

इति विष्णुधर्मोत्तराच्च । द्वादश्यामेकदेशेनापि नक्षत्रयोगाभावे एकादश्यां त्रयोदश्यां वा प्रस्वापादि कार्यम् ।

अप्राप्ते द्वादशीमृक्षे उत्थानशयने हरेः ।
पादयोगेन कर्त्तव्यं नाहोरात्रं विचिन्तयेत् ।

इति जीमूतवाहनोदाहृतवचनात् । एवं च द्वादश्यां निशाद्यादरेऽन्यतिथौ च नक्षत्रपादयोगादरे नियते सति यदा द्वादशीषु निशादेरन्यत्र तत्तदृक्षभागयोगोऽन्यतिथौ च तदितरनक्षत्रस्यैव योगः तदा द्वादशीषु संन्ध्यायां प्रस्वापादि ।

द्वादश्यां सन्धिसमये नक्षत्राणामसंभवे ।
आभाकासितपक्षेषु शयनावर्तनादिकम् ॥

इति वाराहवचनात् । सन्धिसमय इति शयनादावन्वेति । सन्धिसमयश्च सायंसन्ध्यैव ।

रेवत्यन्तो यदा रात्रौ द्वादश्यां च समागतः ।
तदा विबुध्यते विष्णुर्दिनान्ते प्राप्य रेवतीम् ॥

इति जीमूतवाहनोदाहृतवचनात् । आषाढकार्तिकपौर्णमास्योरपि स्वापप्रबोधावाह यमः—

क्षीराब्धौ शेषपर्यङ्के आषाढ्यां संविशेद्धरिः ।
निद्रां त्यजति कार्तिक्यां तयोः संपूजयेद्धरिम् ॥
ब्रह्महत्यादिकं पापं क्षिप्रमेव व्यपोहति ॥ इति ।

यत्त्वाषाढस्येयं कार्तिकस्येयमिति स्वविषयेऽप्यौत्सर्गिकानुकरणेनाषाढीकार्त्तिकीपदे एकादशीपरे एवेति । तदयुक्तम्—

आषाढशुक्लपक्षान्ते भगवान्मधुसूदनः ।
भोगिभोगे निजां मायां योगनिद्रां समाप्नुयात् ॥

इति विष्णुधर्मोत्तरात् । यदपि द्वादशीपदमेकादशीपरमिति तदपि न, प्रमाणाभावात् । एतेषां च पक्षाणां यथासंप्रदायं व्यवस्था । श्रीरामस्य तु पारणोत्तरं द्वादशीमध्ये त्रयोदशीमध्ये वा पूर्वरात्रौ स्वापोत्सवः ।

पारणाहे पूर्वरात्रौ घण्टादीन्वादयन्मुहुः ।
विधाय महतीं पूजां विष्णुमभ्यर्च्य वैष्णवान् ॥

इति रामार्चनचन्द्रिकोक्तेः । शिष्टास्तु सर्वदेवानामपि पारणोत्तरमेव रात्रौ कुर्वन्ति । यत्तु मोहचूडोत्तरे—

मिथुनस्थे यदा भानुरमावास्याद्वयं स्पृशेत् ।
द्विराषाढः स विज्ञेयो विष्णुः स्वपिति कर्कटे ॥ इति

तदुत्तरवर्षगतकर्कार्कस्वापपरमिति माधवः—

मेषादिमिथुनान्तेषु यदा दर्शद्वयं भवेत् ।
अब्दान्तरे तदावश्यं कर्कटार्के हरिः स्वपेत् ॥
कर्कटादित्रिके वापि यदा दर्शद्वयं भवेत् ।
अब्दान्तरे तदावश्यं मिथुनार्के हरिः स्वपेत् ॥

इति वाराहमिहिरोक्तेः । भविष्ये—

श्रावणे वर्जयेच्छाकं दधि भाद्रपदे तथा ।
दुग्धमाश्वयुजे मासि कार्तिके द्विदलं त्यजेत् ॥ इति ।
मूलपत्रकरीराग्रफलकाण्डविरूढकाः ।
त्वक्पुष्पं कवकं चेति शाकं दशविधं स्मृतम् ॥ इति ।

करीरं वंशांकुरः विरूढिकास्तिनिन्यः । कवकं शिलीन्ध्रम् ।

द्विदलं च स्कान्दे—

माषमुद्गमसूराश्च चणकाश्च कुलत्थकाः ।
निष्पावा राजमाषाश्च आढक्यो द्विदलं स्मृतम् ॥ इति ।

इत्येकादशीनिर्णयः ।

अथ द्वादशी ।

सा च पूर्वा । रुद्रेण द्वादशी युक्ता इति युग्मवचनात् । माधवीये स्कान्दे—

---

१ शाकपदं दशसुयोगरूढम् ।

द्वादशी च प्रकर्तव्या एकादश्या युता प्रभो । इति ।

एकादशीपारणविषये माधवीये—

कलाद्वयं त्रयं वाऽपि द्वादशीं न त्वतिक्रमेत् ।
पारणे मरणे नृणां तिथिस्तात्कालिकी स्मृता ॥ इति ।

अल्पद्वादश्यां विशेषः स्कान्दे—

यदा भवेदतीवाल्पा द्वादशी पारणादिने ।
उषःकाले द्वयं कुर्यात्प्रातर्माध्याह्निकं च तत् ॥ इति ।

तत्र कथञ्चित्पारणासंभवे त्वाह देवलः—

सङ्कटे विषमे प्राप्ते द्वादश्यां पारयेत्कथम् ।
अद्भिस्तु पारणं कुर्यात्पुनर्भुक्तं न दोषकृत् ॥ इति ।

सङ्कटं त्रयोदशीनिमित्तकं श्राद्धस्नानदानादिकमन्यद्वा किञ्चित् । द्वादश्यामल्पायामिति शेषः । सर्वथा द्वादश्यभावे तूक्तं नारदीये ।

त्रयोदश्यां तु शुद्धायां पारणं पृथिवीफलम् ।
शतयज्ञाधिकं वाऽपि नरः प्राप्नोत्यसंशयम् ॥ इति ।

अत्र हरिवासरस्वरूपं तद्वर्जनं चोक्तं निर्णयामृते विष्णुधर्मोत्तरे—

द्वादश्याः प्रथमः पादो हरिवासरसंज्ञितः ।
अतिक्रम्य तु कर्तव्यं पारणं विष्णुतत्परैः ॥ इति ।

चैत्रशुक्लद्वादश्यां दमनकारोपणमुक्तमगस्त्यसंहितायाम् ।

द्वादश्यां चैत्रमासस्य शुक्लायां दमनोत्सवः ।
बौधायनादिभिः प्रोक्तः कर्तव्यः प्रतिवत्सरम् ॥

तत्र प्रथमं देवप्रार्थना—

क्रियालोपविघातार्थं यत्त्वया विहितं प्रभो ।
न मे विघ्नो भवेदत्र कुरु नाथ दयां मयि ॥
सर्वथा सर्वदा विष्णो मम त्वं परमा गतिः ।
देव त्वामुपवासेन तोषयामि जगत्पते ॥
कामक्रोधादयोऽप्येते न मे स्युर्व्रतघातकाः ।
अद्यप्रभृति देवेश यावद्वैशेषिकं दिनम् ॥
तावद्रक्षा त्वया कार्या सर्वस्यास्य नमोऽस्तु ते ।
एवं विज्ञाप्य देवेशं गुरुपादौ प्रणम्य च ॥
प्रातः स्नात्वा समभ्यर्च्य देवेशं विधिवन्नरः ।
गच्छेद्दमनकाराममेकादश्यां सुशोभितम् ॥

क्रमेणादाय तत्रैव पूजयेच्चन्दनादिना ।
नेष्यामि राजपूजार्थमिति संप्रार्थ्य तं नमेत् ॥
उत्पाट्य पञ्चगव्येन प्रोक्ष्य प्रक्षाल्य वारिणा ।
धौतेन वाससाऽऽच्छाद्य निधाय पटले नवे ॥

पटले वंशादिपात्रे । घण्टापुरुषसूक्तादिस्वनैः स्वगृहमानयेत् ।
ततो गृहमागत्य देवं प्रार्थयेत्—

आमन्त्रितोऽसि देवेश पुराणपुरुषोत्तम ।
प्रातस्त्वां पूजयिष्यामि सान्निध्यं कुरु केशव ॥
क्षीरोदधिमहानागशय्यासंस्थितविग्रह ।
प्रातस्त्वां पूजयिष्यामि सन्निधौ भव ते नमः ॥
निवेदयाम्यहं तुभ्यं प्रातर्दमनकं शुभम् ।
सर्वथा सर्वदा विष्णो नमस्तेऽस्तु प्रसीद मे ॥
इत्थमामन्त्र्य दत्त्वाऽथ तस्मै पुष्पाञ्जलिं पुनः ।
पूजितं तद्दमनकं कुम्भस्योपरि संस्थितम् ॥
अस्त्रेण सर्वतो रक्षेत्कवचेनावगुण्ठयेत् ।
रक्षेद्वा चक्रमन्त्रेण नृहरेर्मनुनाऽथ वा ॥

ततो ब्राह्मणान्गुरून्प्रणम्य गीतवाद्यादिभी रात्रौ जागरणं कुर्यात्, ततः प्रातरुत्थाय स्नानाद्याह्निकं नित्यपूजां च कृत्वा नैमित्तिकं कुर्यात्—तद्यथा पूर्वदिनाधिवासितं दमनकं दूर्वादलसहितं गृहीत्वा—

ॐ देवदेवजगन्नाथ वाञ्छितार्थप्रदायक ।
हृदिस्थान्पूरयन्कामान्मम कामेश्वरीप्रिय ॥
इदं दमनकं देव गृहाण मदनुग्रहात् ।
इमां सांवत्सरीं पूजां भगवन्परिपूरय ॥

इति मूलमन्त्रसंपुटितेन मन्त्रेण देवाय दमनकमर्पयेत् । तत उत्तर-प्रार्थना—

मणिविद्रुममालाभिर्मन्दारकुसुमादिभिः ।
इयं सांवत्सरी पूजा तवास्तु गरुडध्वज ॥
वनमालां यथा देव कौस्तुभं सततं हृदि ।
तद्वद्दामनकीं मालां पूजां च हृदये वह ॥
जानताऽजानता वाऽपि न कृतं यत्तवार्चनम् ।

तत्सर्वं पूर्णतां यातु त्वत्प्रसादाद्रमापते ॥
जितं ते पुण्डरीकाक्ष नमस्ते विश्वभावन ।
नमस्तेऽस्तु हृषीकेश महापुरुष पूर्वज ॥
मन्त्रहीनं क्रियाहीनं भक्तिहीनं जनार्दन ।
यत्पूजितं मया देव परिपूर्णं तदस्तु मे ॥

इति देवं प्रार्थयित्वा दण्डवत्प्रणम्य भूषणवस्त्रादिभिर्गुरुं सपूज्य नत्वा ब्राह्मणान्भोजयेत् । स्वयं च पारणं कुर्यात् । इति दमनकारोपणम् ।

पारणाहे द्वादश्यलाभे तत्रैव—

पारणाहे न लभ्येत द्वादशी घटिकापि वा ।
तदा त्रयोदशी ग्राह्या पवित्रदमनार्पणे ॥

तथा—माधवे दमनारोपः स्यान्मधौ विघ्नितो यदि ।
वैशाख्यां श्रावणे नागे कर्तव्यं दमनार्पणम् ॥ इति ।

माधवे वैशाखे । तद्द्वादश्यामित्यर्थः । नागे पञ्चम्याम् ।

ज्येष्ठशुक्लद्वादश्यां वटसावित्रीव्रतारम्भ उक्तो भविष्ये—

ज्येष्ठे मासि सिते पक्षे द्वादश्यां रजनीमुखे ।
व्रतं त्रिरात्रमुद्दिश्य दिवारात्रि स्थिरा भवेत् ॥ इति ।

आषाढशुक्लद्वादश्यां तप्तमुद्राधारणमाथर्वणश्रुतौ—

तद्विष्णोः परमं पदं ये गच्छन्ति हि लाञ्छिताः । इति ।

नारदीये—

अग्निनैव तु संयुक्तं चक्रमादाय वैष्णवः ।
धारयेत्सर्वगात्राणां विष्णुसायुज्यमश्नुते ॥ इति ।

तच्छूद्रविषयम् । न ब्राह्मणादेः

यथा श्मशानजं काष्ठमनर्हं सर्वकर्मसु ।
तथा चक्राङ्कितो विप्रः सर्वकर्मसु गर्हितः ॥

इत्याश्वलायनोक्तेः ।

द्विजं तु तप्तमुद्रादिलिङ्गाङ्किततनुं नरः ।
संभाष्य रौरवं याति यावदिन्द्राश्चतुर्दश ॥

इति नारदीयात् । तथा—

शङ्खचक्रं मृदा यस्तु कुर्यात्तप्तायसेन वा ।
स शूद्रवद्बहिःकार्यः सर्वस्माद्द्विजकर्मणः ॥ इति ।

शैवपुराणेऽपि—

शङ्खचक्राद्यङ्कनं च गीतनृत्यादिकं तथा ।
एकजातेरयं धर्मो न जातु स्याद्द्विजन्मनः ॥ इति ।

एतेषां च विधिनिषेधानां वैष्णवावैष्णवपरतया व्यवस्थेति केचित् । बहवस्तु द्विविधानामपि निर्मूलतामाहुः ।

श्रावणे शुक्लद्वादश्यां पवित्रारोपणमुक्तं रामार्चनचन्द्रिकायां—

श्रावणस्य सिते पक्षे द्वादश्यां शौनकादिभिः ।
उक्तः सदा प्रकर्तव्यः पवित्रारोपणोत्सवः ॥

पाद्मे— ऊर्ज्जे व्रतं मधौ दोला श्रावणे तन्तुपूजनम् ।
चैत्रे च दमनारोपमकुर्वाणो व्रजत्यधः ॥
पवित्रारोपणं विघ्नाच्छ्रावणे न भवेद्यदि ।
कार्तिक्यवधि शुक्लार्के कर्तव्यमिति नारदः ॥

शुक्लार्कः शुक्लद्वादशी ।

हेमरूप्यमयैः सूत्रैस्तथा कौशेयपद्मजैः ।
कुशैः काशैश्च कार्पासैर्ब्राह्मण्या कर्तितैः शुभैः ॥
कन्यया वा पवित्रं स्यान्न पौंश्चल्यादिभिः कृतैः ।
स्नात्वा त्रिगुणितं सूत्रं त्रिगुणीकृत्य शोधयेत् ॥
पृथक् पृथक् पञ्चगव्यैरद्भिः प्रक्षालयेत्ततः ।
मूलेनाष्टोत्तरशतगायत्र्या रामसंज्ञया ॥
शङ्खोदकेनाभिमन्त्र्य पवित्राणि विनिर्ममेत् ।
तत्रोत्तमं पवित्रं तु षष्ट्या सह शतैस्त्रिभिः ॥
सप्तत्या सहितं द्वाभ्यां पवित्रं मध्यमं स्मृतम् ।
साशीतिना शतेनैव कनिष्ठं तत्समाचरेत् ॥
अष्टोत्तरतदर्द्धार्द्धनवसूत्रीकृतेन वा ।
जानूरुनाभिपर्यन्तमुत्तमादित्रयं भवेत् ॥

अष्टोत्तरसहस्रेण विंशोत्तरयुतेन सप्तत्या वा वनमाला शतं पञ्चाशत्षट्त्रिंशद्ग्रन्थिभिरुत्तमा षट्त्रिंशच्चतुर्दशद्वादशभिरिति केचन । चतुर्विंशद्द्वादशाष्टाभिरित्येके । अङ्गुष्ठपर्वतदर्द्धतदर्द्धपरिमिता ग्रन्थिरुत्तमादेः । स्नात्वा विज्ञापयेद्देवम्—

क्रियालोपविघातार्थं यत्त्वया विहितं विभो ।
मयैतत्क्रियते देव तव तुष्ट्यै पवित्रकम् ॥

न मे विघ्नो भवेदत्र कुरु नाथ दयां मयि ।
सर्वथा सर्वदा विष्णो मम त्वं परमा गतिः ॥
उपवासेन त्वां देव तोषयामि जगत्पते ।
कामक्रोधादयोऽप्येते न मे स्युर्व्रतघातकाः ॥
अद्यप्रभृति देवेश यावद्वैशेषिकं दिनम् ।
तावद्रक्षा त्वया कार्या सर्वस्यास्य नमोऽस्तु ते ॥
कुम्भं पुण्याम्बुनाऽऽपूर्य सर्वतोभद्रके शुभे ।
स्थापयेत्पुरतो विष्णोस्तत्र सूत्राणि पूजयेत् ॥
सांवत्सरस्य यागस्य पवित्रीकरणाय मे ।
विष्णुलोकात्पवित्राद्य आगच्छेह नमोऽस्तु ते ॥
सर्वाभरणचित्राङ्ग सर्वदेवनमस्कृत ।
लावण्यरूपसंपन्न सर्वकर्तः प्रजापते ॥
सर्वमात्मेश सूत्रेऽस्मिन्सान्निध्यं कुरु ते नमः ।
सर्वरत्नोज्वलाकार ब्रह्माण्डब्रह्मरोचिषः ॥
मुकुटोत्तमसर्वाङ्गशिरःसूत्र इहैहि माम् ।
इह ते जगतः कीर्तिः सर्वलावण्यदायिनी ॥
श्रीसूत्र नित्यकल्याण सान्निध्यं कुरु ते नमः ।
मुनिभिर्मन्त्रयेदेतैः पूजयेन्मूलमन्त्रतः ॥
अथ देवकरे विद्वान् गन्धसूत्रसमुद्भवम् ।
वितस्तिमानकं दोरं बध्नीयान्मङ्गलात्मकम् ॥
संवत्सरकृता चार्चा संपूर्णा फलदाऽस्तु मे ।
पवित्रारोपणे चैव सान्निध्यं कुरु ते नमः ॥
विष्णुतेजोद्भवं रम्यं सर्वपातकनाशनम् ।
सर्वकामप्रदं देव तवाग्रे धारयाम्यहम् ॥

इतिमन्त्रः ।

नीराजयेत्ततो देवं मङ्गलाघोषपूर्वकम् ।
मन्त्रेणाथ सुरेशानं देवदेवं तु मन्त्रयेत् ॥
आमन्त्रिताऽसि देवेश पुराणपुरुषोत्तम ।
प्रातस्त्वां पूजयिष्यामि सान्निध्यं कुरु केशव ॥
क्षीरोदधिमहानागशय्यावस्थितविग्रह ।
प्रातस्त्वां पूजयिष्यामि सन्निधौ भव ते नमः ॥

निवेदयाम्यहं तुभ्यं प्रातरेतत्पवित्रकम् ।
सर्वथा सर्वदा विष्णो नमस्तेऽस्तु प्रसीद मे ॥
निपतेद्दण्डवद्भूमौ क्षिप्त्वा पुष्पाञ्जलिं ततः ।
ब्राह्मणेभ्यो नमस्कृत्य गुरुपादौ प्रणम्य च ।
गीतमङ्गलनिर्घोषैः कुर्याज्जागरणं ततः ॥

इत्यधिवासनम् ।

अपरेद्युर्नित्यपूजां विधाय—

ततो मङ्गलनिर्घोषैः शङ्खतूर्यादिनिःस्वनैः ।
गन्धदूर्वाक्षतैर्युक्तं दद्याद्देवाय सूत्रकम् ॥
राम राम नमस्कार्य गृहाणेदं पवित्रकम् ।
पवित्रीकरणार्थाय वर्षपूजाफलप्रदम् ॥
पवित्रं च कुरुष्वाद्य यन्मया दुष्कृतं कृतम् ।
शुद्धो भवाम्यहं देव त्वत्प्रसादात्सुरेश्वर ॥
मूलसंपुटितो ह्येष पवित्रारोपणे मनुः ।
अङ्गाद्यावृतिदेवेभ्यस्ततो दद्यात्स्वनामभिः ॥
नैवेद्यं तु महापूर्वं ततो दद्याच्च भक्तितः ।
नीराजयेत्ततो देवं रमाकान्तं समङ्गलम् ॥
संवीज्य चामरैः पुण्यैर्दर्पणं दर्शयेत्ततः ।
प्रार्थयेद्देवदेवेशं मन्त्रैरेभिर्यथाविधि ॥
मणिविद्रुममालाभिर्मन्दारकुसुमादिभिः ।
इयं सांवत्सरी पूजा तवास्तु गरुडध्वज ॥
वनमालां यथा देव कौस्तुभं सततं हृदि ।
तद्वत्पवित्रपूजां च हृदये वह केशव ॥
जानताऽज्ञानता वाऽपि यत्कृतं तु त्वदर्चनम् ।
केनचिद्विघ्नदोषेण परिपूर्णं तदस्तु मे ॥
मन्त्रहीनं क्रियाहीनं भक्तिहीनं नृकेसरिन् ।
यत्पूजितं मया देव परिपूर्णं तदस्तु मे ॥
अपराधसहस्राणि क्रियन्तेऽहर्निशं मया ।
दासोऽयमिति मां मत्वा क्षमस्व मधुसूदन ॥
ततः पवित्रं गुरवे दद्याद्गन्धादिपूर्वकम् ।
अथैनं पूजयेद्भक्त्या स्वर्णवस्त्रानुलेपनैः ॥

ब्राह्मणान्वैष्णवांश्चैव गन्धपुष्पादिनाऽर्चयेत् ।
मासं पक्षमहोरात्रं त्रिरात्रं धारयेत्तथा ॥
देवे तं सूत्रसन्दर्भं देशकालविवक्षया ।
प्रत्यहं स्नानकार्य्यादौ सूत्राण्युत्तार्य कारयेत् ॥
अथान्ते देवमभ्यर्च्य ततः सूत्रं विसर्जयेत् ।
सांवत्सरीं शुभां पूजां संपाद्य विधिवन्मम ॥
व्रजेदानीं पवित्र त्वं विष्णुलोकं विसर्जितम् ।
यावद्देवपवित्राणि तावत्तिष्ठेत्समाहितः ।
ब्रह्मचारी हविष्याशी देवपूजापरायणः ॥

श्रवणद्वादशी ।

भाद्रशुक्लद्वादशी श्रवणद्वादशी । सा चैकादशीयुतैव, तदुक्तं मात्स्ये—

द्वादशी श्रवणस्पृष्टा स्पृशेदेकादशीं यदि ।
स एव वैष्णवो योगो विष्णुश्रृङ्खलसंज्ञितः ॥
तस्मिन्नुपोष्य विधिवन्नरः सङ्क्षीणकल्मषः ।
प्राप्नोत्यनुत्तमां सिद्धिं पुनरावृत्तिदुर्लभाम् ॥ इति ।

द्वादश्यां श्रवणाभावे तु नारदीये—

यदा न प्राप्यते ऋक्षं द्वादश्यां वैष्णवं क्वचित् ।
एकादशी तदोपोष्या पापघ्नी श्रवणान्विता ॥ इति ।

द्वादश्यामेव श्रवणयोगे तु भविष्ये—

एकादशीमुपोष्यैव द्वादशीं समुपोषयेत् ।
नचात्र विधिलोपः स्यादुभयोर्दैवतं हरिः ॥ इति ।

विधिलोप एकादशीपारणहानिकृतः । अशक्तौ तु मात्स्ये—

द्वादश्यां शुक्लपक्षे तु नक्षत्रं श्रवणं यदि ।
उपोष्यैकादशीं तत्र द्वादश्यां पूजयेद्धरिम् ॥ इति ।

अत्र कृत्यमुक्तं भविष्योत्तरे—

मासि भाद्रपदे शुक्ला द्वादशी श्रवणान्विता ।
सर्वकामप्रदा पुण्या उपवासे महाफला ॥
सङ्गमे सरितां स्नात्वा द्वादशीं समुपोषितः ।
समग्रं समवाप्नोति द्वादशद्वादशीफलम् ॥

विष्णुधर्मोत्तरे—

या राम श्रवणोपेता द्वादशी महती तु सा ।
तस्यामुपोषितः स्नातः पूजयित्वा जनार्दनम् ॥
प्राप्नोत्ययत्नाद्धर्मज्ञ द्वादशद्वादशीफलम् ।
दध्योदनयुतं तस्यां जलपूर्णघटं द्विज ॥
वस्त्रसंवेष्टितं दत्त्वा छत्रोपाहनमेव च ।
न दुर्गतिमवाप्नोति गतिमग्र्यां च विन्दति ।
अक्षय्यस्थानमाप्नोति नात्र कार्या विचारणा ॥ इति ।

पारणे तु विशेषो नारदीये—

तिथिनक्षत्रयोगे तु उपवासो यदा भवेत् ।
पारणं तु न कर्तव्यं यावन्नैकस्य संक्षयः ॥ इति ।

अत्र वरुणासङ्गमे स्नानमुक्तं लैङ्गे—

अतः परं तु संसेव्यं गङ्गावरुणसङ्गमम् ।
श्रवणद्वादशीयोगे बुधवारो यदा भवेत् ।
तदा तस्मिन्नरः स्नात्वा संनिहत्य फलं लभेत् ॥ इति ।

वत्सद्वादशी ।

कार्तिककृष्णा वत्सद्वादशी । सा पूर्वविद्धा । 'रुद्रेण द्वादशी युक्ता' इति युग्मवाक्यात्

वत्सपूजा वटैश्चैव कर्तव्या प्रथमेऽहनि ।

इतिस्मृत्यन्तराच्च । भविष्यत्पुराणे—

सवत्सां तुल्यवर्णां च शीलिनीं गां पयस्विनीम् ।
चन्दनादिभिरालिप्य पुष्पमालाभिरर्चयेत् ॥
अर्घं ताम्रमये पात्रे कृत्वा पुष्पाक्षतैस्तिलैः ।
पादमूले तु दद्याद्वै मन्त्रेणानेन पाण्डव ॥
क्षीरोदार्णवसंभूते सुरासुरनमस्कृते ।
सर्वदेवमये मातर्गृहाणार्घ्यं नमोऽस्तु ते ॥
ततो माषादिसंसिद्धान्वटकान्विनिवेदयेत् ।
सुरभि त्वं जगन्माता देवी विष्णुपदे स्थिता ।
सर्वदेवमये ग्रासं मया दत्तमिमं ग्रस ॥

ततः— सर्वदेवमये देवि सर्वदेवैरलङ्कृते ।

मातर्ममाभिलषितं सफलं कुरु नन्दिनि ॥

इति प्रार्थयेत् । तत्रैव—

तद्दिने तैलपक्वं च स्थालीपक्वं युधिष्ठिर ।
गोक्षीरं गोघृतं चैव दधि तक्रं च वर्जयेत् ॥ इति ।

अत्रैव द्वादश्यादिषु विशेषो नारदीये—

आश्विने कृष्णपक्षे तु द्वादश्यादिषु पञ्चसु ।
तिथिषूक्तः पूर्वरात्रौ नृणां नीराजनाविधिः ॥
नीराजयेयुर्देवांस्तु विप्रान्गांश्च तुरङ्गमान् ।
ज्येष्ठान् श्रेष्ठान् जघन्यांश्च मातृमुख्याश्च योषितः ॥ इति ।

अयं चाश्विनोऽमावास्यान्तः ।

चातुर्मास्यसमाप्तिः ।

कार्तिकशुक्लद्वादश्यां चातुर्मास्यव्रतसमाप्तिरुक्ता महाभारते—

चतुर्धा गृह्य वै चीर्णं चातुर्मास्यव्रतं नरैः ।
कार्तिके शुक्लपक्षे तु द्वादश्यां तत्समापयेत् ॥ इति ।

मन्त्रस्तु—इदं व्रतं मया देव कृतं प्रीत्यै तव प्रभो ।
न्यूनं संपूर्णतां यातु त्वत्प्रसादाज्जनार्दन ॥ इति ।

अथ सर्वद्वादशीकृत्यं तन्नियमाश्च ।

कात्यायनः—

प्रातः स्नात्वा हरिं पूज्य उपवासं समर्पयेत् ।
अज्ञानतिमिरान्धस्य व्रतेनानेन केशव ॥
प्रसादसुमुखो नाथ ज्ञानदृष्टिप्रदो भव ।
पारणं तु ततः कुर्याद्यथा संभवमागतः ॥ इति ।

बृहन्नारदीये—

ब्राह्मणान्भोजयेच्छक्त्या प्रदद्याद्दक्षिणां तथा ।
ततः स्वबन्धुभिः सार्द्धं नारायणपरायणः ।
कृतपञ्चमहायज्ञः स्वयं भुञ्जीत वाग्यतः ॥ इति ।

भोजने तु विशेषः स्कान्दे—

कृत्वा चैवोपवासं तु योऽश्नाति द्वादशीदिने ।
नैवेद्यं तुलसीमिश्रं हत्याकोटिविनाशनम् ॥ इति ।

तत्र वर्ज्यानि ब्रह्माण्डे—

कांस्यं मांसं सुरां क्षौद्रं लोभं वितथभाषणम् ।
व्यायामं च प्रवासं च दिवास्वापमथाञ्जनम् ॥
तिलपिष्टं मसूरं च द्वादशैतानि वैष्णवः ।
द्वादश्यां वर्जयेन्नित्यं सर्वपापैः प्रमुच्यते ॥

तथा— कांस्यं मांसं सुरां द्यूतं व्यायामं क्रोधमैथुने ।
हिंसामत्यन्तलौल्यं च तैलं निर्माल्यलङ्घनम् ।
द्वादश्यां द्वादशैतानि वैष्णवः परिवर्जयेत् ॥

बृहस्पतिरपि—

दिवानिद्रां परान्नं च पुनर्भोजनमैथुने ।
क्षौद्रं कांस्यामिषे तैलं द्वादश्यामष्ट वर्जयेत् ॥

कात्यायनः—

द्वादश्यां पारणं कुर्याद्वर्जयित्वा ह्युपोदकीम् । इति ।

सर्वं चैतत्काम्यव्रतपरम् ।

पुनर्भोजनमध्वानं भारमायासमैथुने ।
उपवासफलं हन्युर्दिवानिद्रा च पञ्चमी ॥

तथा— कांस्यं मांसं मसूरं च चणकाः कोरदूषकाः ।
शाकं मधु परान्नं च हन्युरष्टाविमे फलम् ॥

इत्यादौ फलग्रहणात् । स्कान्दे—

कलाद्वयं त्रयं वापि द्वादशी यत्र दृश्यते ।
स्नात्वार्चनादिकं कर्म तदा रात्रौ विधीयते ॥

अरुणोदयपरश्चात्र रात्रिशब्दः । तथा च नारदीये—

अल्पायामपि विप्रेन्द्र द्वादश्यामरुणोदये ।
स्नात्वार्चनक्रियाः कार्या जपहोमादिसंयुताः ॥ इति ।

होमादिशब्देन चात्र स्मार्तमेव कर्म गृह्यते नतु श्रौतम् । स्मृत्यक्त श्रौतकालबाधायोगात् । पाद्मेऽपि—

यदा भवति अल्पापि द्वादशी पारणादिने ।
उषःकाले द्वयं कुर्यात्प्रातर्माध्याह्निकं तदा ॥ इति ।
महाहानिकरी ह्येषा द्वादशी लङ्घिता नरैः ।
करोति धर्महरणमस्नातेव सरस्वती ॥ इति ।

भूयस्यामपि द्वादश्यां मध्याह्निकापकर्षो भवत्येव ।

सर्वेषामुपवासानां प्रातरेव हि पारणम् ॥

इत्युक्तेः। भोजनमध्याह्निकयोश्च वाचनिकक्रमसद्भावात्। एवमुक्तयमनियमलोपे। यमः—

मानसे नियमे लुप्ते स्मरेद्विष्णुमनामयम् ॥ इति।

याज्ञवल्क्यः—

यदि वाग्यमलोपः स्यात्स्नानदानादिकर्मसु।
व्याहरेद्वैष्णवं मन्त्रं स्मरेन्त्रा विष्णुमव्ययम् ॥ इति।

विष्णुधर्मोत्तरे—

असंभाष्यान्हि संभाष्य तुलस्यतसिकादलम्।
आमलक्याः फलं वाऽपि पारणे प्राश्य शुध्यति ॥
इदं चोदाहरेत्सम्यक् कृत्वा तत्प्रणवं नमः।
शारीरमन्तःकरणोपघातं वाचश्च विष्णुर्भगवानशेषम् ॥
शमं नयत्वस्तु ममेह शर्म पायादनन्ते हृदि सन्निविष्टे ॥
अन्तःशुद्धिं बहिःशुद्धिं शुद्धो धर्ममयोऽच्युतः ॥
स करोतु ममैतस्मिन् शुचिरेवास्मि सर्वदा।
बाह्योपघातानानघान्बौद्धांश्च भगवानजः ॥
शमं नयत्वनन्तात्मा विष्णुश्चेतसि संस्थितः।
एतत्संभाष्य जप्तव्यं पाषण्डिभिरुपोषितैः ॥ इति।

वैष्णवे—

तस्यावलोकनात्सूर्यं पश्येत मतिमान्नरः।
नमः शुचिषदेत्युक्त्वा इति।
तस्य पाषण्ड्यादेः। तस्य स्पर्शेऽपि तत्रैव—
संस्पर्शे तु बुधः स्नात्वा शुचिरादित्यदर्शनात् ॥

विष्णुरहस्ये—

श्राद्धोपवासदिवसे खादित्वा दन्तधावनम्।
गायत्र्या शतसंपूतमम्बु प्राश्य विशुद्ध्यति ॥ इति।
रजस्वलां च चण्डालं महापातकिनं तथा।
सूतिकां पतितं चैव उच्छिष्टं रजकादिकम् ॥

इत्युपक्रम्य बृहन्नारदीये—

व्रतादिमध्ये शृणुयाद्ध्येषां ध्वनिमुत्तमः।

अष्टोत्तरसहस्रं तु जपेद्वै वेदमातरम् ।

वेदमाता गायत्री । कात्यायनः—

मिथ्यावादे दिवा स्वापे बहुशोम्बुनिषेवणे ।
अष्टाक्षरं व्रती जप्त्वा शतमष्टोत्तरं शुचिः ॥ इति ।

अष्टाक्षरम् 'ॐ' नमो नारायणाय इति । शङ्खः—

कृत्वा स्तेयं प्राणिहिंसां यथार्हं शास्त्रचोदितम् ।
प्रायश्चित्तं व्रती कुर्याज्जपेन्नाम्नां शतत्रयम् ॥ इति ।

पैठीनसिः—

ताम्बूलचर्वणे स्त्रीणां भोगे मांसनिषेवणे ।
व्रतलोपो भवेत्कुर्यादष्टाक्षरमनोर्जपम् ॥ इति ।

कात्यायनः—

रेतःसंक्रमणात्स्त्रीणां भोगोऽन्यत्र क्षयः स्मृतः ।
जपोऽष्टाक्षरमन्त्रस्य नाम्नां शतत्रयस्य च ॥ इति ।

रेतःसंक्रमणमृतुकालगमनम् । तदात्मकात्स्त्रीसंभोगादन्यत्र संभोगे व्रतस्य क्षय इत्यर्थः । देवलोऽपि, 'न दारेष्वृतुसङ्गमात्' इति ।

इति द्वादशी ।

अथ त्रयोदशी ।

सा तु शुक्ला पूर्वा कृष्णोत्तरा ग्राह्या । 'शुक्ला त्रयोदशी पूर्वा परा कृष्णा त्रयोदशी इति माधवोक्तेः' । दीपिकाऽपि 'त्रयोदशी तिथिः पूर्वा सितेऽथाऽसिते पश्चात् ।' इति ।

अत्र प्रदोषव्रतं ब्रह्मोत्तरखण्डे—

पक्षद्वये त्रयोदश्यां निराहारो भवेद्दिवा ।
घटिकात्रिरस्तमयात्पूर्वं स्नानं समाचरेत् ॥
शुक्लाम्बरधरो भूत्वा वाग्यतो नियमान्वितः ।
कृतसन्ध्याजपविधिः शिवपूजां समारभेत् ॥ इति ।

अत्र प्रदोषव्यापिनी ग्राह्या । तत्रैव पूजाविधानात् । दिनद्वये प्रदोषव्यापित्वेऽव्यापित्वे वा पूर्वैव । तथा च सुमन्तुः—

त्रयोदशी तु कर्तव्या द्वादशीसहिता मुने ॥ इति ।

इदं च कृष्णपक्षे मन्दवासरे प्रशस्तम्—

मन्दवारे प्रदोषोऽयं दुर्लभः सर्वदेहिनाम् ।

तत्रापि दुर्लभस्तस्मिन् कृष्णपक्षे समासतः ॥

इति । तत्रैवोक्तत्वात् । चैत्रकृष्णत्रयोदश्यामलभ्ययोगः स्कान्दे—

वारुणेन समायुक्ता मधौ कृष्णा त्रयोदशी
गङ्गायां यदि लभ्येत सूर्यग्रहशतैः समा ॥
शनिवारसमायुक्ता सा महावारुणी स्मृता ।
शुभयोगसमायुक्ता शनौ शतभिषा यदि ॥
महामहेति विख्याता त्रिकोटिकुलमुद्धरेत् ।
तिथिकृत्ये च कृष्णादि व्रते शुक्लादिरेव च ॥ इति ।

आह्नोक्तेरत्र कृष्णादिमासः। नचास्य व्रतत्वं व्रतपदतत्प्रकरणाद्यभावात्।
कार्तिककृष्णत्रयोदश्यां दीपदानमुक्तं चन्द्रप्रकाशे । स्कान्दे—

कार्तिकस्यासिते पक्षे त्रयोदश्यां निशामुखे ।
यमदीपं बहिर्दद्यादपमृत्युर्विनश्यति ॥ इति ।

बहिर्ग्रामाद्बहिरिति केचित् । गृहाद्बहिरित्यपरे । मन्त्रस्तु—

मृत्युना पाशदण्डाभ्यां कालश्यामलया सह ।
त्रयोदश्यां दीपदानात्सूर्यजः प्रीयतां मम ॥

इति दिक् ।

इति त्रयोदशी ।

अथ चतुर्दशी ।

सा तु कृष्णा पूर्वा शुक्लोत्तरा ग्राह्या । 'चतुर्दश्या च पूर्णिमा इति युग्मवाक्यात्—

तृतीयैकादशी षष्ठी शुक्लपक्षे चतुर्दशी ।
पूर्वविद्धा न कर्तव्या कर्तव्या परसंयुता ॥

इति नारदीयात् ।

कृष्णपक्षेऽष्टमी चैव कृष्णपक्षे चतुर्दशी ।
पूर्वविद्धा तु कर्तव्या परविद्धा न कर्हिचित् ॥

इत्यापस्तम्बोक्तेश्च । तत्र सर्वासु चतुर्दशीषु वीरेश्वरपूजोक्ता स्कान्दे—

विधायैव जागरणं नरो वीरेशमर्चयेत् ।
भूतायां नैव गृण्हाति शरीरं पाञ्चभौतिकम् ॥

चैत्रकृष्णचतुर्दश्यां केदारकुण्डोदकपानमुक्तं तत्रैव—

चैत्रकृष्णचतुर्दश्यामुपवासं विधाय च ।
केदारोदकपानेन यथा तत्र फलं लभेत् ॥ इति ।

चैत्रशुक्लचतुर्दशी रात्रिव्यापिनी ग्राह्येति केचित्—

मधोः श्रावणमासस्य या तु शुक्ला चतुर्दशी ।
सा रात्रिव्यापिनी ग्राह्या परा पूर्वाह्णगामिनी ॥

इति बौधायनवचनात् ।

निशि भ्रमन्ति भूतानि शक्तयः शूलभृद्यतः ।
अतस्तत्र चतुर्दश्यां सत्यां तत्पूजनं भवेत् ॥

इति ब्रह्मवैवर्ताच्च । तातचरणास्तु—

तृतीयैकादशी षष्ठी शुक्लपक्षे चतुर्दशी ।
पूर्वविद्धा न कर्तव्या कर्तव्या परसंयुता ॥ इति ।

नारदेन शुक्लचतुर्दशी परविद्धोक्ता,

कृष्णपक्षेऽष्टमी चैव कृष्णपक्षे चतुर्दशी ।
पूर्वविद्धा तु कर्तव्या परविद्धा न कर्हिचित् ॥

इत्यापस्तम्बेन च कृष्णा पूर्वोक्ता । अपराह्णव्यापित्वे तूभे अपि पूर्वविद्धे एव च,

चतुर्दशी तु कर्तव्या त्रयोदश्या युता विभो ।
मम भक्तैर्महाबाहो भवेद्या चापराह्णिकी ॥ इति ।
दर्शविद्धा न कर्तव्या राकाविद्धा कदाचन ।

इति स्कान्दोक्तेः । मधोः श्रावणमासस्येति बौधायनीये तु—परापूर्वाह्णगामिनीत्येव विधीयते न रात्रिव्याप्ता ग्राह्येत्यपि । उभयविधौ वाक्यभेदप्रसङ्गात् । किन्तु स्कान्दवाक्यप्राप्तं पूर्वविद्धत्वमनूद्यते, तद्धि रात्रिव्यापित्व एव भवति । रात्रिव्यापिनीति विधिः, पूर्वाह्णगामिनीत्यनुवाद इति चेन्न । मधुश्रावणशुक्लचतुर्दशीभिन्नानां पूर्वाण्हव्यापिनीनां ग्रहणस्याप्राप्तेः । अतो लक्षणया रात्रिव्यापिनीत्यनेन पूर्वविद्धत्वमनूद्यते इत्याहुः । रात्रिव्यापिनीत्येतत्पूर्वविद्धापरम् । तच्च सायाह्नव्यापित्वे भवति । पूर्वविद्धा च रात्रिव्यापिन्येव भवति । एवं च पूर्वविद्धत्वे परविद्धत्वे वा प्राप्ते मधोः श्रावणमासस्येति वचो नियमविधिर्भवति । पूर्वविद्धत्वाभावे केवलरात्रिमात्रव्यापित्वे त्वपूर्वविधित्वं स्यात्तच्च नियमविधेर्गुर्विति शास्त्रसिद्धम् । सा रात्रिव्यापिनी—

त्येतत्पूर्वविद्धापरमिति तु मम प्रतिभाति । अस्यामेव पशुपतीश्वरपूजोक्ता तत्रैव—

चैत्रशुक्लचतुर्दश्यामुपोषणपरायणः ।
पूजयित्वा पशुपतिं रात्रौ जागरणं तथा ॥ इति ।

वैशाखशुक्लचतुर्दशी नृसिंहजयन्ती । तदुक्तं गोविन्दार्णवे ब्राह्मे—

'शुक्लपक्षे चतुर्दश्यां मासि माधवसंज्ञके ।
प्रादुर्भूतो नृपञ्चास्यस्तस्मात्तां समुपोषयेत्' ॥

माधवो वैशाखः । नृपञ्चास्यो नृसिंहः । इयं च प्रदोषव्यापिनी ग्राह्या—

वैशाखस्य चतुर्दश्यां सोमवारेऽनिलर्क्षके ।
अवतारो नृसिंहस्य प्रदोषसमये द्विजाः ॥

इति स्कान्दात् ।

दिनद्वये प्रदोषव्याप्तावेकदेशसमव्याप्तौ च परा ।

अनङ्गेन समायुक्ता न सोपोष्या चतुर्दशी ॥
धनापत्यैर्वियुज्येत तस्मात्तां परिवर्जयेत् ।

इति तत्रैव निषेधात् । वैषम्येणैकदेशयोगे आधिक्यवती । अत्रैवोङ्कारेश्वरयात्राद्युक्तं काशीखण्डे—

माघशुक्लचतुर्दश्यामद्यापि क्षेत्रवासिनः ।
तत्र यात्रां प्रकुर्वन्ति महोत्सवपुरस्सराः ॥
तत्र जागरणं कृत्वा चतुर्दश्यामुपोषिताः ।
प्राप्नुवन्ति परं स्थानं यत्र कुत्रापि ते मृताः ॥ इति ।
ब्रह्माण्डोदरमध्ये तु यानि तीर्थानि सर्वतः ।
तानि वैशाखभूतायामागत्योङ्कृतिदर्शने ॥ इति ।

भाद्रपदशुक्लचतुर्दश्यामनन्तव्रतं, तत्रोदयव्यापिनी ग्राह्या—

तथा भाद्रपदस्यान्ते चतुर्दश्यां द्विजोत्तम ।
पौर्णमास्यां समायोगे व्रतं चानन्तकं चरेत् ॥

इति गोविन्दार्णवे भविष्योक्तेः ।

मुहूर्तमपि चेद्भाद्रे पौर्णमास्यां चतुर्दशी ।
संपूर्णां तां विदुस्तस्यां पूजयेद्विष्णुमव्ययम् ॥

इति स्कान्दाच्च । मुहूर्तमपीति त्रिमुहूर्तप्रशंसापरम् । माधवोऽप्येवम् ।

दिनद्वये उदयव्यापित्वे संपूर्णत्वात्पूर्वैव । कार्तिककृष्णचतुर्दशी नरकचतुर्दशी । तत्र चन्द्रोदये अभ्यङ्गः कार्यः । तदुक्तं हेमाद्रौ भविष्ये—

अश्वयुक्कृष्णपक्षस्य चतुर्दश्यां विधूदये ।
तिलतैलेन कर्तव्यं स्नानं नरकभीरुणा ॥ इति ।

अश्वयुक्त्वं चामावास्यान्तमासाभिप्रायेण । अत एव हेमाद्रौ भविष्ये—

कार्तिके कृष्णपक्षे तु चतुर्दश्यामिनोदये ।
अवश्यमेव कर्तव्यं स्नानं नरकभीरुणा ॥ इति ।

इनः सूर्यः । इनश्चन्द्र इति व्याचक्षाणस्तु भ्रान्त एव । अत एव 'चतुर्दश्यां दिनोदये' इति प्राचां पुस्तकेषु पाठः । अत्र च यथाचारं व्यवस्थेति केचित् । परे दिनेनपदयोश्चन्द्रे लक्षणेत्याहुः ।

पूर्वविद्धचतुर्दश्यां कार्तिकस्य सितेतरे ।
पक्षे प्रत्यूषसमये स्नानं कुर्यात्प्रयत्नतः ॥

इति स्कान्दादाचाराच्च । वस्तुतस्तु चन्द्रोदयो मुख्यः कालः । सूर्योदयो गौणः । उत्तरभावित्वात् । अत एव मण्डनः । स्वकालादुत्तरो गौण कालः सर्वस्य कर्मणः इति । एवं च दाक्षिणात्यशिष्टाचारोऽप्यनुगुणो भवति । एवं चाभ्यङ्गे मुख्या चन्द्रोदयव्यापिनी । दिनद्वये तद्व्याप्तौ पूर्वा । पूर्वोक्तस्कान्दात् । दिनद्वये व्याप्त्यभावेऽपि पूर्वैव । गौणकाले सत्वात् । तत्राप्यभावेऽपि पूर्वैव—

तिथ्यादौ तु भवेद्यावान् ह्रासो वृद्धिः परेऽहनि ।
तावान् ग्राह्यः स पूर्वेद्युरदृष्टोऽपि स्वकर्मणि ॥

इति वाक्येन त्रयोदश्यन्ते चतुर्दशीह्रासप्रक्षेपेण चन्द्रोदये पारिभाषिकचतुर्दशीसद्भावात् । अत एव चन्द्रप्रकाशे—

त्रयोदशी यदा प्रातः क्षयं याति चतुर्दशी ।
रात्रिशेषे त्वमावास्या तदाभ्यङ्गे त्रयोदशी ॥ इति ।

ब्राह्मे— तैले लक्ष्मीर्जले गङ्गा दीपावल्याश्चतुर्दशीम् ।
प्रातःस्नानं तु यः कुर्याद्यमलोकं न पश्यति ॥ इति ।

पाद्मे— अपामार्गमथो तुम्बी प्रपुन्नाटमथापरम् ।
भ्रामयेत्स्नानमध्ये तु नरकस्य क्षयाय वै ॥

मन्त्रस्तु—

सीतालोष्ठसमायुक्तसकण्टकदलान्वित ।
हर पापमपामार्ग भ्राम्यमाणः पुनः पुनः ॥ इति ।

तर्पणमुक्तं मदनरत्ने भविष्ये—

ततश्च तर्पणं कार्यं धर्मराजस्य नामभिः ।
यमाय धर्मराजाय मृत्यवे चान्तकाय च ॥
वैवस्वताय कालाय सर्वभूतक्षयाय च ।
औदुम्बराय दध्नाय नीलाय परमेष्ठिने ॥
वृकोदराय चित्राय चित्रगुप्ताय ते नमः । इति ।
यज्ञोपवीतिना कार्यं प्राचीनावीतिनाऽथवा ॥
देवत्वं च पितृत्वं च यमस्यास्ति द्विरूपता ॥ इति ।
जीवत्पिताऽपि कुर्वीत तर्पणं यमभीष्मयोः ।

इति पाद्मोक्तेर्जीवत्पितुरप्यत्राधिकारः ।

ततः प्रदोषसमये दीपान्दद्यान्मनोरमान् ।
ब्रह्मविष्णुशिवादीनां भवनेषु मठेषु च ॥
प्राकारोद्यानवापीषु प्रतोलीषूटजेषु च ।
मन्दुरासु विविक्तासु हस्तिशालासु चैव हि ॥ इति ।

लैङ्गे—ततः प्रेतचतुर्दश्यां भोजयित्वा तपोधनान् ।
शैवविप्रांस्त्वथ परान् शिवलोके महीयते ॥
दानं दत्वा तु तेभ्यश्च यमलोकं न गच्छति ।
माषपत्रस्य शाकेन भुक्त्वा तत्र दिने नरः ॥
प्रेतश्चतुर्दशीकाले सर्वपापैः प्रमुच्यते ॥ इति ।

कार्तिके शुक्ला वैकुण्ठचतुर्दशी ।

वर्षे वै हेमलम्बाख्ये मासे श्रीमति कार्तिके ।
शुक्लपक्षे चतुर्दश्यामरुणाभ्युदयं प्रति ॥
महादेवतिथौ ब्राह्मे मुहूर्ते मणिकर्णिके ।
स्नात्वा विश्वेश्वरो देव्या विश्वेश्वरमपूजयत् ॥
संक्षेपं ज्योतिषस्तस्य प्रतिष्ठाख्यं तदाकरोत् ।
स्वयमेव स्वमात्मानं चरन्पाशुपतव्रतम् ॥ इति ।

कथा— ततः प्रभाते विमले कृत्वा पूजां महाद्भुताम् ।
दण्डपाणेर्महानाम्नि वनेऽस्मिन्कृतपारणः ॥

श्रीमद्भवानीसदनं संप्रविश्येदनुत्तमम् ॥

इति सनत्कुमारसंहितोक्तेः । अत्र परकृतिसरूपेणानेनार्थवादेन स्नात्वा विश्वेश्वरः पूज्य इतिविधिः कल्प्यते । ततः प्राभातिकपारणाविधेश्च पूर्वदिनं उपवासः, स च चतुर्दशीयुक्तारुणोदयवत्यहोरात्रे कार्यः ॥ काशीखण्डे—

कार्तिकस्य चतुर्दश्यां विश्वेशं यो विलोकयेत् ।
स्नात्वा चोत्तरवाहिन्यां न तस्य पुनरागतिः ॥ इति ।

पिशाचमोचनयात्रा ।

मार्गशुक्लचतुर्दश्यां पिशाचमोचनयात्रोक्ता काशीखण्डे—

मार्गशुक्लचतुर्दश्यां कपर्दीश्वरसन्निधौ ।
स्नात्वाऽन्यत्रापि मरणान्न पैशाच्यमवाप्नुयुः ॥
इमां सांवत्सरीं यात्रां ये करिष्यन्ति मानवाः ।
तीर्थप्रतिग्रहात्पापान्निस्तरिष्यन्ति ते नराः ॥ इति ।

अथ शिवरात्री ।

स्कान्दे— माघस्य कृष्णपक्षे या तिथिश्चैव चतुर्दशी ।
शिवरात्रिस्तु सा ख्याता सर्वपापनिषूदिनी ॥ इति ।

तच्च शिवरात्रिव्रतं नित्यं काम्यं च—

परात्परतरं नास्ति शिवरात्रिः परात्परम् ।
न पूजयति भक्त्येदं रुद्रं त्रिभुवनेश्वरम् ॥
जन्तुर्जन्मसहस्रेषु भ्रमते नात्र संशयः ॥

इति तत्रैवाऽकरणेऽनिष्टश्रुतेर्नित्यम्,

शिवं च पूजयित्वा यो जागर्ति च चतुर्दशीम् ।
मातुः पयोधररसं न पिबेत्स कदाचन ॥
मम भक्तस्तु यो देवि शिवरात्रिमुपोषकः ।
गणत्वमक्षयं दिव्यमक्षयं शिवशासनम् ॥
सर्वान् भुक्त्वा महाभोगान्मृतो भूयो न जायते ॥

इति तत्रैव फलश्रुतेः काम्यम् ।

शिवरात्रिव्रतं नाम सर्वपापप्रणाशनम् ।
आचण्डालमनुष्याणां भुक्तिमुक्तिप्रदायकम् ॥

इति ईशानसंहितोक्तेः । तथा—

उपवासप्रभावेन बलादपि च जागरात् ।
शिवरात्रेस्तथा तस्य लिङ्गस्यापि प्रपूजया ॥
अक्षयाँल्लभते लोकान् शिवसायुज्यमाप्नुयात् ॥

इति नागरखण्डोक्तेरुपवासजागरणपूजाः प्रधानानि । यत्तु सह्याद्रिखण्डे—

स्वयं च लिङ्गमभ्यर्च्य सोपवासः सजागरः ।
अजानन्नपि निष्पापो निषादो गणतां गतः ॥

इत्युपवासजागरणयोः कर्तृगुणत्वश्रवणं तदर्थवादगतत्वेन न तयोः प्राधान्यं विहन्ति । तत्र चतुर्दशी निशीथव्यापिनी ग्राह्या—

माघकृष्णचतुर्दश्यामादिदेवो महानिशि ।
शिवलिङ्गमभूत्तत्र कोटिसूर्यसमप्रभः ॥
तत्कालव्यापिनी ग्राह्या शिवरात्रिव्रते तिथिः ॥

इति ईशानसंहितायाम् । नारदीयसंहितायामपि—

अर्द्धरात्रयुता यत्र माघकृष्णचतुर्दशी ।
शिवरात्रिव्रतं तत्र वाजिमेधफलं लभेत् ॥ इति ।

स्कान्देऽपि—

महतामपि पापानां दृष्टा वै निष्कृतिः पुरा ।
न दृष्टा कुर्वतां पुंसां कुहूयुक्तां तिथिं शिवाम् ॥

इति दर्शयोगस्य निन्द्यत्वाच्च । स्मृत्यन्तरेऽपि—

भवेद्यत्र त्रयोदश्यां भूतव्याप्ता महानिशा ।
शिवरात्रिव्रतं तत्र कुर्याज्जागरणं तथा ॥ इति ।

ईशानसंहितायामपि—

व्याप्यार्द्धरात्रं यस्यां तु लभ्यते या चतुर्दशी ।
तस्यामेव व्रतं कार्यं मत्प्रसादार्थिभिर्नरैः ॥
पूर्वेद्युर्वा परेद्युर्वा महानिशि चतुर्दशी ।
व्याप्ता सा दृश्यते यस्यां तस्यां कुर्याद्व्रतं नरः ॥
लिङ्गाविर्भावकाले तु व्याप्ता ग्राह्या चतुर्दशी ।
तदूर्ध्वाधोन्विता भूता सा कार्या व्रतिभिः सदा ॥
मम प्रियकरी ह्येषा माघकृष्णचतुर्दशी ।

महानिशान्विता या तु तत्र कुर्यादिदं व्रतम् ॥ इति।

दिनद्वये निशीथव्याप्तावव्याप्तौ वा परैव—

आदित्यास्तमये काले अस्ति चेद्या चतुर्दशी ।
तद्रात्रिः शिवरात्रिः स्यात्सा भवेदुत्तमोत्तमा ॥

इति कामिकात्,

प्रदोषव्यापिनी ग्राह्या शिवरात्रिचतुर्दशी ।
रात्रौ जागरणं यस्मात्तस्मात्तां समुपोषयेत् ॥

इति स्मृत्यन्तरात्,

दिवारात्रिव्रतं यच्च एकमेकतिथौ गतम् ।
तस्यामुभययोगिन्यामाचरेत्तद्व्रतं व्रती ॥

इति स्मृतेः प्रदोषव्याप्त्याधिक्याच्च । पूर्वदिन एव प्रदोषनिशीथोभयव्याप्तौ पूर्वैव—

त्रयोदशी यदा देवि दिनभुक्तिप्रमाणतः ।
जागरे शिवरात्रिः स्यान्निशि पूर्णा चतुर्दशी ॥

इति स्कान्दात् । परेद्युरेव तादृशी चेत्सैव । 'निशाद्वये चतुर्दश्यां पूर्वा त्याज्या परा शुभा' इति कामिकात् । यदा पूर्वेद्युर्निशीथे परेद्युश्च प्रदोषे तदा पूर्वेद्युरेव—

अर्द्धरात्रात्पुरस्ताच्चेज्जयायोगो यदा भवेत् ।
पूर्वविद्धैव कर्तव्या शिवरात्रिः शिवप्रिया ॥

इति पाद्मोक्तेः । यत्तु एतस्मादेववचनाद्दिनद्वयेऽपि निशीथव्याप्तौ पूर्वैवेति हेमाद्रिमदनौ तन्न, एतस्य वचस उत्तरदिने निशीथव्याप्त्यभावेऽप्युपपत्तेः । उत्तरगतदिनप्रदोषनिशीथोभयव्याप्त्या दिवारात्रिव्रतमिति पूर्वोक्तवचसः सङ्कल्पकालस्य च बाधायोगात् । माधवाचार्यास्तातचरणाश्चैवम् । अयमेव निर्णयः प्रतिमासशिवरात्रावपि ।

आदौ मार्गशिरे मासि दीपोत्सवदिने तथा ।
गृह्णीयान्माघमासे वा द्वादशैवमुपोषयेत् ॥

इति हेमाद्रौ स्कान्दे चतुर्दश्यन्तरे प्रारभ्य द्वादशानामप्याचरणविधानात् प्रतिमासं कार्यम् । चतुर्दशाब्दं चेदं कार्यम् । तथा च हेमाद्रौ कालान्तरे—

चतुर्दशाब्दं कर्तव्यं शिवरात्रिव्रतं शुभम् ॥ इति ।

इयं च रविभौमयोः शिवयोगे चातिप्रशस्तेति माधवीये स्कान्दे—

माघकृष्णचतुर्दश्यां रविवारो यदा भवेत् ।
भौमो वाथ भवेद्देवि कर्तव्यं व्रतमुत्तमम् ॥
शिवयोगस्य योगे वै तद्भवेदुत्तमोत्तमम् ॥ इति ।

भविष्ये—माघमासे चतुर्दश्यां रविवारो यदा भवेत् ।
माघमासे चतुर्दश्यां कृष्णपक्षे समाहिताः ॥
कृत्तिवासेश्वरं लिङ्गमर्चयन्ति शिवं शुभम् ।
ते यान्ति परमं स्थानं सदाशिवमनामयम् ॥ इति ।

पारणं तु तिथिमध्य एव कार्यम् । तथा च माधवीये स्कान्दे—

उपोषणं चतुर्दश्यां चतुर्दश्यां च पारणम् ।
कृतैः सुकृतलक्षैश्च लभ्यते वाऽथवा न वा ॥
ब्रह्माण्डोपरि मध्ये तु यानि तीर्थानि सन्ति वै ।
संस्नातानि भवन्तीह भूतायां पारणे कृते ॥
तिथीनामेव सर्वासामुपवासव्रतादिषु ।
तिथ्यन्ते पारणं कुर्याद्विना शिवचतुर्दशीम् ॥ इति ।

यत्तु— जन्माष्टमी रोहिणी च शिवरात्रिस्तथैव च ।
पूर्वविद्धैव कर्तव्या तिथिभान्ते च पारणम् ॥ इति,

स्कान्दे च—

कृष्णाष्टमी स्कन्दषष्ठी शिवरात्रिचतुर्दशी ।
एताः पूर्वयुताः कार्यास्तिथ्यन्ते पारणं भवेत् ॥ इति,

तद्गौणकालपरम् ।

स्वकालादुत्तरो गौणः कालः सर्वस्य कर्मणः ।

इति मण्डनोक्तेः ।

इति चतुर्दशी ।

अथ पूर्णिमासामान्यनिर्णयः ।

सा तु सावित्रीव्यतिरिक्ता सर्वा परैव ।

भूतविद्धा न कर्तव्या दर्शःपूर्णा कदाचन ॥
वर्जयित्वा मुनिश्रेष्ठ सावित्रीव्रतमुत्तमम् ।

इति ब्रह्मवैवर्तात् । सर्वास्वपि पूर्णिमासु अमावास्यावत् श्राद्धं नित्यम् । तथा च पितामहः—

अमावास्याव्यतीपातपौर्णमास्यष्टकासु च ।
विद्वान् श्राद्धमकुर्वाणो नरकं प्रतिपद्यते ।। इति ।

चैत्रपूर्णिमायां दमनकपूजा ।

चैत्रपौर्णमास्यां विशेषो वायवीये ।

संवत्सरकृतार्चायाः साफल्यायाखिलान् सुरान् ।।
दमनेनार्चयेच्चैत्र्यां विशेषेण सदाशिवम् । इति ।।

मेषस्थे रवौ याऽमावास्या तदन्ते चान्द्रे या पौर्णमासी सा चैत्री । एतत्क्रमेणान्या अपि । तदुक्तं हरदत्तेन—

मेषादिस्थे सवितरि यो यो दर्शः प्रवर्तते ।
चान्द्रमासास्तत्तदन्ताश्चैत्राद्या द्वादश स्मृताः ।।
तेषु या पौर्णमासी च सा सा चैत्र्यादिका स्मृता ।
कादाचित्केन योगेन नक्षत्रस्येति निर्णयः ।। इति ।

अथ वैशाखपौर्णमास्यां विशेषः, तत्र जाबालिः—

शृतान्नमुदकुम्भं च वैशाख्यां च विशेषतः ।
निर्द्दिश्य धर्मराजाय गोदानफलमाप्नुयात् ।।

शृतं, पक्वम् ।

ज्येष्ठपूर्णमास्यां वटसावित्रीव्रतं भविष्ये—

ज्येष्ठे मासि सिते पक्षे पौर्णमास्यां तया व्रतम् ।
चीर्णं पुरा महाभक्त्या कथं ते न मया नृप ।। इति ।

इयं पूर्वविद्धा ग्राह्या युग्मवाक्यात् । ब्रह्मवैवर्तेऽपि—

प्रतिपत्पञ्चमी भूतः सावित्रीव्रतपूर्णिमा ।
दशमी नवमी चैव नोपोष्याः परसंयुताः ।।

आषाढी पूर्णमासी तु कोकिला व्रतोपक्रमे सन्ध्याकालव्यापिनी ग्राह्या—

आषाढपूर्णमास्यां तु सन्ध्याकाले ह्युपस्थिते ।
संकल्पयेन्मासमेकं श्रावणे प्रत्यहं त्विदम् ।।

इति भविष्योक्तेः ।

व्यासपूजा तत्रैव । व्यासपूजायां त्वौदयिकी ग्राह्या । तथा च विश्वेश्वरपद्धतौ—

त्रिमुहूर्ताधिकं ग्राह्यं पर्व क्षौरप्रणामयोः ।। इति ।

अत्रैवाऽषाढेश्वरयात्रा पूजा चोक्ता काशीखण्डे—

उदीच्यां भारभूतेशमाषाढीशं समर्चयेत् ।
आषाढ्यां पञ्चदश्यां वै न पापैः परितप्यते ॥
कृत्वा सांवत्सरीं यात्रामनेना जायते नरः । इति ॥

अनेनाः निष्पापः ।

पवित्रार्पणम् ।

श्रावणी पौर्णमासी पवित्रार्पणादौ पूर्वविद्धा ग्राह्या । तदाह बृहद्यमः—

श्रावणी दुर्गनवमी दूर्वा चैव हुताशिनी ।
पूर्वविद्धा प्रकर्तव्या शिवरात्रिर्बलेर्दिनम् ॥ इति ।

वेधस्त्रिमुहूर्तात्मको ज्ञेयः । तदुक्तं स्कान्दे—

यां तिथिं समनुप्राप्य यात्यस्तं पद्मिनीपतिः ।
सा तिथिस्तद्दिने प्रोक्ता त्रिमुहूर्तैव या भवेत् ॥ इति ।

उपाकर्म ।

अथोपाकर्म । याज्ञवल्क्यः—

अध्यायानामुपाकर्म श्रावण्यां श्रवणेन वा ।
हस्तेनौषधिभावे वा पञ्चम्यां श्रावणस्य तु ॥ इति ।

हस्तेन युक्तायां पञ्चम्यामिति स्मृतिचन्द्रिकायाम् । दिनान्तरेऽपि हस्तेन युक्त इति हेमाद्रिः । श्रवणश्रावण्योरिवेदमेव युक्तम् । एवमेव स्मृत्यर्थसारेऽपि । ओषधीनामप्रादुर्भावेऽपि बह्वृचगृह्यकारिकायाम् ।

अध्यायानामुपाकर्म श्रावण्यां श्रवणेन तु ।
अवृष्ट्यौषधयस्तस्मिन्मासे तु न भवन्ति चेत् ॥
तथा भाद्रपदे मासि श्रवणेन करोति तत् । इति ।

श्रावणीविषयेऽत्र श्रवणं धनिष्ठायुतं ग्राह्यम् ।

श्रवणेन तु यत्कर्म उत्तराषाढसंयुतम् ।
संवत्सरकृतोऽध्यायस्तत्क्षणादेव नश्यति ॥
धनिष्ठासंयुते कुर्याच्छ्रावणं कर्म यद्भवेत् ।

इति व्यासोक्तेः । गर्गः—

पर्वण्योदयिके कुर्युः श्रावणीं तैत्तिरीयकाः ।
बह्वृचाः श्रवणे कुर्युर्ग्रहसंक्रान्तिवर्जिते ॥ इति ।

तत्र तैत्तिरीया औदयिके पर्वणि कुर्युरन्ये तु याजुषाः पूर्वविद्धे एव ।

श्रावणी दुर्गनवमी दूर्वा चैव हुताशिनी ।
पूर्वविद्धैव कर्तव्या शिवरात्रिर्बलेर्दिनम् ॥

इति वचनात् (इति) हेमाद्रौ । तैत्तिरीयकपदं याजुषमात्रोपलक्षण तेनसर्वेऽप्यौदयिके, श्रावणीदुर्गनवमी इत्यादि वचस्तु पवित्रारोपणादिकृत्यान्तरविषयमुपाकर्माङ्गभूताभ्युदयिकविषयं चेति निर्णयामृते । तत्रोपलक्षणत्वे मानं चिन्त्यम् । पर्वश्रवणगतयोरेव ग्रहणसंक्रान्त्योः पर्युदासप्रयोजकता तत्सामानाधिकरण्येन श्रुतत्वात्, न तिथ्यन्तरनक्षत्रान्तरगतयोरपि । तेन चतुर्दशीप्रतिपदुत्तराषाढाधनिष्ठादौ ग्रहणे संक्रान्तौ वा पर्वणि श्रवणे चोपाकर्म कार्यमेव । स्मृतिमहार्णवे—

संक्रान्तिर्ग्रहणं वापि पौर्णमास्यां यदा भवेत् ।
उपाकृतिस्तु पञ्चम्यां कार्या वाजसनेयिभिः ॥ इति ।

वाजसनेयिपदं बह्वृचानामप्युलक्षणम् । 'पञ्चम्यां हस्तेन वा' इति तत्सूत्रात् । ग्रहसंक्रान्तिनिषेधोऽत्रार्धरात्रादर्वागिति प्रयोगपारिजाते वृद्धमनुः—

यद्यर्धरात्रादर्वाक्तु ग्रहः संक्रम एव वा ।
नोपाकर्म तदा कुर्याच्छ्रावण्यां श्रवणेऽपि वा ॥ इति ।

कात्यायनोऽपि—

अर्द्धरात्रादधस्ताच्चेत्संक्रान्तिर्ग्रहणं तदा ।
उपाकर्म न कुर्वीत परस्ताच्चेन्न दोषकृत् ॥ इति ।

'परेऽहनि' इत्यपि क्वचित्पाठः । तदा परेऽह्न्यपि निषेधः ।

सामगोपाकर्मकालः ।

सामगानां कालविशेषमाह गर्गः—

सिंहे रवौ तु पुष्यर्क्षे पूर्वाह्णे विचरेद्बहिः ।
छन्दोगा मिलिताः कुर्युरुत्सर्गं स्वस्वछन्दसाम् ॥
शुक्लपक्षे तु हस्तेन उपाकर्माऽपराह्णिकम् ॥ इति ।

'सिंहे रवौ' इत्युपाकर्मणाऽपि संबध्यते । यत्तु स्मृत्यन्तरे—

वेदोपाकरणे प्राप्ते कुलीरे संस्थिते रवौ ।
उपाकर्म न कर्तव्यं कर्तव्यं सिंहयुक्तके ॥

इति तच्छन्दोगपरम् । यदपि बृहस्पतिः—

नर्मदोत्तरभागे तु कर्तव्यं सिंहयुक्तके ।
कर्कटे संस्थिते भानावुपाकुर्यात्तु दक्षिणे ॥ इति ।

तदपि तान्प्रत्येव देशविशेषेण सिंहकर्कव्यवस्थापरम् । एवं हि लाघवं भवति । यत्सिंहे कार्यमनूद्यते तन्नर्मदोत्तरभाग इति । एवं च तान्प्रत्येव दक्षिणभागे कदा कार्यमित्याकाङ्क्षिते कर्कट इत्याकाङ्क्षितविधिर्भवति । बह्वृचादीन्प्रति तु अप्राप्तसिंहादिविधेर्गौरवमनाकाङ्क्षितविधिश्च स्यात् । एककोटिसिंहमात्रप्राप्तावपि कोट्यन्तरकर्कटाप्राप्तौ च व्यवस्थाविधिः सङ्कुच्छत एव । "पाठतो द्वितीयस्थाने तनूनपात्प्रयाजप्राप्तौ नाराशंसस्य चाप्राप्तौ वासिष्ठादीनां नाराशंसो द्वितीयः प्रयाजस्तनूनपादन्येषामितिवत्" इति तातचरणाः । कात्यायनः—

उत्कर्षः कालवृद्धौ स्यादुपाकर्मादिकर्मणि ॥

पराशरः—

उपाकर्म तथोत्सर्गः प्रसवाहोत्सवाष्टकाः ।
मासवृद्धौ परे कार्या वर्जयित्वा तु पैतृकम् ॥ इति ।

परे उत्तरे मासि । प्रसवाहोत्सवो जातेष्ट्यादिः । संग्रहे—

गुरुभार्गवयोर्मौढ्ये बाल्ये वा वार्धकेऽपि वा ।
तथाधिमाससंसर्पमलमासादिषु द्विजाः ॥
प्रथमोपाकृतिर्न स्यात्कृतं कर्म विनाशकृत् ॥ इति ।

अत्राधिमाससंसर्परूपौ मलमासौ ग्राह्यौ न तु मलमासोऽत्र क्षयः । तत्रोपाकर्मणः प्राप्त्यभावात् । आदिशब्देनातिचारादयः । अत्राधिमासादौ प्रथमोपाकर्मनिषेधः प्रत्यवायातिशयद्योतको न तु द्वितीयादिप्रयोगप्राप्त्यर्थः नित्यस्यापि सगतिकस्यापि मले कर्तुमशक्यत्वात् । कात्यायनादिभिः सर्वप्रयोगसाधारण्येन निषेधाच्च । यद्वा, सामगानामधिमासे कर्तव्यतयोपाकृतेर्विहितत्वेनायं प्रथमोपाकृतिनिषेधः सामगविषय एव । यत्तु कश्यपः—

गुरुशुक्रतिरोधाने वर्जयेच्छ्रुतिचोदितम् ।
इत्याह भगवानत्रिः श्रावणं तु विशेषतः ॥ इति ।

तदपि प्रथमोपाकर्मपरम् । यत्तु ऋष्यशृङ्गः—

दशहरासु नोत्कर्षश्चतुर्ष्वपि युगादिषु ।
उपाकर्ममहाषष्ठ्योर्ह्येतदिष्टं वृषादितः ॥

इति छन्दोगान्प्रति । तेषां सिंहकर्कोपजीवनेन विहितस्योपाकर्मणोऽग्रिममासेऽसंभवात् । कात्यायनः—

प्रत्यब्दं यदुपाकर्म सोत्सर्गं विधिवद्द्विजैः ।
क्रियते छन्दसां तेन पुनराप्यायनं भवेत् ॥
अयातयामैश्छन्दोभिर्यत्कर्म क्रियते द्विजैः ।
क्रीडमानैरपि सदा तत्तेषां सिद्धिकारणम् ॥

कौर्मे— श्रावणस्य तु मासस्य पौर्णमास्यां द्विजोत्तमाः ।
आषाढ्यां प्रौष्ठपद्यां वा वेदोपाकरणं स्मृतम् ॥

अत्राऽषाढी बौधायनपरैव । 'श्रावण्यां पौर्णमास्यामाषाढ्यां वोपाकृत्य' इति तत्सूत्रादिति दीपिकायाम् । युक्तं चेदं 'सामान्यविधिरस्पष्टः संह्रियेत विशेषतः' इति न्यायात् । यत्तु माधवीये निर्णयामृते, उपाकरणमनूद्य मासमात्रं विधीयते । उपाकर्म तु सर्वशाखाप्रत्ययमेकं कर्मेति न्यायेनैकमेव । तेन बह्वृचसामगयोरप्याषाढगतश्रवणहस्तयोरुपाकर्म पौर्णमासीपदं त्ववयुत्यानुवाद इति तन्न, उपसंहारे सत्याषाढ्या अन्यान्प्रत्यप्रवृत्तेः । पौर्णमासीपदादवयुत्यानुवादायोगाच्च ।

गोभिलः—पर्वण्यौदयिके कुर्युःश्रावणे तैत्तिरीयकाः ।
बह्वृचाः श्रवणर्क्षे तु हस्तर्क्षे सामवेदिनः । इति ॥

औदयिक इति श्रवणहस्ताभ्यामपि संबध्यते । औदयिकं पर्व विशिनष्टि स एव,

श्रावणी पौर्णमासी तु सङ्गवात्परतो यदि ।
तदा त्वौदयिकी ग्राह्या नान्या त्वौदयिकी भवेत् । इति ।

परिशिष्टे—

धनिष्ठाप्रतिपद्युक्तं त्वाष्ट्रऋक्षसमन्वितम् ।
श्रावणं कर्म कुर्वीरन्नृग्यजुः सामपाठकाः ।

त्वाष्ट्रं चित्रा । प्रचेताः—भवेदुपाकृतिः पौर्णमास्यां पूर्वाह्ण एव तु इति । एतद्याजुषपरम् । छन्दोगानां विशेषमाह गोभिलः—

अध्यायानामुपाकर्म कुर्यात्कालेऽपराह्णिके ।
पूर्वाह्णे तु विसर्गः स्यादिति वेदविदो विदुः ॥ इति ।

'उपाकृत्याधीयीत' इति तु सूत्रादिमे उत्सर्जनोपाकर्मणी ग्रहणाध्ययनाङ्गे । ग्रहणाध्ययनं तु ब्रह्मचारिण एव 'अधीत्य स्नायात्' इति स्मृत्या

ऽध्ययनप्राक्कालीनत्वावगतेः । अतो ब्रह्मचारिण एवेमे इति केचित् । तन्न, स्नातकस्यापि ग्रहणाध्ययनसंभवात् ।

वेदं व्रतानि वा पारं नीत्वा ह्युभयमेव वा ।
अविप्लुतब्रह्मचर्यो लक्षण्यां स्त्रियमुद्वहेत् ।

इति याज्ञवल्क्यवाक्येन 'समावृत्तो ब्रह्मचारिकल्पेन यथान्यायमितरे जायोपेयेत्येके ' इत्याश्वलायनसूत्रेण च स्नानोत्तरमपि तद्विधानात् । अधीयीतेत्यनुवृत्तिः । समावृत्तः अकृतविवाहः, ब्रह्मचारिकल्पस्तन्नियमजातम् । इतरे ब्रह्मचारिणः । जायोपेतो गृहस्थः एवं च त्रयोऽप्यधिकारिण इति । माधवोऽप्येवम् । यत्तु हेमाद्रिः—'जायोपेयी ' इति पपाठ समावृत्तो जायोपेयीति विशेषणविशेष्यभावेन च व्याचष्टे । तन्न, व्यवहितान्वयात्समावृत्तपदवैयर्थ्यापाताच्च । हरदत्तस्तु—उपाकृत्याधीयीतेत्यध्ययनपदेन ग्रहणधारणब्रह्मयज्ञपारायणाद्यर्थोच्चारणमात्रं गृह्यते, न ग्रहणाध्ययनमात्रम् । तेन तद्वतां ब्रह्मचारिगृहस्थवानप्रस्थानां त्रयाणामप्ययं धर्मः । ' जायोपेया ' इति च पाठः । तत्र च समावृत्तो ब्रह्मचारिकल्पेन इति प्राप्तं ब्रह्मचर्यं स्मृतौ प्रतिप्रसूयते । जाया उपेया गम्येति । मनुस्मृतिटीकायां नारायणीयायामप्येवम् । नारायणवृत्तौ तु ' अथातोऽध्यायोपाकर्म ' इति सूत्रव्याख्याने ' यस्माद्ब्रह्मयज्ञाध्ययनं नित्यमत उपाकर्मावश्यकम्' इत्यादिना ब्रह्मयज्ञाङ्गताप्युक्ता । अतः सर्वैरपि कार्यम् । अत एव जीर्णप्रयोगरत्ने गोभिलः—

उपाकर्मोत्सर्जनं च वनस्थानामपीष्यते ।
धारणाध्ययनाङ्गत्वाद्गृहिणां ब्रह्मचारिणाम् ॥ इति ।

उपाकर्मण आद्यप्रयोगे च वृद्धिश्राद्धमङ्गमिति नारायणवृत्तौ । 'अत्राध्याप्यैरन्वारब्धोऽध्येष्यमाण ' इत्याश्वलायनादिसूत्राच्चतुरवत्तपञ्चावत्ताख्यभिन्नकल्पानां विश्वामित्रजामदग्न्यादीनामपि सहाधिकारः । 'वसिष्ठशुनकात्रिवध्र्यश्वराजन्यानां नाराशंसो द्वितीयः प्रयाजस्तनूनपादन्येषाम्, इति नाराशंसद्वितीयप्रयाजवतो राज्ञस्तनूनपाद्द्वितीयप्रयाजवतश्च काश्यपादेः पुरोहितस्य ' एतेन राजपुरोहितौ सायुज्यकामौ यजेताम्' इति विहितकुलाययाग इव । तत्रापि समानकल्पयोरेव राजपुरोहितयोरधिकारोऽस्त्विति चेत् । एतदधिकरणस्य तुल्यकल्पाधिकाराधिकरणापवादतया भाष्यादौ प्रतिपादितत्वात् । अत एव कार्ष्णाजिनिः—

उपाकर्मणि चोत्सर्गे यथाकालं समेत्य तु ।
ऋषीन्दर्भमयान्कृत्वा पूजयेत्तर्पयेत्ततः ।। इति ।

व्यासः—ऋषीणामर्चनं सर्वं कर्तव्यं च निवीतिना ।। इति ।

कार्ष्णाजिनिः—

वेदारम्भणतः पूर्वं सक्तुप्राशनतः परम् ।
नवयज्ञोपवीतानि दद्याद्वै धारयेत्ततः ।। इति ।

गालवः—कृत्वा यज्ञोपवीतानि नवानि वसुंधाधिप ।
हुत्वाऽग्नौ गुरवे दत्त्वा पितृभ्यो धारयेत्ततः ।। इति ।

पितृभ्य इत्यत्रापि दत्त्वेत्यनुषज्यते । वायवीये—

उपाकर्मणि विप्रेभ्यो दद्याद्यज्ञोपवीतकम् ।
आयुष्मान् जायते तेन कर्मणा मानवो भुवि ।।

ब्रह्मचारिणो विशेषः , कालादर्शे—

मौञ्जीं यज्ञोपवीतं च नवं दण्डं च धारयेत् ।
अजिनं कटिसूत्रं च नवं वस्त्रं तथैव च ।

अत्र विशेषः कारिकायाम्—

पश्चाद [ग्रेषु ग्रेस्तु] दर्भेषु प्रागग्रेषूपविश्य च ।
आसिच्यापः शरावादौ दर्भास्तत्र निधाय च ।।
प्रागग्रदर्भगर्भास्ते कुर्युर्ब्रह्माञ्जलीनथ ।
सव्याहृति जपन्त्युच्चैः सावित्रीं ब्रह्मयज्ञवत् ।।
त्रिरभ्यस्येयुरोङ्कारं व्याहृतीश्चात्र कर्मणि ।

गोभिलः—उत्सर्जनं च वेदानामुपाकरणकर्म च ।
अकृत्वा वेदजप्येन फलं प्राप्नोति मानवः ।।

इत्युपाकर्मनिर्णयः ।

अथोत्सर्जनम् ।

मनुः—पुष्ये तु छन्दसां कुर्याद्बहिरुत्सर्जनं द्विजः ।
माघशुक्लस्य वा प्राप्ते पूर्वाह्णे प्रथमेऽहनि ।। इति ।

व्यवस्थितश्चायं विकल्पः,

श्रावण्यां प्रौष्ठपद्यां वाप्युपाकृत्य यथाविधि ।
युक्तश्छन्दांस्यधीयीत मासान्विप्रोर्ध्वपञ्चमान् ।

इति तेनैवोक्तत्वात् । पूर्वाह्णे प्रथमेऽहनि, इत्युभयत्र संबध्यते । एवं च यदा श्रावण्यामुपाकर्म तदा पौषमासशुक्लप्रतिपदि पूर्वाह्णे उत्सर्जनम् ।

यदा तु प्रौष्ठपद्यामुपाकर्म तदा माघशुक्लप्रतिपत्पूर्वाह्णे इति चन्द्रिकादयः। विज्ञानेश्वरयोगिनस्तु पूर्वाह्ण इत्येव पदं पुष्येऽन्वेति न तु शुक्लपक्षादि। पौषमासस्य रोहिण्यामष्टकायामथापि वा इति तत्र कालविशेषस्योक्तत्वादित्याहुः। युक्तं तु 'पूर्वाह्णे वैदिकं कर्म' इति पूर्वाह्णस्यापि प्राप्तेर्न तस्यापि विधानम्। एवं च यदा पौषरोहिण्यष्टकयोरेवोत्सर्जनं तदार्धपञ्चमानित्यत्रार्द्धशब्दश्चन्द्रार्द्धमौलिरित्यादिवत्खण्डवचन एव। अनियतत्वं च बौधायनोक्तेः। श्रावण्यां पौर्णमास्यामाषाढ्यां वा उपाकृत्य तैष्यां माघ्यां वा उत्सृजेत् इति। वसिष्ठेनाप्युक्तम्—अर्धपञ्चमासानधीत्योत्सृजति अर्द्धषष्ठान्वा इति। यत्तु कात्यायनः—

उपाकृत्योदगयने ततोऽधीयीत धर्मवित्।
उत्सर्गश्चैक एवैषां तैश्च प्रौष्ठपदेऽपि वा॥ इति।

तत्र प्रौष्ठपदपदं सिंहोपलक्षकम्। तच्छन्दोगपरमेव।

सिंहे रवौ तु पुष्यर्क्षे पूर्वाह्णे विचरेद्बहिः।
छन्दोगा मिलिताः कुर्युरुत्सर्गं सर्वछन्दसाम्॥

इति गार्ग्यवचनात्। खादिरगृह्ये—पुष्ये तूत्सर्जनं कुर्यादुपाकर्म दिनेऽथवा' इति। कालान्तरमप्युक्तम्। एतदनुकूलैव श्रुतिः। 'स्वाध्यायमधीतेऽब्दम् इति। अत एव उत्सर्जनशब्देन कालोपलक्षणम्। पूर्वोक्तस्यायं वचनार्थः। सामगानां द्वे उपाकर्मणी। एकं सिंहार्कहस्ते, परं मकरार्कहस्ते, तत्र पूर्वं ग्रामगेयसामाध्ययनार्थम्। अपरं च आरण्यगेयसामाध्ययनार्थम्। अत एवोपाकृत्योदगयन इति। उपाकर्मद्वयविधानाच्चोत्सर्जनद्वयप्राप्ते उत्सर्गश्चैक एवैषामित्यर्थवत्। अत्र ऋषिपूजा तर्पणं च कार्यम्। तथा च स्मृतिचन्द्रिकायां पुराणम्—

उपाकर्मणि चोत्सर्गे यथाकालं समेत्य च।
ऋषीन्दर्भमयान्कृत्वा पूजयेत्तर्पयेत्ततः॥

आश्वलायनैस्तु माघ्यामेव कार्यम्। 'अध्यायोत्सर्जनं माघ्यां पौर्णमास्यां विधीयते' इति कारिकोक्तेः। अनुकल्पस्तु पूर्वं खादिरगृह्योक्तेर्ज्ञेयः। उत्सर्जनोत्तरं कार्यं मनुराह—

अत ऊर्ध्वं तु छन्दांसि शुक्लेषु नियतः पठेत्।
वेदाङ्गानि तु सर्वाणि कृष्णपक्षे तु संपठेत्॥

कारिकायां तु विशेषः—

अत आरभ्य षण्मासान्षडङ्गानि त्वधीयते ।
शुक्ले वेदमधीयीत कृष्णेऽङ्गानीति केचन ॥ इति ।

तैत्तिरीयाणां विशेषमाहापस्तम्बः—'तैष्यां पौर्णमास्यां रोहिण्यां वा विरमेदर्द्धपञ्चमांश्चतुरो मासान् इत्येके' इति । अत्र नदीनां रजोदोषो नेत्याह गार्ग्यः—

उपाकर्मणि चोत्सर्गे रजोदोषो न विद्यते ।

इत्युत्सर्जनम् ।

सर्पबलिः श्रवणाकर्म च ।

श्रावण्यामेव रात्रौ सर्पबलिस्तैत्तिरीयाणाम् । 'श्रावण्यां पौर्णमास्यां स्थालीपाकः' इति सूत्रात् । आश्वलायनैस्तु श्रवणाकर्म कार्यम् । इदं प्रदोषव्यापिन्यां पौर्णमास्यां कार्यम् । प्रदोषस्य कर्मकालत्वात् ।

कर्मणो यस्य यः कालस्तत्कालव्यापिनी तिथिः ।
तया कर्माणि कुर्वीत ह्रासवृद्धी न कारणम् ॥

इति वाक्यात् । दिनद्वये तद्व्याप्तावव्याप्तौ च उत्तरदिने, विकृतित्वात् । एवं सर्पबलिरपि एतस्यामेव पौर्णमास्याम् । तत्राप्येवमेव निर्णयः ।

आश्वयुजीकर्म ।

आश्विनपौर्णमास्यामावर्तनप्राक्सन्धिमति प्रकृतिविकृतिप्रयोगपर्याप्ते पर्वणि केवलस्मार्ताभिमतां बह्वृचानामाश्वयुजीकर्माग्रयणपार्वणस्थालीपाकाः समानतन्त्राः ।

'पाकयज्ञान्समासाद्य एकाज्यानेकबर्हिषः ।
एकस्विष्टकृतः कुर्यान्नानापि सति दैवते' ॥

इति तत्सूत्रात् । 'दर्शेष्टेः परमुक्तमाग्रयणकं प्राक्पौर्णमासाच्च तत्' इति दीपिकादिलेखस्त्वेतत्सूत्रागोचरश्रौतपरः इष्टिपदात् । आश्वलायनान्यपरो वा । व्रीह्याग्रयणमस्यामेव 'श्यामाकैः प्रस्तरः कार्यो नाग्रयणम्' इति नारायणवृत्तौ प्रयोगरत्ने च । तत्र प्रस्तरशब्दस्य यूपादिशब्दवत्संस्कारवाचित्वाद्दर्शपूर्णमासिकलवनादियुक्तं प्रस्तरं कृत्वाऽऽज्यपात्रादुत्तरत आसाद्य प्राकृतकार्याबाधार्थं तस्मिन् जुहूमासादयेत् ।

कार्तिकेयदर्शनं त्रिपुरोत्सवश्च ।

कार्तिकपौर्णमास्यां कार्तिकेयदर्शनमुक्तं काशीखण्डे—

कार्तिक्यां कृत्तिकायोगे यः कुर्यात्स्वामिदर्शनम् ।
सप्तजन्म भवेद्विप्रो धनाढ्यो वेदपारगः ॥ इति ।

त्रिपुरोत्सवोऽप्यत्रोक्तो भविष्ये—

पौर्णमास्यां तु सन्ध्यायां कर्तव्यस्त्रिपुरोत्सवः ।
दद्यादनेन मन्त्रेण सुदीपांश्च सुरालये ॥
कीटाः पतङ्गा मशकाश्च वृक्षा
जले स्थले ये विचरन्ति जीवाः ।
दृष्ट्वा प्रदीपं नहि जन्मभागिनो
भवन्ति सत्यं श्वपचापि विप्राः ॥ इति ।

होलिकोत्सवः ।

फाल्गुनपौर्णमास्यां होलिकोत्सवः । नृपं प्रति नारदवचो भविष्ये—

अद्य पञ्चदशी शुक्ला फाल्गुनस्य नराधिप ।
अभयं चैव लोकानां दीयतां परमेश्वर ॥
यथा ह्यशङ्किता लोका रमन्ति च हसन्ति च ।
दारुजानि च खण्डानि गृहीत्वा सुसमुत्सुकाः ॥
योधा इव विनिर्यान्तु शिशवः संप्रहर्षिताः ।
सञ्चयं शुष्ककाष्ठानामुपलानां च कारयेत् ॥
तत्राग्निं विधिवद्धुत्वा रक्षोघ्नैर्मन्त्रवित्तमैः ।
ततः किलकिलाशब्दैस्तालशब्दैर्मनोहरैः ॥
तेन शब्देन सा पापा होमेन च निराकृता ॥

सा ढोण्ढाख्या राक्षसी । तत्रैव—

सर्वदुष्टापहो होमः सर्वरोगोपशान्तिदः ।
क्रियतेऽस्यां द्विजैः पार्थ तेन सा होलिका स्मृता ॥ इति ।
तमग्निं च परिक्रम्य गायन्तु च हसन्तु च ।
जल्पन्तः स्वेच्छया लोका निःशङ्का यस्य यन्मनः ॥

तत्र पूर्णिमा प्रदोषव्यापिनी ग्राह्या । तदुक्तं तत्रैव—

सायाह्ने होलिकां कुर्यात्पूर्वाह्णे क्रीडनं गवाम् ॥ इति ।

सायाह्नोऽत्र प्रदोषः । तथा च तत्रैव—

तपस्यपूर्णमास्यां तु रजन्यां होलिकोत्सवः ॥ इति ।

चन्द्रप्रकाशे नारदोऽपि—

प्रतिपद्भूतभद्रासु यार्चिता होलिका दिवा।
संवत्सरं च तद्राष्ट्रं पुरं दहति साद्भुतम् ॥
प्रदोषव्यापिनी ग्राह्या पूर्णिमा फाल्गुनी सदा।
तस्यां भद्रामुखं त्यक्त्वा पूज्या होला निशामुखे ॥ इति।

निशागमे तु पूज्येत होलिका सर्वतोमुखैः' इति पृथ्वीचन्द्रोदये दुर्वाससो वचनाच्च। दिनद्वये प्रदोषव्याप्तौ परैव

भद्रायां दीपिता होली राष्ट्रभङ्गं करोति वै।
नगरस्य च नैवेष्टा तस्मात्तां परिवर्जयेत् ॥ इति।

पूर्वदिने भद्रायुक्तत्वेन पुराणसमुच्चयोक्तनिषेधात्। पूर्वदिने प्रदोषव्यापिनी न परदिने चेत्तदा पूर्वेद्युरेव रात्रौ भद्रां विहाय कार्या।

दिनार्द्धात्परतो या स्यात्फाल्गुनी पूर्णिमा यदि।
रात्रौ भद्रावसाने तु होलिकां तत्र पूजयेत् ॥

इति भविष्योत्तरात्,

राका यामद्वयादूर्ध्वं चतुर्दश्यां यदा भवेत्।
होलां भद्रावसाने तु निशीथान्तेऽपि दीपयेत् ॥

इति पुराणसमुच्चयात्। यत्तु,

भद्रायां विहितं कार्यं होलिकायाः प्रपूजनम्। इति

यच्च,

मध्यरात्रमतिक्रम्य विष्टेः पुच्छं यदा भवेत्।
प्रदोषे ज्वालयेदग्निं सुखसौभाग्यदायकम् ॥
प्रदोषान्मध्यरात्रान्तं होलिकापूजनं शुभम् ॥

इति च कैश्चिदलेखि तदनाकरम्। यदा तु पूर्वरात्रौ प्रदोषव्याप्त्यभावः तत्सत्वेऽपि वा भद्रारहितः कालो न प्राप्यते, उत्तरदिने च प्रदोषे पूर्णिमाभावः, तदा भद्रापुच्छे कार्यम्। तथा च लल्लः—

पृथिव्यां यानि कार्याणि शुभानि त्वशुभानि च।
तानि सर्वाणि सिध्यन्ति विष्टिपुच्छे न संशयः ॥ इति।

भद्रापुच्छं तु ज्योतिःशास्त्रे प्रसिद्धम्। अस्मिन्नेव विषय उत्तरदिने पूर्णिमा सार्द्धयामत्रयमिता ततोधिका प्रतिपदश्च वृद्धिस्तदा पूर्णिमोत्तरं प्रतिपदि प्रदोषे होलिका कार्या न तु पूर्वेद्युर्विष्टिपुच्छे।

सार्द्धयामत्रयं पूर्णा द्वितीये दिवसे यदा।
प्रतिपद्वर्द्धमाना तु तदा सा होलिका स्मृता ॥

इति भविष्योक्तेः। या तूत्तरदिने प्रदोषैकदेशेऽस्ति पूर्वरात्रौ च भद्रारहिता नैव लभ्यते सा सुतरामुत्तरैव । यदा पूर्वरात्रिर्भद्राव्याप्ता उत्तरदिने प्रदोषे च चन्द्रग्रहणं तदा तत्र स्नात्वा च कार्यम् । स्नात्वा कर्माणि कुर्वीत शृतमन्नं विवर्जयेत्, इति वचनात् । फाल्गुनो मलमासश्चेत् शुद्धमासि होलिका कार्या । 'स्पष्टमासविशेषाख्यविहितं वर्जयेन्मले' इति वचनात् । होलिकापूजामन्त्रस्तु—

असृक्पाभयसंत्रस्तैः कृता त्वं होलि बालिशैः ।
अतस्त्वां पूजयिष्यामि भूते भूतिप्रदा भव ॥

इति दिक् ।

इति पूर्णिमानिर्णयः ।

अमानिर्णयः विशेषश्च ।

अथामावास्या । सा सर्वत्र व्रतोपवासादावुत्तरा । 'प्रतिपद्यप्यमावास्या' इति युग्मवाक्यात् । 'अमावास्या तृतीया च ता उपोष्याः परान्विताः' इति स्मृतेश्च । 'भूतविद्धा त्वमावस्या न ग्राह्या मुनिपुङ्गवैः' इति स्कांन्दे पूर्वनिषेधाच्च । अस्यां सोमवासरयोगे कपिलधारातीर्थे श्राद्धमुक्तं काशीखण्डे—

अमासोमसमायोगे श्राद्धं यद्यत्र लभ्यते
तीर्थे कपिलधारेऽस्मिन् गयया पुष्करेण किम् ।
दिव्यान्तरिक्षभौमानि यानि तीर्थानि सर्वशः ॥
तान्यत्र निवसिष्यन्ति दर्शे सोमदिनान्विते ।

कुशग्रहणम् ।

भाद्रामावास्यायां कुशग्रहणमुक्तम् । हारीतः—

मासे नभस्यमावास्या तस्यां दर्भोच्चयो मतः ।
अयातयामास्ते दर्भा विनियोज्याः पुनः पुनः ॥ इति ।

लक्ष्मीपूजनम् । उल्कादर्शनम् ।

कार्तिकामावास्यायां कृत्यमुक्तमादित्यपुराणे—

दिवा तत्र न भोक्तव्यमृते बालातुराज्जनात् ।
प्रदोषसमये लक्ष्मीं पूजयित्वा यथाक्रमम् ॥
दीपवृक्षास्तथा कार्याः शक्त्या देवगृहेषु च ।

ब्राह्मणान्भोजयित्वाऽऽदौ संभोज्य च बुभुक्षितान् ॥
अलङ्कृतेन भोक्तव्यं नववस्त्रोपशोभिना ॥ इति ।

अत्रामावास्यायां ज्योतिर्निबन्धेऽपि—

तुलाराशौ सहस्रांशौ प्रदोषे भूतदर्शयोः ।
उल्काहस्ता नराः कुर्युः पितॄणां मार्गदर्शनम् ॥ इति ।

अत्र प्रदोषस्य कर्मकालत्वोक्तेः पूर्वेद्युरेव तद्व्याप्तौ पूर्वैव । उत्तरेद्युरेवोभयेद्युर्वा तथात्व उत्तरैव । भविष्ये कृत्वा तु पार्वणश्राद्धमित्युक्त्वा 'ततोऽपराह्णसमये' इत्यादीनां दीपदानादेरुक्तत्वाद्दर्शश्राद्धोत्तरमेव तत्कर्तव्यमिति न भ्रमितव्यम् । नह्यत्रानयोः क्रमो विधीयते । किन्त्वखण्डामाया एव प्रायो व्यवहार्यत्वेन प्राप्तत्वादनूद्यते । उभयदिने तद्व्याप्त्यभावे पूर्वैव । गौणकाले सत्वात् ।

अर्धोदयः । अमत्रदानम् ।

अथार्द्धोदयः । भारते—

अमार्कपातश्रवणैर्युक्ता चेत्पौषमाघयोः ।
अर्द्धोदयः स विज्ञेयः कोटिसूर्यग्रहैः समः ॥
दिवैव योगः शस्तोऽयं न तु रात्रौ कदाचन ।

धर्माब्धौ तु—पौषमाघयोर्मध्यवर्तिनीत्यर्थे इत्येके । अमान्तमासे पौषस्य पूर्णिमान्तमासे माघस्य चेत्यर्थ इत्यपरे । सर्वथा पौषपौर्णमास्युत्तराऽऽमावास्येत्यर्थः । निर्णयसिन्धौ पौषमाघयोर्मध्यवर्तिनी पौर्णमास्युत्तराऽऽमावास्येत्यर्थ इति भट्टाः । तेन पौषमाघमध्यवर्तिनी अमान्तपौषकृष्णामा इत्यर्थः । किञ्चिन्न्यूनं महोदयः इति चतुर्थपादं केचित्पठन्ति, तन्निर्मूलमिति निर्णयसिन्धुकाराः । तथा च 'दिवैव योगः' इत्यर्थमन्यनिबन्धेष्वभावान्निर्णयामृतमात्रोक्तेर्निर्मूलमेव, तेन हेमाद्र्यादिमते रात्रावपि भवतीति निर्णयसिन्धौ त एव वदन्ति ।

स्कान्दे—अर्द्धोदये तु संप्राप्ते सर्वं गङ्गासमं जलम् ।
शुद्धात्मानो द्विजाः सर्वे भवेयुर्ब्रह्मसंमिताः ॥
यत्किञ्चिद्दीयते दानं तद्दानं मेरुसंनिभम् ॥ इति ।

तत्रैव— चतुःषष्टिपलं मुख्यममत्रं तत्र कारयेत् ।
चत्वारिंशत्पलं वाथ पञ्चविंशतिमेव वा ॥
निधाय पायसं तत्र पद्ममष्टदलं लिखेत् ।

पद्मस्य कर्णिकायां तु कर्षमात्रं सुवर्णकम् ॥
तदभावे तदर्द्धं वा तदर्द्धं वापि धारयेत् ।
कृत्वा तु तण्डुलैः शुद्धैः पद्ममष्टदलं शुभम् ॥
अमत्रं स्थापयेत्तत्र ब्रह्मविष्णुशिवात्मकम् ।
तेषां प्रीतिकरार्थाय श्वेतमाल्यैः सुशोभनैः ॥
वस्त्रादिभिरलङ्कृत्य ब्राह्मणाय निवेदयेत् ।

मन्त्रश्च—सुवर्णपायसामत्रं यस्मादेतत्त्रयीमयम् ।
आपत्तेस्तारकं यस्मात्तद्गृहाण द्विजोत्तम ॥ इति ।
समुद्रमेखलां पृथ्वीं सम्यग्दातुश्च यत्फलम् ।
तत्फलं लभते मर्त्यः कृत्वा दानममत्रकम् ॥ इति ।

अमत्रं पात्रम् ।

फाल्गुनकृष्णाऽमावास्या अन्ये यागाश्च ।

फाल्गुनामावास्यायां रुद्रादिपूजा लैङ्गे, फाल्गुनप्रक्रमे—
अमावास्यायां पूज्याश्च रुद्रोऽग्निर्ब्राह्मणास्तथा ।
मांसौदनैः पौलिकाभिः पूज्यश्चात्मा सबान्धवः ॥ इति ।

शङ्खः— अमावास्या तु सोमेन सप्तमी भानुना सह ।
चतुर्थी भूमिपुत्रेण सोमपुत्रेण चाष्टमी ॥
चतस्रस्तिथयो ह्येताः सूर्यग्रहणसंनिभाः ।
स्नानं दानं तथा श्राद्धं सर्वं तत्राक्षयं भवेत् ॥ इति ।

तत्रैव—

व्यतीपातयोगः ।

श्रवणाद्यर्कयोगे व्यतीपातः,
श्रवणाश्विधनिष्ठार्द्रानागदैवतमस्तकैः ।
अमा चेद्रविवारेण व्यतीपातः स उच्यते ॥
तत्र जप्तं हुतं दत्तं सर्वं कोटिगुणं भवेत् ॥ इति ।

नागदैवतमाश्लेषा । मस्तकं मृगशीर्षम् ।

श्राद्धविषयेऽमानिर्णयः ।

अथ श्राद्धे अमावास्यानिर्णयः । छन्दोगपरिशिष्टे—
पिण्डान्वाहार्यकं श्राद्धं क्षीणे राजनि शस्यते ।
वासरस्य तृतीयेंऽशे नातिसन्ध्यासमीपतः ॥ इति ।

पिण्डः पिण्डपितृयज्ञः तमनु आह्रियते तत्पिण्डान्वाहार्यकम् । पिंड-पितृयज्ञानन्तरभावीति यावत् । राजनि चन्द्रे तस्मिन् क्षीणे अमावास्या-या मित्यर्थः । अत्र यद्यपि 'पूर्वाह्नो वै देवानां मध्यन्दिनो मनुष्याणामपराह्णः पितृणाम्' इति श्रुत्यालोचनया त्रेधा विभक्तदिनान्त्यभाग एव प्रतीयते, तथापि,

सायाह्नस्त्रिमुहूर्तः स्याच्छ्राद्धं तत्र न कारयेत् ।
राक्षसी नाम सा प्रोक्ता गर्हिता सर्वकर्मसु ॥

इति नियमात् सायाह्नस्य श्राद्धकालत्वे प्रतिषिद्धेऽर्थादेकादशद्वादशमुहूर्त्तयोस्तत्कालत्वं सिद्ध्यति । यत्तु दीपिकायां हेमाद्रिसिद्धान्त उक्तः 'त्रिधांशितदिनस्यान्त्येऽपराह्णे चरेत्' इति सोऽप्येतत्परतयैव कथंचिद्व्याख्येयः । माधवीयमपराह्णपदमप्येवम् । 'अष्टमुहूर्ताख्यकुतपे आरम्भः । नवमे रौहिणे समाप्तिः' इति तु एकोद्दिष्टविषयम् । 'कुतपप्रथमे भागे एकोद्दिष्टमुपक्रमेत् । आवर्तनसमीपे वा तत्रैव नियतात्मवान्' इति व्यासोक्तेः ।

आरभ्य कुतपे श्राद्धं कुर्यादारौहिणं बुधः ।
विधिज्ञो विधिमास्थाय रौहिणं तु न लङ्घयेत् ॥

इति श्लोकगौतमोक्तेश्च । यत्तु नारदेन—

मध्याह्नस्त्रिमुहूर्तं तु यदा चरति भास्करः ।
स कालः कुतपो नाम पितॄणां दत्तमक्षय्यम् ॥

इति मुहूर्तत्रयात्मकत्वं कुतपस्योक्तम् 'त एकोद्दिष्टं तु मध्याह्न' इत्यादिना मुहूर्तत्रयात्मकमध्याह्नस्यैकोद्दिष्टकालतया विधानेऽष्टमनवममुहूर्तयोश्च तत्कालतया विनियोगेऽवशिष्टस्य सप्तमस्योपयोगाकाङ्क्षायां गौणकालपरत्वमिति । यत्तु मात्स्ये—

अष्टमे भास्करो यस्मान्मन्दीभवति सर्वदा ।
तस्मादनन्तफलदस्तत्रारम्भो विशिष्यते ॥
ऊर्ध्वं मुहूर्तात्कुतपाद्यन्मुहूर्तचतुष्टयम् ।
मुहूर्तपञ्चकं ह्येतत्स्वधाभवनमिष्यते ॥ इति ।

'तदेकोद्दिष्टपार्वणकालकोडीकाराभिप्रायम् । पार्वणे त्वेकादशद्वादशमुहूर्तयोरेव मुख्यकालत्वं न मुहूर्तत्रयस्य । तत्र वैषम्येण एकदेशन्यासौ स्मृत्यन्तरे—

अपराह्णद्वयव्यापिन्यमावास्या यदा भवेत् ।
तत्रात्पत्वमहत्त्वाभ्यां निर्णयः पितृकर्मणि ॥ इति ।

अधिका प्राह्येत्यर्थः । साम्येन एकदेशव्याप्तौ उभयापराह्णव्याप्तौ च खर्वदर्पादिना निर्णयः ।

खर्वो दर्पस्तथा हिंसा त्रिविधं तिथिलक्षणम् ।
खर्वदर्पौ परौ पूज्यौ हिंसा स्यात्पूर्वकालिकी ॥

इति व्याघ्रवचनम् । खर्वः साम्यम् । दर्पो वृद्धिः । हिंसा क्षयः । तथा च शिवराघवसंवादेऽपि—

अमावास्या तु या हि स्यादपराह्णद्वयेऽपि सा ।
क्षये पूर्वा परा वृद्धौ साम्येऽपि च परा स्मृता ॥ इति ।

स्मृत्यन्तरे—

तिथिक्षये सिनीवाली तिथिवृद्धौ कुहूर्मता ।
साम्ये चैव कुहूर्ज्ञेया वेदवेदाङ्गवेदिभिः ॥ इति

पूर्वा सिनीवाली उत्तरा कुहूः । 'दृष्टचन्द्रा सिनीवाली नष्टचन्द्रा कुहूर्मता' इति व्यासोक्तेः । दिनद्वये कालास्पर्शे जाबालिः—

अपराह्णद्वयाव्यापी यदि दर्शस्तिथिक्षये ।
आहिताग्नेः सिनीवाली निरग्न्यादेः कुहूर्मता ॥ इति ।

आदिशब्दात्स्त्रीशूद्रयोरपि ग्रहणम् ॥

सिनीवाली द्विजैः कार्या साग्निकैः पितृकर्मणि ।
स्त्रीभिः शूद्रैः कुहूर्ज्ञेया तथा चानग्निकैर्द्विजैः ॥

इति लौगाक्षिवचनात् ।

इति विशेषतिथयो निर्णीताः ।

अथ इष्टिकालः ।

सा च पर्वप्रतिपत्सन्धौ कार्या । तदाह गोभिलः—'पक्षान्ता उपवस्तव्याः पक्षादयो यष्टव्याः सन्धिमभितो यजेत' इति । उपवासोऽग्न्यन्वाधानम् । तत्रातिसूक्ष्मतरे सन्धौ यागानुष्ठानस्याशक्यत्वात् । पूर्वदिने पर्वणि आरम्भ उत्तरदिने च प्रतिपदि यागसमाप्तिः । तथाच श्रुतिः—

'पूर्वेद्युरग्निं गृह्णाति उत्तरमहर्यजति ॥ इति'।

'पूर्वेद्युरिध्माबर्हिः करोति । यज्ञमेवारभ्य गृहीत्वोपवसति' इति । तथाच—

उपास्मिञ्छ्वो यक्ष्यमाणे देवता वसन्ति ।
य एवं विद्वानग्निमुपस्तृणाति ॥ इति ।

तत्र पर्वणोऽशत्रयमन्वाधानकालः । तच्चतुर्थांशसहितं प्रतिपदोऽशत्रयं यागकालः । न संपूर्णं पर्वान्वाधानस्य । नापि संपूर्णा प्रतिपद्यागस्य । तथा च लौगाक्षिः—

त्रीनंशानौपवस्तस्य यागस्य चतुरो विदुः ।
द्वावंशावुत्सृजेदन्त्यौ यागे च व्रतकर्मणि ॥ इति ।

प्रतिपत्पर्वणोरन्त्यावंशौ यागोपवासयोस्त्याज्यौ, इत्यर्थः । तत्र यागकालमाह वृद्धशातातपः—

पर्वणो यश्चतुर्थांश आद्याः प्रतिपदस्त्रयः ।
यागकालः स विज्ञेयः प्रातर्युक्तो मनीषिभिः ॥ इति ।

प्रातस्तदवच्छिन्न इत्यर्थः, 'न यष्टव्यं चतुर्थांशे' इति कातीयं तु द्वितीयपादार्थमेवानुवदति । अत्र पर्वप्रतिपदोः संपूर्णत्वे सन्देह एव नास्ति । खण्डत्वे तु तयोर्निर्णयमाह गोभिलः—

आवर्तने यदा सन्धिः पर्वप्रतिपदोर्भवेत् ।
तदहर्याग इष्येत परतश्चेत्परेऽहनि ॥ इति ।
पर्वप्रतिपदोः सन्धिरर्वागावर्तनाद्यदि ।
तस्मिन्नहनि यष्टव्यं पूर्वेद्युस्तदुपक्रमः ॥
आवर्तनात्परः सन्धिर्यदि तस्मिन्नुपक्रमः ।
परेद्युरिष्टिरित्येष पर्वद्वयविनिश्चयः ॥ इति ।

आवर्तनं दिनमध्यम् । अत्र पर्वापेक्षया यावती प्रतिपदो वृद्धिः क्षयो वा तदर्द्धमानेन पर्वणो ह्रासं वृद्धिं वा कल्पयित्वा सन्धिर्निर्णेयः । तथा च कात्यायनः—

परेऽह्नि घटिका न्यूनास्तथैवाभ्यधिकाश्च याः ।
तदर्धंकृत्या पूर्वस्मिन् ह्रासवृद्धी प्रकल्पयेत् ॥ इति ।

लौगाक्षिरपि—

तिथेः परस्या घटिकास्तु याः स्यु-
र्न्यूनास्तथा वाभ्यधिकास्तु तासाम् ।
अर्द्धं वियोज्यं च तथा प्रयोज्यं
ह्रासे च वृद्धौ प्रथमे दिने तत् ॥ इति ।

अत्र केचिद्यदि चतुर्दशी दशदण्डा पर्व च पञ्चदशदण्डमितं प्रतिपत्तु एकोनविंशतिदण्डा तदा प्रतिपद्वृद्धेरर्धं दण्डद्वयं पर्वान्ते प्रक्षिपन्ति; एवं यदि चतुर्दशी पञ्चविंशतिदण्डा पर्वैकोनविंशतिदण्डं प्रतिपच्चतुर्दशदण्डा तदा प्रतिपद्ह्रासार्द्धं सार्द्धघटिकाद्वयं पर्वान्ते (?) क्षिपन्ति तदयुक्तम्; ईदृशे विषये पर्वापेक्षया प्रतिपदो ह्रासस्य वृद्धेर्वाऽभावा[illegible]। प्रत्युत वृद्ध्युदाहरणे ह्रास एवास्ति ह्रासोदाहरणे च वृद्धिरिति। नहि घटिकान्यूनाधिक्यभावेन ह्रासवृद्धी भवतः। किन्तु चतुर्दश्युत्तरं यावत्यः पर्वघटिकास्तत आधिक्ये न्यूनत्वे वा प्रतिपदो ह्रासवृद्धी इत्येवमालोच्य सन्धिर्निर्णेयः।

अत्र दिनद्वये पूर्वोदाहृतशातातपोक्तयागकालसत्वे कस्मिन्दिने याग इत्याकाङ्क्षायां सन्धिशास्त्रं निर्णायकम्।[1] दिनद्वये यागकालासत्वेऽपराह्णसन्धौ च प्रतिपच्चतुर्थांशस्य गौणकालतामाह वृद्धशातातपः—

सन्धिर्यत्रापराह्णे स्याद्यागं प्रातः परेऽहनि।
कुर्वाणः प्रतिपद्भागे चतुर्थेऽपि न दुष्यति॥ इति।

यदि तु 'न यष्टव्यं चतुर्थेंऽशे' इति निषेधः स्यान्न स्यात्तदा गौणकालत्वम् 'अयज्ञिया वै माषा वरटाश्चणकाः कोद्रवाः' इति प्रतिनिधिवर्जनवत्, नत्वसौ निषेधः प्रागनुवादत्वसमर्थनात्।[2] एकस्मिन्दिने यागकालस्पर्शोऽधिकोऽन्यत्राल्पस्तदापि सन्धिशास्त्रमेवाऽऽदर्तव्यं नाधिक्यम्। तस्य 'भूयसां स्यात्सधर्मत्वम्' इति न्यायमात्रत्वेन सन्धिनिर्णायकत्वबोधकवचोबाधकत्वायोगात्। यदा प्रतिपद्दिने पञ्चधाविभक्तदिनचतुर्थभागस्वल्पापराह्णव्यापिद्वितीयाप्रवेशेन चन्द्रदर्शनं तदा चतुर्दश्यामन्वाधानं सन्धिदिने च यागः। तथा च वृद्धवसिष्ठः—

आदित्येऽस्तमिते चन्द्रः प्रक्षीण उदियाद्यदि।
प्रतिपद्यतिपत्तिः स्यात्पञ्चदश्यां यजेत्तदा॥

अस्तमिते अस्तासन्ने। बौधायनवृद्धशातातपौ—

त्रिमुहूर्ता द्वितीया चेत्प्रतिपद्यापराह्णिकी।

---

१ °सत्त्वेऽसत्त्वेचेदं संधिशास्त्रं निर्णायकम्। अमुमेवार्थं वृद्धशातातपोऽनुवदति संधिर्यत्रा° इति पाठः। २ दिनद्वये यागकालसत्त्वे संधिशास्त्रप्रवृत्तावपराह्णसंधिवशादुत्तरदिने चतुर्थांशे गौणकाल एव यागप्राप्त्यैतदनुवादक-कुर्वाण-इतिपदस्वरसोऽप्येवम्। यदि तु 'न य° इति पाठः।

अन्वाधानं चतुर्दश्यां परतः सोमदर्शनात् ॥

कात्यायनः—

यजनीयेऽह्नि सोमश्चेद्वारुण्यां दिशि दृश्यते ।
तत्र व्याहृतिभिर्हुत्वा दण्डं दद्याद्द्विजातये ॥

एतानि वचनान्यपराह्णेऽमाप्रतिपत्सन्धिपराणि इति हेमाद्रिः । तन्न । तन्मते ह्येतद्वचनगतापराह्णपदस्य द्वेधाविभक्तदिनान्त्यदलवाचित्वात्तत्र सूर्यास्तात्प्राक्त्रिमुहूर्तादिद्वितीयाप्रवेशेन चन्द्रदर्शने सति रात्रिसन्धावपि परदिने यागनिषेधापत्तेः । नचापराह्णसन्धिशास्त्रेणैव कैमुतिकन्यायेन रात्रिसन्धावपि परदिने यागसिद्धौ,

अपराह्णेऽथवा रात्रौ यदि पर्व समाप्यते ।
उपोष्य तस्मिन्नहनि श्वोभूते याग इष्यते ॥

इति रात्रिसन्धिशास्त्रमनर्थकं स्यात्, अतश्चन्द्रदर्शननिषेधबाधकतयैव रात्रिसन्धिशास्त्रं सार्थकमिति वाच्यम् । अपराह्णशब्देन योगवृत्त्याहर्वर्त्यावर्तनोत्तरभागाभिधानेन रात्रिसन्धौ कैमुतिकन्यायेन तच्छास्त्राप्रवृत्तेः । अतो विनिगमनाविरहादेतानि वचनान्यावर्तने ततः पूर्वमुत्तरं वाऽमाप्रतिपत्सन्धौ प्रवर्तन्ते नापराह्णसन्धावेवेति युक्तम् । एष एवानन्तभाष्यदेवभाष्यशतपथशाङ्खायनभाष्याणामाशयः । त्रिमुहूर्तशास्त्रस्य तु पञ्चधाविभक्तदिनचतुर्थभागरूपापराह्णव्यापिद्वितीयाविषयत्वम्; एवं च 'सोमदर्शनात्' इति हेतूक्तिः संगच्छते, न तु सायाह्ने त्रिमुहूर्तमात्रसत्वे, तत्र चन्द्रदर्शनव्यभिचारात् । यत्तु केचित्, चन्द्रदर्शनमेव यागनिषेधप्रयोजकं न त्रिमुहूर्तद्वितीयाप्रवेश इति । तन्न । त्रिमुहूर्तेत्यादिपूर्वार्द्धस्य पाक्षिकानुवादकत्वापत्तेः । एतच्च दिवासन्धावेव प्रवर्तते न रात्रिसन्धौ, अग्रिमदिने तावतः क्षयस्यासंभवात् । एतद्वतोऽपराह्णशब्दोऽपि यौगिकः सन्दिनद्वितीयभागपर इति चेन्न । अपराह्णपदवैयर्थ्यापत्तेः । यौगिकपारिभाषिकयोः परिभाषासार्थक्याय पारिभाषिकग्रहणस्यैव युक्तत्वाच्च । सन्धिनिर्णये तु द्वेधाविभक्तदिनपूर्वापरभागरूपयोः पूर्वाह्णापराह्णशब्दयोर्मध्याह्नशब्दस्य च यौगिकत्वमेव । पूर्वोक्तगोभिलवाक्ये आवर्तनपदस्यावागावर्तनात्परतश्चेत्यनयोः पदयोः स्वरसात् । यत्त्वेतत्प्रकरणे,

---

१ °नैव सिद्धे परत्र यागानुष्ठाने रात्रिसंधिशास्त्रानर्थक्यापत्तेः । इति पाठः ।

आवर्तनात्तु पूर्वाह्णो ह्यपराह्णस्ततः परम् ।
मध्याह्नस्तु तयोः सन्धिर्यदावर्तनमुच्यते ॥

इति तद्गोभिलोक्तमेव यौगिकार्थमनुवदति नत्वपूर्वां परिभाषां विधत्ते, येन त्रिमुहूर्तवाक्यमपि द्वेधाविभक्तदिनापरभागरूपमपराह्णमुपजीवेत् । अतो दिनमध्ये यदा कदाचित्सन्धौ परदिने पञ्चधाविभक्तदिनचतुर्थभागरूपसकलापराह्णव्यापिद्वितीयासत्त्वे चतुर्दश्यामन्वाधानं सन्धिदिने च याग इति । एष एव निर्णयामृतमदनपारिजातयोराशयो लक्ष्यते । यत्तु माधवादयः 'यजनीयेऽह्नि' इति पूर्वोक्तकातीयबौधायनवचोभ्यां चन्द्रदर्शननिषेधः कातीयबौधायनपर एव नाश्वलायनापस्तम्बादिपर इति, तन्न, उक्तस्मृतिवाक्ययोः सर्वविषयत्वेन सङ्कोचे मानाभावात् । होलाकानये हि गृह्यसूत्राणामपि सर्वपरतोक्ता किं पुनः स्मृतीनां कात्यायनबौधायनापस्तम्बाश्वलायनादिस्मृत्युक्तक्रत्वर्थत्वम् । अन्यथा पुरुषार्थानामपि धर्माणां तत्तच्छाखीयान्प्रति सङ्कोचापत्तिश्च । अत एव माधवोदाहृता स्मृतिः "पर्वणोंऽशे चतुर्थे तु कर्तव्येष्टिर्द्विजोत्तमैः । द्वितीयासहितं यस्माद्दूषयन्त्याश्वलायनाः" । इति सङ्गच्छते ।

इष्टिसमाप्तिश्च प्रतिपन्मध्य एव न पर्वमध्ये—

प्रतिपद्यप्रविष्टायां यदि चेष्टिः समाप्यते ।
पुनः प्रणीय कृत्स्नेष्टिः कर्तव्या यागवित्तमैः ॥ इति गार्ग्योक्तेः ।

पौर्णमास्यां सद्यस्कालतामाह कात्यायनः—

सन्धिश्चेत्सङ्गवादूर्ध्वं प्राक्पर्यावर्तनाद्रवेः ।
सा पौर्णमासी विज्ञेया सद्यस्कालविधौ तिथिः ॥ इति ।

आपस्तम्बः—'पौर्णमास्यामन्वाधानपरिस्तरणोपवासाः सद्यो वा सद्यस्कालायाः सर्वं क्रियते' इति ।

भाष्यार्थसंग्रहेऽपि—

अन्वाहितिश्चास्तरणोपवासाः
पूर्वेद्युरेते खलु पौर्णमास्याम् ।
आवर्तनात्प्राग्यदि पर्वसन्धि-
स्तदैव यागः क्रियते समस्तः ॥ इति ।

मण्डनः—आधानानन्तरा पूर्णमासी चेन्मलमासगा ।
तस्यामारंभणीयादीन्न कुर्वीत कदाचन ॥ इति ।

साऽत्र मलमासोत्तरं शुद्धकाले कार्या । तत्र कालातिक्रमनिमित्ता विभ्रष्टेष्टिरप्यादौ कार्या तत आरंभ इति केचित् । तन्न । पुरुषापराधकृतविहितकालातिक्रमरूपविभ्रष्टेष्टिनिमित्ताभावात् । एवं प्रकृतीष्टेः कालो निर्णीतः ।

विकृतिनिर्णयः ।

विकृतिकालोऽपि श्रुतौ 'यदीष्ट्या यदि पशुना यदि सोमेन यजेत सोऽमावास्यायां पौर्णमास्यां वा' इति । पौर्णमासीकालीनोपांशुयाजाग्नीषोमीयादिविकाराणां पौर्णमास्यामेवाऽमावास्याकालीनसान्नायादिविकाराणां चामावास्यायामेवेति व्यवस्थाप्राप्तावव्यवस्थार्थमिदं वचनम् ; पौर्णमास्याममावास्यायामिति विधेयकालगतैकत्वस्य विवक्षितत्वेन एकस्यां पौर्णमास्यामेकस्याममावास्यायां साङ्गप्रयोगोपादानात्सद्यस्कालीनत्वार्थं चेति निरणायि तन्त्ररत्ने । न चेष्टिपशुसोमानामनेकेषामुद्देश्यत्वात्तन्निमित्तामावास्यापौर्णमास्योर्द्वयोर्विधेयत्वात्तन्निमित्तश्च वाक्यभेदः स्यादिति वाच्यम् । इष्टिपशुसोमेष्वनुगतस्य यागत्वस्यैकस्योद्देश्यतावच्छेदकस्यामावास्यापौर्णमास्यनुगतस्य च पर्वत्वस्य विधेयतावच्छेदकस्यैकस्य सद्भावात्तस्य परिहर्तुं शक्यत्वात् ।

प्रकृतिविकृत्योरेककालसन्निपाते निर्णयमाह कात्यायनः—

> आवर्तनात्प्राग्यदि पर्वसन्धिः
> कृत्वा तु तस्मिन्प्रकृतिं विकृत्याः ॥
> तदैव यागः, परतो यदि स्यात्
> तस्मिन्विकृत्याः प्रकृतेः परेद्युः ॥ इति ।

तत्र इष्ट्येत्यादिश्रुत्या साङ्गाया विकृतेः पर्वणि विधानादावर्तनपर्वसन्धावपि पर्वणोऽधिकरणत्वश्रुतेः, 'कर्मणो यस्य यः कालस्तत्कालव्यापिनी तिथिः' इति स्मृतेश्च प्रकृतिविकृतिपर्याप्तपर्वसत्वेन तद्दिन एवोभयोः कर्तव्यत्वे प्राप्ते क्रमः पूर्वार्द्धे विधीयते । प्रकृतेः पूर्वत्वादपूर्वमन्ते स्यादिति वचनमेतत्परमेव । प्रयोगद्वयपर्याप्तपर्वासत्वेप्येतद्वचःप्रवृत्त्यङ्गीकारे तु श्रुतपर्वाधिकरणत्वबाधः । न च कृत्वा तु तस्मिन्प्रकृतिं विकृत्या इति प्रकृतिप्रयोगसमाप्त्युत्तरमेव विकृतेः कर्तव्यत्वावगमेन प्रतिपद-

---

१ इतः प्रभृति दिगन्तो ग्रन्थः लिखितपुस्तके नास्ति ।

धिकरणकप्रकृत्यन्त्यपदार्थोत्तरमेव विकृतिर्न ततः प्रागिति वाच्यम् । श्रुत-पर्वाधिकरणकत्वबाधापत्तेः । किञ्चान्त्यपदार्थव्यतिरिक्ताया एव प्रकृतेः पर्वाधिकरणत्वेन विकृत्येककालत्वात्तादृश्या एव काङ्क्षितः क्रमविधिः । "सन्धिमभितो यजेत" इतिवचनात्प्रकृतिसमाप्तेः प्रतिपदि कर्तव्यत्वेन तन्मध्ये विकृतिसंभवेऽपि न किञ्चिद्बाधकम् । 'न कर्मणि कर्मारम्भः' इत्यत्र तु न श्रुतिर्मूलं किं तु प्रयोगप्राशुभावभङ्गप्रसङ्गः । स चात्र प्रतिपत्प्रतीक्षया विकृत्यननुष्ठानेऽप्यावश्यकः । 'अन्यस्य तन्त्रे वितते' इत्यादि राणकोदाहृतं लिङ्गदर्शनमप्येवं व्याख्येयम् । अन्यथा दर्शस्य पौर्णमासस्य वा प्रयोगस्य मध्येऽग्निहोत्रानुष्ठानं न स्यात्, न स्याच्चान्ततः पर्वद्वयसाध्यतन्महाप्रयोगमध्ये काम्यादीनामन्येषामपि कर्मणामतस्तादृशपर्वसत्त्व एव क्रमविधिः । तदभावे आवर्तनप्राक्सन्धावपि पूर्वदिन एव विकृतिः । सन्धिदिने तु प्रकृतिमात्रं, तन्त्ररत्नग्रन्थोऽप्येतत्पर एव । उत्तरार्द्धं तु न कोऽपि विरोध इति दिक् ।

पशौ कालनिर्णयः ।

पशौ कालनिर्णयमाह गोविन्दार्णवे कात्यायनः—

> अर्द्धादह्नो भवति नियतः पर्वसन्धिः परस्ता-
> त्कृत्वा तस्मिन्नहनि तु पशुं सद्य एव त्र्यहं वा ।
> आरभ्याथ प्रकृतिरथ चेत्पर्वसन्धिः पुरस्ता-
> त्कृत्वा तस्मिन्प्रकृतिमथ तु स्यात्पशुः सद्य एव ॥

आग्रयणकालः ।

आग्रयणकालानाहापस्तम्बः 'वर्षासु श्यामाकैर्यजेत शरदि व्रीहिभिर्वसन्ते यवैः' इति । वार्तिककारोऽपि, 'यजेत्पूर्वं पूर्णमासादूर्ध्वं दर्शान्नवेज्यया' इति । नवेज्या, आग्रयणेष्टिः । दीपिकायाम् 'दर्शेष्ट्याः परमुक्तमाग्रयणकं प्राक् पौर्णमास्याश्च तत्' इति । संपूर्णे दर्शे विशेषमाह लौगाक्षिः—

> पक्षान्तं कर्म निर्वर्त्य वैश्वदेवं च साग्निकः ।
> पिण्डयज्ञं ततः कुर्यात्ततोऽन्वाहार्यकं बुधः ॥ इति ।

पक्षान्तमन्वाधानम् । अन्वाहार्यं दर्शश्राद्धमिति दिक् । इतीष्टिकालः ।

पिण्डपितृयज्ञः ।

अथ पिण्डपितृयज्ञः । तत्र श्रुतिः । 'अमावास्यायामपराह्णे पिण्डपितृयज्ञेन चरन्ति' इति । अत्र "यः परमो विप्रकर्षः सूर्याचन्द्रमसोः सा पौर्णमासी यः परमः सन्निकर्षः साऽमावास्या" इति गोभिलोक्तेः, अमावास्यापदं यद्यपि सूर्याचन्द्रमसोः परमसन्निकर्षवत्त्वन्त्यक्षणे शक्तं तथापि तत्र कर्मानुष्ठानाशक्तेस्तद्वदहोरात्रं लक्ष्यति । अत एव "यदहश्चन्द्रमसं न पश्यन्ति तदहः पिण्डपितृयज्ञेन चरन्ति" इति सूत्रम्, "यदैवैष न पुरस्ताद्ददृशे न पश्चादथ पितृभ्यो निर्वपति" इति च श्रुतिः सङ्गच्छते । अतोऽमावास्यातिथेरपराह्णे व्याप्त्यभावेऽप्यन्त्यक्षणावच्छिन्नाहोरात्र एव पितृयज्ञः पूर्वदिनापराह्णव्याप्तेस्त्वनादर इत्याश्वलायनापस्तम्बसूत्रवृत्तिभाष्यकाराः । यौक्तिकं तु अमावास्याशब्दस्य प्रयोगस्तावत्तिथिविशेषे सर्वजनीनो निर्विवादः । तत्र च एकदेशवर्तिनोऽपि परमसन्निकर्षस्य संभवत्येव प्रवृत्तिनिमित्तत्वं चक्रिपद इव चक्रस्य वैश्वदेवपद इव च विश्वेषां देवानाम् । यद्यपि तिथिविशेषे लक्षणा तथापि निरूढत्वात्सैव युक्ता नाहोरात्रे आधुनिकी । चन्द्रादर्शनं तु अमायुक्ताऽपराह्णवत्यहोरात्रेऽप्यविशिष्टम् । ईदृगहोरात्रपूर्वभाव्युषःकालीनं तु चन्द्रदर्शनं पूर्वाऽहोरात्रवर्तित्वान्न विरुद्धम् । अथ पुरस्तात्पदसार्थक्याय तदेव विरुद्धं तदा पश्चात्पदसार्थक्याय सन्ध्युत्तराहोरात्रगतमपि तत्तथा स्यात् । अतोऽपराह्णयुक्तैवामावास्या ग्राह्या न तु सन्धेराग्रह इति । अपराह्णस्त्वत्र 'पञ्चधा विभक्तदिनोपान्त्यो भागः' इति वृत्तिकारोक्त एव । दिनद्वयेऽपराह्णस्पर्शाभावे तु पूर्वदिन एव तत्र स्मृत्यापादितचन्द्रक्षयस्योत्तरदिने च तादृश्याश्चन्द्रवृद्धेः सत्त्वात् । यथाह हारीतः—

> चतुर्दश्यष्टमे भागे क्षीणो भवति चन्द्रमाः ।
> अमावास्याष्टमे भागे पुनः किल भवेदणुः ॥ इति ।

'पूर्वाह्णो वै देवानां मध्यन्दिनो मनुष्याणामपराह्णः पितृणाम्' इत्यस्य पितृयज्ञप्रकरणे पाठात् त्रेधाविभक्तदिनान्त्यभागस्तु युक्तः । हारीतवचस्तु उपवासपरम् । तं प्रकृत्य 'यदहरेवैष न पुरस्तान्न पश्चाद्दृश्येत तदहरुपवसेत्' इति श्रुतेः । यायजूकास्तु वृत्तिभाष्याद्युक्तं सन्धिमदहोरात्रं प्रायः पञ्चधा विभागं च अनुरुध्याचरन्ति । तत्र कातीयानां तावत्पितृयज्ञो दर्शयागाङ्गं तत्पूर्वदिन एव तत्कार्यम् । न तु नियमेना-

मायुक्त एवापराह्णे । 'पूर्वेद्युः पितृभ्यो यज्ञं निष्क्रीणीयोत्तरमहर्देवान्यजन्ति' इति श्रुतेः । अमावास्यायामपराह्ण इत्यमावास्यापदस्य कर्मपरत्वाच्च । पितृयज्ञोऽङ्गं न वेति तु वादान्तरमिति । तैत्तिरीयादीनां तु निर्विगानं सन्धिमत्येवाहोरात्रेऽनुष्ठानमिति । आश्वलायनानां तु सर्वाधानिनां तावद्दक्षिणाग्निकपितृयज्ञोत्तरं पृथगेव पार्वणम् 'पक्षान्तं कर्म निर्वर्त्य वैश्वदेवं च साग्निकः । पिण्डयज्ञं ततः कुर्यात्ततोऽन्वाहार्यकं बुधः' इति वाक्यात् । पक्षान्तमन्वाधानम् । अन्वाहार्यकं पार्वणश्राद्धम् । तत्र च निरग्निकवद्विप्रपाणौ होमः । तथा च परिशिष्टम्–'पर्व अमावास्या तत्र भवं पार्वणं तदाहिताग्निः पिण्डपितृयज्ञं कृत्वा करोत्यनाहिताग्निस्तु तदितरेण व्यतिषज्य' इति । आहिताग्निपार्वणे च पिण्डपितृयज्ञकल्पाभावात्तदभ्यनुज्ञया पाणिष्वेवेति ब्राह्मणानां पाणिषु होम इति च । आहिताग्निः सर्वाधानी, अनाहिताग्निस्त्वर्धाधानी केवलस्मार्ताग्निमान्वेति सांप्रदायिकाः । अनयोस्तु यौक्तिककालनिर्णयपक्षे सर्वदा श्राद्धपितृयज्ञयोस्तत्रविशेषरूपो व्यतिषङ्ग एव । कालैक्यात् । अग्नौकरणं च स्मार्ताग्नौ । भाष्यवृत्तिसंप्रदाये तु संपूर्णे पर्वणि व्यतिषङ्ग एव । कालैक्यादेव । खण्डपर्वणि तु पूर्वदिने पितृयज्ञीयचरुश्रपणादिसकलेतिकर्तव्यताकं श्राद्धम् । परदिने तु पितृयज्ञः, कालभेदेन तन्त्रन्यायाप्रवृत्तेः । एतेन पूर्वदिन एव व्यतिषङ्ग इत्यपास्तम् । कालभेदादेव । 'पिण्णयज्ञं ततः कुर्यात्ततोऽन्वाहार्यकं बुधः' इति क्रमानुरोधेन पृथगनुष्ठानमप्यपास्तम् । एकदिनीयेष्वेव ह्ययं क्रमविधिः । आकाङ्क्षितनियमविधिसंभवे भिन्नदिनीयेष्वनाकाङ्क्षितापूर्वविधानायोगात् । एवं च यद्यपि पूर्वदिने वार्षिकादिषु चरुश्रपणादिका सर्वा पितृयज्ञेतिकर्तव्यताऽऽपाततो भवति, तथापि 'यद्यदन्नमुपभुक्तं तत्तत्स्थालीपाकेन सह पिण्डार्थमुद्धृत्य' इति सूत्रव्याख्यार्थस्य–'नात्रापूर्वः स्थालीपाकश्चोद्यते सर्वश्राद्धेषु प्रसङ्गादनिष्टं चैतत् । तेनानुवाद एवायम् । यत्र तेन स्थालीपाको विहितस्तत्र तेन भुक्तशेषेण च पिण्डनिपरणम् । यत्र तु स्थालीपाकविधिर्नास्ति तत्र भुक्तशेषेणैव केवलेन निपरणं भवति । आचार्येणाष्टौ श्राद्धान्युक्तानि—

आन्वष्टक्यं च पूर्वेद्युर्मासि मास्यथ पार्वणम् ।

---

१ अर्धाधानि-केवलस्मार्ताग्निमतोः ।

काम्यमभ्युदयेऽष्टम्यामेकोद्दिष्टमथाष्टमम् ॥

तत्र पूर्वेषु चतुर्षु स्थालीपाकादन्नमुद्धृत्याग्नौकरणम् । अग्निसमीपे स्थालीपाकेन भुक्तशेषेण च पिण्डनिपरणम् । पिण्डपितृयज्ञकल्पस्य तेषु विद्यमानत्वात् । तच्च साधितमेव प्राक् । उत्तरेषु चतुर्षु भोजनार्थादन्नमुद्धृत्य घृताक्तं कृत्वा पाणिहोमः । ब्राह्मणसमीपे भुक्तशेषमात्रेण पिण्डनिपरणम् । तेषु स्थालीपाकविध्यभावात् पिण्डपितृयज्ञकल्पप्राप्त्यभावाच्च । तत्रार्थाल्लेखा तदभ्युक्षणं सकृदाछिन्नावस्तरणं लेखां त्रिरुदकेनेत्यादि पत्नीप्राशनान्तं च भवति । 'अग्निं प्रत्येयात्' इति तु न भवति । अन्यच्चातिप्रणयनादि सर्वं न भवति—'इति वृत्तिग्रन्थस्यालोचने तु लेखाकरणादिकैव भवति न चरुश्रपणादिका ।—युक्तं चेदमुक्तमिति केचित्, चरुश्रपणादिप्राप्तौ मानाभावात् । 'अथाग्नौ जुहोति यथोक्तं पुरस्तात्' इति सूत्रमतिदेशार्थमितिचेन्न 'उद्धृत्य घृताक्तमन्नमभ्यनुज्ञापयत्यग्नौ करिष्ये करवै करवाणीति वा प्रत्यभ्यनुज्ञा क्रियतां कुरुष्व कुर्विति' सूत्रोत्तरमथेत्यादि सूत्रमुक्तमतो यथोक्तमित्याद्युद्धरणोत्तरकालीनानेव मेक्षणावदानादीनतिदिशति न प्राक्कालीनानपि श्रपणादीन् । यत्तु 'यद्यदन्नमुपभुक्तं तत्तत्स्थालीपाकेन सह पिण्डार्थमुद्धृत्य' इति सूत्रं तत्रापि स्थालीपाकस्योद्धरण एव कर्मत्वेनान्नसाहित्यं न पिण्डार्थत्वेऽपि । उद्धरणे तु तस्य प्रतिपाद्यत्वमेव । करणं तूपभुक्तसजातीयमेवान्नम् । अतो न पिण्डदानमपि चरुश्रपणप्रयोजकम्—। वस्तुतस्तु, सर्वश्राद्धेष्वग्निप्रणयनादिपितृयज्ञेतिकर्तव्यता प्राप्नोत्येव; 'आन्वष्टक्यं च पूर्वेद्युः' इत्याद्युक्त्वा 'चतुर्ष्वाद्येषु साग्नीनां वह्नौ होमो विधीयते' इत्याचार्येण पितृयज्ञातिदेशप्रसज्यमानाग्नेः श्राद्धान्तरे परिसङ्ख्यानात् 'पितृब्राह्मणहस्ते स्यादुत्तरेषु चतुर्ष्वपि' इति त्वनुवादकं । विधाने, वाक्यभेदात्, 'अग्न्यभावे तु विप्रस्य पाणावेवोपपादयेत्' इति मानवेन पाणिप्राप्तेश्च । अभावस्त्वपरिग्रहनाशदेशान्तरेष्विव परिसङ्ख्यायामप्यविशिष्टः । अष्टत्वं तु गृह्योक्तत्वोपाधिकम् । एवमुत्तरार्द्धोक्तं चतुष्ट्वमपि । प्राप्तपरिसङ्ख्यात्वेऽपीयं न त्रिदोषा 'अत्रह्येवावपन्ति' इत्यत्रैवशब्देन 'पञ्च पञ्च नखा भक्ष्या' इत्यत्रेव पञ्चपदेनात्रापि चतुःपदेन श्रुत्यैव परिसङ्ख्यानात् । न च परिसङ्ख्यापकानुवादकयोर्वैपरीत्यम्, अग्न्यभावनिमित्तकस्य पाणेः साग्निकर्तृकेष्वान्वष्टक्यादि-

चतुर्थ्वप्राप्तेः साग्नीनामित्यस्यानुवादत्वायोगात् । अग्नेः परिसङ्ख्यायां च तत्साध्यं चरुश्रपणादि दूरनिरस्तमेव ।

इति भगवन्तभास्करे समयमयूखे इष्ट्यादिकालनिर्णयः ।

अथ ग्रहणनिर्णयः ।

वृद्धगार्ग्यः—

पूर्णिमाप्रतिपत्सन्धौ राहुः संपूर्णमण्डलम् ।
ग्रसते चन्द्रमर्कं च दर्शप्रतिपदन्तरे ॥

वृद्धवसिष्ठः—

गवां कोटिप्रदानेन सम्यग्दत्तेन यत्फलम् ।
गङ्गास्नाने तत्फलं स्याद्राहुग्रस्ते निशाकरे ॥
दिवाकरे पुनस्तत्र दशसंख्यमुदाहृतम् ॥ इति ।

भारते— गङ्गास्नानं तु कुर्वीत ग्रहणे चन्द्रसूर्ययोः ।
महानदीषु चान्यासु स्नानं कुर्याद्यथाविधि ॥

दक्षः ‘ उषस्युषसि यत्स्नानं सन्ध्यायामुदिते रवौ । चन्द्रसूर्योपरागे च प्राजापत्येन तत्समम् ’ इति । उपरागो ग्रहणम् । गङ्गाया अलाभेऽन्यासु स्नानादि कुर्यादित्यर्थः । महानद्यो ब्राह्मे—

‘ गोदावरी भीमरथी तुङ्गभद्रा च वेणिका ।
तापी पयोष्णी विन्ध्यस्य दक्षिणे तु प्रकीर्तिताः ॥
भागीरथी नर्मदा च यमुना च सरस्वती ।
विशोका च वितस्ता च विन्ध्यस्योत्तरतः स्मृताः ’ ॥

महानद्यसंभवे शङ्खः—

वापीकूपतडागेषु गिरिप्रस्रवणेषु च ।
नद्यां नदे देवखाते सरसीषूद्धृताम्भसि ॥
उष्णोदकेन वा स्नायाद्ग्रहणे चन्द्रसूर्ययोः ॥

इह पूर्वपूर्वाभावे उत्तरोत्तरोऽनुकल्पः । उक्तं च मार्कण्डेयेन—

शीतमुष्णोदकात्पुण्यमपारक्यं परोदकात् ।
भूमिष्ठमुद्धृतात्पुण्यं ततः प्रस्रवणोदकम् ॥
ततोऽपि सारसं पुण्यं ततः पुण्यं नदीजलम् ।
तीर्थतोयं ततः पुण्यं महानद्यम्बु पावनम् ॥
ततस्ततोऽपि गङ्गाम्बु पुण्यं पुण्यस्ततोऽम्बुधिः ।

व्यासोऽपि—

सर्वं गङ्गासमं तोयं सर्वे व्याससमा द्विजाः ।
सर्वं भूमिसमं दानं ग्रहणे चन्द्रसूर्ययोः ॥

उष्णोदकमातुरविषयम्,

आदित्यकिरणैः पूतं पुनः पूतं च वह्निना ।
अतो व्याध्यातुरः स्नायाद्ग्रहणेषूष्णवारिणा ॥ इति व्याघ्रोक्तेः ।
स्नानाकरणे प्रत्यवाय उक्तो वृद्धवसिष्ठेन
ग्रहणे सङ्क्रमे चैव न स्नायाद्यदि मानवः ।
सप्तजन्मसु कुष्ठी स्याद्दुःखभागी न संशयः ॥

मुक्तिस्नानाकरणेऽपि प्रत्यवायः । तथाच ब्रह्मवैवर्ते—

विमुक्ते यदि न स्नायाच्चन्द्रसूर्यग्रहे तथा ।
तस्य स्यात्तावदाशौचं यावदन्यः परो ग्रहः ॥ इति ।

ग्रहणेषु मासनदीविशेषाणां पुण्यत्वम् ।

मासभेदेन नदीनां पुण्यत्वं देवीपुराणे—

कार्तिके ग्रहणं श्रेष्ठं गङ्गायमुनसङ्गमे ।
मार्गे तु ग्रहणं प्रोक्तं देविकायां महामुने ॥
पौषे तु नर्मदा पुण्या माघे सन्निहिता शुभा ।
फाल्गुने वरणा पुण्या चैत्रे पुण्या सरस्वती ॥
वैशाखे तु महापुण्या चन्द्रभागा सरिद्वरा ।
ज्येष्ठे तु कौशिकी पुण्या आषाढे तापिका नदी ।
श्रावणे सिन्धुनामा तु तथा भाद्रे तु चन्द्रिका ॥
आश्विने सरयूः श्रेष्ठा तथा पुण्या तु नर्मदा ॥ इति ।

ग्रहणविशेषे नदीविशेषः क्षेत्रविशेषश्च ।

तत्रैव— गोदावरी महापुण्या चन्द्रे राहुसमन्विते ।
सूर्ये तु राहुणाग्रस्ते तमोभूते महामुने ॥
नर्मदातोयसंस्पर्शात्कृतकृत्या भवन्ति ते ॥

क्षेत्रविशेषोऽपि—

गङ्गा कनखलं पुण्यं प्रयागः पुष्करं तथा ।
कुरुक्षेत्रं महापुण्यं राहुग्रस्ते दिवाकरे ॥

अत्र श्राद्धमुक्तं महाभारते—

सर्वस्वेनापि कर्तव्यं श्राद्धं वै राहुदर्शने ।
अकुर्वाणस्तु नास्तिक्यात्पङ्के गौरिव सीदति ॥

पङ्कः कर्दम इत्यर्थः । इत्याद्यकरणे दोषः । तच्चामेन कार्यम् ।

आपद्यनग्नौ तीर्थे च चन्द्रसूर्यग्रहे तथा ।
आमश्राद्धं ततः कुर्याच्छूद्रः कुर्यात्सदैव हि ॥

इति शातातपोक्तेः । अत्र रात्रावपि स्नानाद्याह देवलः—

यथा स्नानं च दानं च सूर्यस्य ग्रहणे दिवा ।
सोमस्यापि तथा रात्रौ स्नानं दानं विधीयते ॥

अत्राऽशौचिनोऽपि स्नानाद्याह वृद्धवसिष्ठः—

सूतके मृतके चैव न दोषो राहुदर्शने ।
तावदेव भवेच्छुद्धिर्यावन्मुक्तिर्न दृश्यते ॥

रजस्वलाविषये विशेषः क्वचित्स्मर्यते—

स्नाने नैमित्तिके प्राप्ते नारी यदि रजस्वला ।
पात्रान्तरिततोयेन स्नानं कृत्वा व्रतं चरेत् ॥

व्रतं रजस्वलाव्रतम् । इदं च नाद्रियन्ते शिष्टाः ।

वारविशेषे फलविशेषः ।

वारविशेषे फलातिशयमाह व्यासः—

रविग्रहः सूर्यवारे सोमे सोमग्रहस्तथा ।
चूडामणिरिति ख्यातस्तत्रानन्तफलं भवेत् ॥
वारेष्वन्येषु यत्पुण्यं ग्रहणे चन्द्रसूर्ययोः ।
तत्पुण्यं कोटिगुणितं ग्रासे चूडामणौ स्मृतम् ॥ इति ।

षट्त्रिंशन्मते—

सर्वेषामेव वर्णानां सूतकं राहुदर्शने ।
स्नात्वा कर्माणि कुर्वीत शृतमन्नं विवर्जयेत् ॥

पक्वमन्नं त्याज्यं ग्रहणोत्तरमपि न भुञ्जीतेत्यर्थः । क्वचित्पयआद्येषु प्रतिप्रसवः—

आरनालं तथा क्षीरं किलाटं घृतसक्तवः ।
स्नेहपक्वं च तैलं च न कदाचित्प्रदुष्यति ॥

तथा— आरनालं पयस्तक्रं दधि तैलाज्यपाचितम् ।
मणिकस्थोदकं चैव न दुष्येद्राहुदर्शने ॥

इयं च सूतकोक्तिः स्नानार्था नान्यकर्मत्यागार्था । तदुक्तं व्याघ्रपादेन—

'स्मार्तकर्मपरित्यागो राहोरन्यत्र सूतके' इति ।

शिवरहस्ये—सूर्येन्दुग्रहणं यावत्तावत्कुर्याज्जपादिकम् ।
न स्वपेन्न च भुञ्जीत स्नात्वा भुञ्जीत मुक्तयोः ॥ इति ।

फलविशेषोऽपि ब्रह्मपुराणे—

उपमर्दे लक्षगुणं ग्रहणे चन्द्रसूर्ययोः ।
मध्ये कोटिगुणं पुण्यं मुक्तिकाले त्वनन्तकम् ॥ इति ।

उपमर्दः स्पर्शः । दानमुक्तं महाभारते—

अयने विषुवे चैव ग्रहणे चन्द्रसूर्ययोः ।
पात्रभूताय विप्राय भूमिं दद्यात्सदक्षिणाम् ॥

यद्यपि पूर्वं 'सर्वे व्याससमा द्विजा' इत्युक्तं तथापि तद्ब्राह्मणस्तुत्यर्थं दानस्यावश्यकत्वार्थं च, न तु पात्रत्यागेन यस्मै कस्मैचिद्दानप्रतिपादनार्थम् । पात्रलक्षणं दानमयूखे वक्ष्यते ।

अनुकल्पमाह बौधायनः—

श्रोत्रियोऽश्रोत्रियो वाऽपि पात्रं वाऽपात्रमेव वा ।
विप्रब्रुवोऽपि वा विप्रो ग्रहणे दानमर्हति ॥ इति ।

भारते— भूमिर्गावः सुवर्णं वा धान्यं वा यद्यदीप्सितम् ।
तत्सर्वं ग्रहणे देयमात्मनः श्रेय इच्छता ॥

पुण्यकालमाह जाबालिः—

सङ्क्रान्तौ पुण्यकालस्तु षोडशोभयतः कलाः ।
चन्द्रसूर्योपरागे च यावद्दर्शनगोचरः ॥ इति ।

अत्र केचित् । 'राहुदर्शने स्नायाद्दानं च कुर्यात् इत्यादिभिर्वाक्यैर्दर्शने स्नानादि विधीयते । दर्शनं चाक्षुषम् । तच्च स्वकीयमेव निमित्तम् । परकीयदर्शनस्य परं प्रति निमित्तत्वाभावात् । एवं चायमर्थः संपद्यते । स्वयं ग्रहणे दृष्टे स्नानादि कर्तव्यं न मेघावृते' इत्याहुः । तदयुक्तम्, एवमन्धस्य स्नानादि न स्यात् । तथा—

नेक्षेतोद्यन्तमादित्यं नास्तं यान्तं कदाचन ।
नोपरक्तं न वारिस्थं न मध्यं नभसो गतम् ॥

इति वाक्येन स्नातकानां ग्रहणदर्शने प्रतिषिद्धे तेषां स्नानादि न स्यात्। यदि परं तत्रेष्टापत्तिः क्रियते तथा सति-

सूर्यग्रहो यदा रात्रौ दिवा चन्द्रग्रहस्तथा।
तत्र स्नानं न कुर्वीत दद्याद्दानं न च क्वचित्॥

इति निषेधोऽनुपपन्नः स्यात्। रात्रौ सूर्यग्रहस्य दिवा चन्द्रग्रहणस्य च दर्शनाभावेन स्नानादेरप्राप्तत्वात्। किंच यदि दृष्टं ग्रहणं स्नानादेर्निमित्तं तथा सत्युद्देश्यस्य ग्रहणस्य विशेषणं दर्शनं न विवक्षितं स्यात्। 'तस्योभयं हविरार्तिमार्छेत्' इत्यत्रेव हविष उभयत्वम्। अतः केवलं ग्रहणमेव निमित्तमिति वक्तव्यम्, तच्च ज्ञातमेव, सर्वनिमित्तानां ज्ञातानामेव नैमित्तिकप्रयोजकत्वमिति विज्ञानेश्वरादिभिस्तत्र तत्र निरूपितत्वात्। तच्च ज्ञानं शास्त्रीयमेव न लौकिकम्। न चैवं द्वीपान्तरे जातं द्वीपान्तरेऽपि प्रयोजकं स्यादिति वाच्यम्। द्वीपान्तरे जातस्य द्वीपान्तरे रात्रिदिनजातत्वेनाप्रयोजकत्वात्। क्वचिद्देशे दृष्टं देशान्तरे च मेघच्छन्नं तु भवत्येव प्रयोजकम्। न च 'राहुदर्शने' इत्यनेन चाक्षुषमेव दर्शनं ग्राह्यमिति वाच्यम्। 'अष्टमी रोहिणीयुक्ता निश्यर्धे दृश्यते यदि' इत्यादिषु शास्त्रदृष्टेऽपि दृशिप्रयोगदर्शनात्। तेन प्रत्यक्षदर्शनमेव स्नाननिमित्तमिति केषांचित्प्रलापः शास्त्रन्यायविरुद्ध उपेक्षणीयः। ग्रस्तास्तविषये मनुः—

चन्द्रसूर्यग्रहे नाऽद्यादद्यात्स्नात्वा विमुक्तयोः।
अमुक्तयोरस्तगयोर्दृष्ट्वा स्नानं परेऽहनि॥

भृगुरपि—

ग्रस्तावेवास्तमानं तु रवीन्दू प्राप्नुतो यदि।
तदा परेद्युरुदये स्नात्वाऽभ्यवहरेन्नरः॥ इति।

वेधमाह व्यासः—

नाद्यात्सूर्यग्रहात्पूर्वमह्नि सायं शशिग्रहात्।
ग्रहकाले च नाश्नीयात्स्नात्वाऽश्नीयाद्विमुक्तयोः॥
मुक्ते शशिनि भुञ्जीत यदि न स्यान्महानिशा।

विशेषमाह वृद्धवसिष्ठः—

ग्रहणं तु भवेदिन्दोः प्रथमादधि यामतः।
भुञ्जीतावर्तनात्पूर्वं पश्चिमे प्रथमादधः॥

रवेस्त्वावर्तनादूर्ध्वमर्वागेव निशीथतः।
चतुर्थे प्रहरे चेत्स्याच्चतुर्थप्रहरादधः॥

रात्रौ प्रथमयामोत्तरं ग्रहणं चेन्मध्याह्नात्पूर्वं भुञ्जीत। रात्र्यन्तयामे चेद्रात्रिप्रथमयामात्पूर्वं भुञ्जीत। दिनतृतीयप्रहरे चेद्रविग्रहस्तदा पूर्वदिनस्यार्द्धरात्रात्प्राग्भुञ्जीत। अह्नश्चतुर्थप्रहरे चेद्रविग्रहणं तदा रात्रेश्चतुर्थप्रहरादधो भुञ्जीत। इदं च न रात्रिभोजनपरं किन्तु सूर्यग्रहे पूर्वं यामचतुष्टयं त्याज्यम्, चन्द्रग्रहे यामत्रयमित्येवंपरमितिमाधवः। तथा च वृद्धगौतमः—

सूर्यग्रहे तु नाश्नीयात्पूर्वं यामचतुष्टयम्।
चन्द्रग्रहे तु यामांस्त्रीन्बालवृद्धातुरैर्विना॥

बालादिविषये मात्स्ये—

अपराह्णे न मध्याह्ने मध्याह्ने न तु सङ्गवे।
भुञ्जीत सङ्गवे चेत्स्यान्न पूर्वं भुजिमाचरेत्॥

शशिग्रहे यामत्रयापवादमाह वृद्धवसिष्ठः—

ग्रस्तोदये विधोः पूर्वं नाहर्भोजनमाचरेत्॥ इति।

वेधान्तरं हेमाद्रौ—

त्रयोदश्यादितो वर्ज्यं दिनानां नवकं ध्रुवम्।
माङ्गल्येषु च सर्वेषु ग्रहणे चन्द्रसूर्ययोः॥ इति।

अन्यत्रापि,

द्वादश्यादिस्तृतीयान्तो वेध इन्दुग्रहे स्मृतः।
एकादश्यादिकः सौरेश्चतुर्थ्यन्तः प्रकीर्तितः॥

इदं संपूर्णग्रहे। खण्डग्रहे तूभयोर्दिनत्रयम् 'त्र्यहं खण्डग्रहे तयोः' इति वचनात्। अत्र काम्योपवासे दक्षः—

अयने विषुवे चैव ग्रहणे चन्द्रसूर्ययोः।
अहोरात्रोषितः स्नात्वा सर्वपापैः प्रमुच्यते॥ इति।

पुत्रवद्गृहस्थस्य तु न भवति।

सङ्क्रान्त्यामुपवासं च कृष्णैकादशिवासरे।
चन्द्रसूर्यग्रहे चैव न कुर्यात्पुत्रवान्गृही॥ इति।

अत्र हेमाद्रिः। 'यदा शशिनो ग्रस्तोदयः सूर्यस्य ग्रस्तास्तो वा तदा पुत्रवद्गृहिणा उपवासो न कर्तव्यः।'

सायाह्ने ग्रहणं चेत्स्यादपराह्णे न भोजनम् ।
अपराह्णे न मध्याह्ने मध्याह्ने न तु सङ्गवे ॥

इति मार्कण्डेयवाक्यस्यैतत्परत्वादित्याह । माधवस्तु, तस्याप्यभोजनमित्याह । युक्तं चैतत् । 'तत्प्रयुक्तोपवासस्य निषेधोऽयमुदाहृतः' इति वाक्यशेषेण विहितकाम्योपवासस्यैव निषेधो नानुषङ्गप्राप्तस्य 'नानुषङ्गतो ग्राह्यो यतो नित्यमुपोषणम्' इति वाक्यात् । ननु तत्प्रयुक्तत्वं न तदुद्देशेन विहितत्वम्, किंतु तद्धेतुकत्वमात्रम् । तद्धेतुकत्वं चानुषङ्गप्राप्तेऽप्युपवासेऽस्तीति चेदुच्यते । इह व्रतरूपोपवासस्यैव प्रतिषेधो नानुषङ्गप्राप्तस्य । तत्रैवोपवासशब्दस्य शक्तत्वात् । अन्यथा 'उपवासव्रतं चरेत्' इत्यादिषु व्रतशब्दसाहचर्यात्सङ्कल्पसिद्धावपि केवलोपवासविधिषु सङ्कल्पासिद्धेः । भोजनद्वयनिवृत्तावुपवासशब्दस्तु लाक्षणिकः । गौणमुख्ययोर्मुख्यस्यैव ग्रहणौचित्यात् ।

ग्रहणभोजने प्रायश्चित्तम् ।

ग्रहणभोजने प्रायश्चित्तमुक्तं कात्यायनेन—

चन्द्रसूर्यग्रहे भुक्त्वा प्राजापत्येन शुद्ध्यति ।
तस्मिन्नेव दिने भुक्त्वा त्रिरात्रेणैव शुद्ध्यति ॥ इति ।

तस्मिन्दिने पूर्वोक्तिप्रतिपादितयामात्मकवेधमध्य इति ।

इति ग्रहणनिर्णयः ।

अथ सङ्क्रान्तिनिर्णयः ।

नागरखण्डे—

रवेः सङ्क्रमणं राशौ सङ्क्रान्तिरिति कथ्यते ।

वसिष्ठः—अयने द्वे विषुवे द्वे च चतस्रः षडशीतयः ।
चतस्रो विष्णुपद्यश्च सङ्क्रान्त्यो द्वादश स्मृताः ॥
झषकर्कटसङ्क्रान्ती द्वे तूदग्दक्षिणायने ।
विषुवती तुलामेषौ तयोर्मध्ये ततोऽपराः ॥
कन्यायां मिथुने मीने धनुष्यपि रवेर्गतिः ।
षडशीतिमुखाः प्रोक्ताः षडशीतिगुणाः फलैः ॥
वृषवृश्चिककुम्भेषु सिंहे चैव यदा रविः ।
एतद्विष्णुपदं नाम विषुवादधिकं फलम् ॥ इति ।

वारर्क्षविशेषतः पुनरासां सप्तधात्वमुक्तं देवीपुराणे—

मन्दा मन्दाकिनी ध्वाङ्क्षी घोरा चैव महोदरी ।
राक्षसी मिश्रिता प्रोक्ता सङ्क्रान्तिः सप्तधा नृप ॥
सूर्ये घोरा विधौ ध्वाङ्क्षी भौमवारे महोदरी ।
बुधे मन्दाकिनी नाम मन्दा सुरपुरोहिते ॥
मिश्रिता शुक्रवारे स्याद्राक्षसी तु शनैश्चरे ।

तथा—मन्दा ध्रुवेषु विज्ञेया मृदौ मन्दाकिनी तथा ।
क्षिप्रे ध्वाङ्क्षी विजानीयादुग्रे घोरा प्रकीर्तिता ॥
चरैर्महोदरी ज्ञेया क्रूरैर्ऋक्षैश्च राक्षसी ।
मिश्रिता चैव निर्दिष्टा मिश्रितर्क्षैश्च सङ्क्रमे ॥ इति ।

ध्रुवाणि, रोहिण्युत्तरात्रयम् । मृदूनि, रेवतीचित्रानुराधामृगाः । क्षिप्राणि, अश्विनीहस्तपुष्याः । उग्राणि, पूर्वात्रयं भरणी मघा च । चराणि, धनिष्ठापुनर्वसुश्रवणस्वातीशततारकाः । क्रूराणि, ज्येष्ठार्द्राश्लेषामूलानि । मिश्रिते, विशाखा कृत्तिका । आसु च पुण्यतमः कालस्तत्रैवोक्तः—

त्रि चतुः पञ्च सप्ताष्ट नव द्वादश एव च ।
क्रमेण घटिका ह्येतास्तत्पुण्यं पारमार्थिकम् ॥ इति । (?)

वसिष्ठः—सङ्क्रान्तिसमयः सूक्ष्मो दुर्ज्ञेयः पिशितेक्षणैः ।
तद्योगाच्चाप्यधश्चोर्ध्वं त्रिंशन्नाड्यः पवित्रिताः ॥ इति ।

'अधस्त्रिंशदूर्ध्वं च त्रिंशत्' इति केचित् । वस्तुतस्तु 'अधः पञ्चदशोर्ध्वं च पञ्चदश' इति । एवं त्रिंशदिति ज्ञेयम् ।

तथा च देवीपुराणे—

अतीतानागतो भोगो नाड्यः पञ्चदश स्मृताः ॥ इति ।

सङ्क्रान्तौ विहितप्रतिषिद्धस्नानदानाध्ययनादेः पालनं भोगः ।

जाबालः—

सङ्क्रान्तौ पुण्यकालस्तु षोडशोभयतः कलाः ॥ इति ।

कलाः नाड्यः । एषां वसिष्ठादिवाक्यानामविशेषात्सर्वसङ्क्रान्तिपरत्वम् । अत्र चाल्पकालोक्तिः पुण्यातिशयोक्तार्था न पुनर्नियमार्था । अत एव शातातपः—

या याः सन्निहिता नाड्यस्तास्ताः पुण्यतमाः स्मृताः ॥ इति ।

वसिष्ठः—मध्ये तु विषुवे पुण्यं प्राग्विष्णौ दक्षिणायने ।
षडशीति मुखेऽतीते अतीते चोत्तरायणे ॥ इति ।

'अत्र चशब्दादुत्तरायणेऽनागतेऽपि पुण्यम्' इति हेमाद्रिः। तत्र प्रमाणं विमृश्यम्।

ब्रह्मवैवर्ते—

त्रिंशत्कर्कटके नाड्यो मकरे तु दशाधिकाः॥ इति।

स्कान्दे—कुलीरे विंशदेवाद्या मकरे त्रिंशदुत्तमाः॥ इति।

कुलीरः कर्कटः। वसिष्ठः—

त्रिंशत्कर्कटके नाड्यो मकरे विंशतिः स्मृताः॥ इति।

गौतमः—अर्वाक् षोडश नाड्यस्तु परतः षोडशैव तु।

ता एव दक्षिणे पूर्वा अतीते चोत्तरायणे॥ इति।

अत्रापि न्यूनाधिकघटिकानां पूर्ववैव व्यवस्था विज्ञेया।

वसिष्ठः—

वर्तमाने तुलामेषे नाड्यस्तूभयतो दश॥ इति।

बौधायनोऽपि—

पुण्यं विषुवति प्रोक्तं दश पूर्वा दशापराः॥ इति।

वसिष्ठः—षडशीत्यां व्यतीतायां षष्टिरुक्ता तु नाडिकाः॥ इति।

'षडशीत्याख्यानां चतसृणां सङ्क्रान्तीनामेकैकस्याः पञ्चदश पञ्चदशेत्येवं षष्टिनाड्यः पुण्याः' इति हेमाद्रिः।

तथा च स्कान्दे—

षडशीतिमुखेऽतीते नाड्यः पञ्चदश स्मृताः॥ इति।

केचित्तु 'अष्टिरुक्तास्तु नाडिकाः' इति पाठं कल्पयन्ति। अष्टिः षोडश तच्छन्दसः षोडशाक्षरपादत्वादिति। तत्रैव—

युगान्तेषु तु षड्विप्र षडशीतिमुखे तथा॥ इति।

तथा षडित्यर्थः। वसिष्ठः—

पुण्यकालो विष्णुपद्याः प्राक् पश्चादपि षोडश॥ इति।

ब्रह्मवैवर्ते—

विषुवे षण्मुहूर्तं स्यात्षडशीतिमुखे त्रयम्।

तथा विष्णुपदे त्रीणि पुण्यानि कवयो विदुः॥ इति।

एवमुक्तन्यूनाधिकपक्षाः पुण्यपुण्यतरपुण्यतमत्वेन व्यवस्थाप्याः।

या याः सन्निहिता नाड्यस्तास्ताः पुण्यतमाः स्मृताः॥

इति पूर्वोदाहृतशातातपवाक्यात्। पूर्वभोगिन्यां सूर्योदयोत्तरमुत्तर-

भोगिन्यां तदस्तात्पूर्वमव्यवधानेन सङ्क्रान्तौ जायमानायां दिवावच्छेदेन स्नानादिपर्याप्तकालो न लभ्यते तदा पूर्वभागावच्छिन्नस्योत्तरभागावच्छिन्नस्य वा संपूर्णदिवसस्यैव पुण्यत्वं न तु प्रशस्तकालवत्योः पूर्वोत्तररात्र्योः।

अह्नि सङ्क्रमणे कृत्स्नमहः पुण्यं प्रकीर्तितम्।
रात्रौ सङ्क्रमणे भानोर्दिनार्द्धं स्नानदानयोः॥

इति वृद्धवसिष्ठवाक्यात्। अत्र पूर्वार्द्धे कृत्स्नस्याह्नः पुण्यत्वविधानादेव रात्रौ स्नानादि प्रतिषिध्यते। अन्यथा सर्वसङ्क्रान्तिसाधारणपूर्वोत्तरपुण्यत्वविधानादेव तत्सिद्धेरेतस्य वैयर्थ्यापत्तेः। पूर्वभागप्रशस्तस्योत्तरस्य च तस्य विषयो मध्याह्नादिसङ्क्रम एव। तत्राहन्येव प्रशस्तयोस्तयोः संभवादिति। गोभिलः—

रात्रौ सङ्क्रमणे भानोर्दिवा कुर्यात्तु तत्क्रियाम्।
पूर्वस्मात्परतो वापि प्रत्यासत्तेश्च तत्फलम्॥
अर्द्धरात्रादधस्तस्मिन्मध्याह्नस्योपरि क्रिया।
ऊर्ध्वं सङ्क्रमणे चोर्ध्वमुदयात्प्रहरद्वयम्॥
पूर्णे चेदर्द्धरात्रे तु यदा सङ्क्रमते रविः।
प्राहुर्दिनद्वयं पुण्यं मुक्त्वा मकरकर्कटौ॥ इति।

मध्याह्न आवर्तनम्। तच्चोदयश्च पूर्वोत्तरदिनयोः सन्निधानलाभात्। दिनद्वयमप्यर्द्धमेव ज्ञेयम्।

रात्रौ सङ्क्रमणे भानोर्दिनार्द्धं स्नानदानयोः।

इति वसिष्ठेन सामान्यतो रात्रिसङ्क्रमे दिनार्द्धपुण्यत्वस्यैवोक्तत्वात्। गार्ग्यः—

काले न्यूनेऽर्द्धरात्रे तु यदा सङ्क्रमणं भवेत्।
तदहः पुण्यमिच्छन्ति गार्ग्यगालवगौतमाः॥

देवीपुराणे—

संपूर्णे ह्यर्द्धरात्रे तु उदयेऽस्तमयेऽपि च।
मानार्द्धं भास्करं पुण्यमपूर्णे शर्वरीदले॥

संपूर्णे अर्द्धरात्रे निशीथ इत्यर्थः। अपूर्णे शर्वरीदले सायंप्रातःसन्ध्योत्तरपूर्वभागयोरित्यर्थः। योगेन लक्षणया वा भास्करो दिवसः। निशीथे सायंप्रातःसन्ध्ययोस्तदुत्तरपूर्वभागयोश्च सङ्क्रमणे दिनार्द्धं पुण्यमित्यर्थः। कस्य दिनस्यार्द्धमित्यपेक्षायामुक्तं तत्रैव—

अर्द्धरात्रे त्वसंपूर्णे दिवा पुण्यमनागतम् ।
संपूर्ण उभयोर्ज्ञेयमतिरेके परेऽहनि ॥

अत्राऽसंपूर्णार्द्धरात्रशब्देन सायंसन्ध्या निशीथपूर्वभागश्च गृह्यते । तत्र सङ्क्रमणेऽनागतमतीतमित्यर्थः । तद्दिवामानार्द्धं पुण्यं तत्रोत्तरं संनिधानात् । संपूर्णेऽर्द्धरात्रे निशीथ इत्यर्थः । तत्र सङ्क्रमणे उभयोः पूर्वोत्तरदिनयोरुत्तरपूर्वमानार्द्धे पुण्ये । अतिरेकेऽर्द्धरात्रात्परतः प्रातः-सन्ध्यायां वा सङ्क्रमणे परेऽहनि आद्यं मानार्द्धं पुण्यमित्यर्थः । संपूर्णे उभयोरित्यत्र व्यवस्थाप्युक्ता तत्रैव—

आदौ पुण्यं विजानीयाद्यद्यभिन्ना तिथिर्भवेत् ।
अर्द्धरात्रे व्यतीते तु विज्ञेयमपरेऽहनि ॥ इति ।

पूर्वदिनोत्तरार्द्धवर्तितिथ्याऽर्द्धरात्रिसङ्क्रमणकालीना तिथिर्यद्यभिन्ना स्यात्तदा तदित्यर्थसिद्धम् । व्यतीते त्वर्द्धरात्रे पूर्वदिने तिथ्यभेदेऽपि परेद्युरेवेति । यदा त्वर्द्धरात्रतिथिर्दिनद्वयार्द्धयोरपि स्यात्तदा पूर्वभोगिनीषु पूर्वदिनोत्तरार्द्धमुत्तरभोगिनीषूत्तरदिनाद्यर्द्धमुभयभोगिनीष्वैच्छिको विकल्पः । एवमयनातिरिक्तसर्वरात्रिसङ्क्रमणे दिनार्द्धपुण्यत्वे स्थिते,

विष्णुपद्यां धनुर्मीननृयुक्कन्यासु वै यदा ।
पूर्वोत्तरगतं रात्रौ भानोः सङ्क्रमणं भवेत् ॥
पूर्वाह्णे पञ्चनाड्यश्च पुण्याः प्रोक्ता मनीषिभिः ।
अपराह्णे च पञ्चैव श्रौते स्मार्ते च कर्मणि ॥

इति यद्याम्यं तत्पुण्यातिशयदर्शनार्थम् । केचित्तु—

आसन्नसंक्रमं पुण्यं दिनार्द्धं स्नानदानयोः ।
रात्रौ सङ्क्रमणे भानोर्विषुवत्ययने दिने ॥

इति वैशेषिकयज्ञपार्श्ववचनात् सामान्यविषयं दिनार्द्धवचनं विषुवद्विषयमित्याहुः । विषुवति सङ्क्रमे रात्रौ सति दिनार्द्धमयने तु दिनमिति वाक्यार्थः । वस्तुतस्तु यद्यत्र विषुवति दिनार्द्धपुण्यत्वविधिः स्यात्तदा स्यात्तथा । नत्वेवं किंतु विषुवति सामान्यवाक्यप्राप्तमर्थमनूद्य अयने दिनार्द्धापवादेन संपूर्णदिनस्य पुण्यत्वं विधीयते । यद्वा, आद्यपादत्रयेण सर्वसङ्क्रान्तिषु सामान्यवाक्यप्राप्तमर्थमनूद्यायने (विषुवति च ?) दिनार्द्धापवादत्वेन संपूर्णदिनस्य पुण्यत्वं विधीयते । यद्वा, आद्यपादत्रयेण सर्वसङ्क्रान्तिषु सामान्यवाक्यतो दिनार्द्धपुण्यत्वं विधायान्त्यपादेन विषुवत्यय-

नयोः संपूर्णदिनपुण्यत्वं विधीयत इति। यद्वा, भानोरयने रात्रौ जाते सति दिने दिनमध्ये दिनार्धं पुण्यमित्येवान्वेति नत्वासन्नसङ्क्रममिति।

अत एव भविष्योत्तरे—

मिथुनात्कर्कसङ्क्रान्तिर्यदि स्यादंशुमालिनः।
प्रभाते वा निशीथे वा कुर्यादहनि पूर्वतः॥
कार्मुकं तु परित्यज्य झषं संक्रमते रविः।
प्रदोषे वार्द्धरात्रे वा स्नानं दानं परेऽहनि॥ इति।

बौधायनोऽपि—

अस्तंगते सवितरि मकरं याति भास्करः।
प्रदोषे वार्द्धरात्रे वा स्नानं दानं परेऽहनि॥
अर्द्धरात्रे तदूर्ध्वे वा सङ्क्रान्तौ दक्षिणायने।
पूर्वमेव दिनं ग्राह्यं यावन्नोदयते रविः॥ इति।

अहं तु ब्रुवे, अदिन इति छेदः। अयने रात्रौ जाते सति अदिने रात्रावेव पुण्यमिति तदर्थः। तच्च नागरतैलङ्गादि परं, तेषां तथाचारात्। अत एव माधवः—

कर्कटे मकरे रात्रौ तथाचारादनुष्ठितिः॥ इति।

माधवस्तु 'दिने' इति दिवेति वा पाठमभिप्रेत्य विषुवति रात्रौ जाते दिनार्द्धे पुण्यमयने तु रात्रौ संक्रमणे सति दिवा दिनार्द्धे पुण्यं कर्कटे पूर्वार्द्धे मकरे तूत्तरार्द्धमिति व्याचख्यौ।

ननु बौधायनीये अस्तंगते इत्यनेन प्रदोषार्द्धरात्रयोर्लब्धत्वात्पृथग्ग्रहणमनर्थकमिति चेन्न। अस्तंगतइत्युक्ते दिनान्तरस्य पुण्यतोक्तिः प्रत्यासत्तेरपररात्रिविषयिण्येव स्यात्तद्वारणाय प्रदोषार्द्धरात्रग्रहणस्य सार्थक्यात्।

धनुर्मीनावतिक्रम्य कन्यां च मिथुनं यदा।
पूर्वापरविभागेन रात्रौ सङ्क्रमते रविः॥
दिनान्ते पञ्च नाड्यस्तु तदा पुण्यतमाः स्मृताः।
उदये च तथा पञ्च दैवे पित्र्ये च कर्मणि॥ इति।

'रात्रौ धनुरतिक्रम्य पूर्वभागे सङ्क्रमे उदये पञ्च नाड्यः। तथा रात्रौ मिथुनमतिक्रम्यापरभागे संक्रमे दिनान्ते पञ्च नाड्यः' इति सामान्यतो बौधायनवाक्येन पुण्यप्राप्तौ पुण्यतमत्वबोधकम्। तेन मकरे सूर्यास्तादूर्ध्वं यदा कदाचिज्जाते उत्तरदिनपूर्वार्द्धे पुण्यम्। 'आद्याः

पञ्च घटिकाः पुण्यतमाः । कर्के चोदयात्पूर्वं यदा कदाचिज्जाते पूर्वदिन एवोत्तरार्धं पुण्यम् । आद्याः पञ्च घटिकाः पुण्यतमाः' इति बौधायनवाक्यकृतनिर्णयानुरोधेन स्कान्दं भङ्क्त्वा व्याचख्युस्तातचरणाः । केचित्तु, अत्रातिक्रमणरूपा सङ्क्रमणरूपा चेति द्वे क्रिये तत्र धनुरादीनामतिक्रमणक्रियायां कर्मत्वे एतद्वाक्यस्यायनविषुवपरतया बौधायनभविष्योत्तरवचोविरोधः स्यात् । स्याच्च प्रधानसङ्क्रमणक्रियाकर्माध्याहारः । अतो धनुरादीनां प्रधानसङ्क्रमणक्रियायामेव कर्मत्वम् । अतिक्रमणक्रियायां तु वृश्चिकादीनाम् । तेन तत्पदानामेवाध्याहारः । अतो वृश्चिककुम्भसिंहवृषातिक्रमेण धनुरादिषडशीतिसङ्क्रमणपरमेतद्वाक्यं नायनविषुवपरं तेन न कोऽपि विरोध इत्याहुः । वस्तुतस्तु बौधायनेनायनयोर्विप्रकृष्टदिने पुण्यत्वोक्तावपि स्कान्देन सन्निकृष्टदिनेऽपि पुण्यता बोध्यते तेन उभयदिनेऽपि समुच्चिते पुण्यकाले न कोऽपि विरोधः । तेन स्कान्दस्य स्वारसिक्येव व्याख्या युक्तेति मम प्रतिभाति ।

इति सङ्क्रान्तिनिर्णयः ।

अथ सङ्क्रान्तिकृत्यम् ।

नागरखण्डे—

> रवेः संक्रमणं राशौ सङ्क्रान्तिरिति कथ्यते ।
> स्नानदानतपःश्राद्धहोमादिषु महाफला ॥

आपस्तम्बः—

> अयने विषुवे चैव ग्रहणे चन्द्रसूर्ययोः ।
> अहोरात्रोषितः स्नात्वा सर्वपापैः प्रमुच्यते ॥

एतच्च पुत्रवद्गृहस्थातिरिक्तविषयम् ।

> आदित्येऽहनि सङ्क्रान्तौ ग्रहणे चन्द्रसूर्ययोः ।
> उपवासो न कर्तव्यो गृहिणा पुत्रिणा तथा ॥

इति तस्य तत्र उपवासनिषेधात् । यस्तु रवेर्मस्तास्तादावहोरात्रभोजननिषेधः स पुत्रवन्तमपि गोचरयति । एतद्वचनाप्रवृत्तेः । इदं हि वचनं, 'नियमो व्रतमस्त्री तच्चोपवासादिपुण्यकम्' इति कोशादुपवासस्य व्रतरूपत्वावगमाद्विहित एव व्रतात्मक उपवासे प्रवर्तते न तु निषेधप्रवृत्तिमात्रेणाहोरात्रे भोजनाभावमात्रे, तस्य व्रतरूपत्वाभावादिति द्वैतनिर्णये तातचरणाः ।

शातातपः—रविसङ्क्रमणे प्राप्ते न स्नायाद्यस्तु मानवः ।
सप्तजन्मातिरोगी स्यान्निर्धनश्चैव जायते ॥
सङ्क्रान्तौ यानि दत्तानि हव्यकव्यानि दातृभिः ।
तानि नित्यं ददात्यर्कः पुनर्जन्मनि जन्मनि ॥ इति ।

वसिष्ठः—अयनेषु च यद्दत्तं षडशीतिमुखेषु च ।
चन्द्रसूर्योपरागे च दत्तं भवति चाक्षयम् ॥
अयने कोटिपुण्यं च लक्षं विष्णुपदीफलम् ।
षडशीतिसहस्रं तु षडशीत्यां स्मृतं बुधैः ॥
शतमिन्दुक्षये दानं सहस्रं तु दिनक्षये ।
विषुवे शतसाहस्रं व्यतीपाते त्वनन्तकम् ॥

वृद्धवसिष्ठः—
अयने विषुवे चैव त्रिरात्रोपोषितः पुमान् ।
स्नात्वा ऽर्चयते भानुं सर्वकामफलं लभेत् ॥

ब्रह्मपुराणे—
शुक्लपक्षे तु सप्तम्यां यदा सङ्क्रमते रविः ।
महाजया तदा चैव सप्तमी भास्करप्रिया ॥
स्नानं दानं तपो होमः पितृदेवादिपूजनम् ।
सर्वं कोटिगुणं पुण्यं तपनेन महौजसा ॥
तस्यां यो मानवो भक्त्या घृतेन स्नापयेद्दिनम् ।
सोऽश्वमेधफलं प्राप्य ततः सूर्यपुरं व्रजेत् ॥
पयसा स्नापयेद्यस्तु भास्करं भक्तिमान्नरः ।
विमुक्तः सर्वपापेभ्यो याति सूर्यसलोकताम् ॥
मयैषा कथिता पुण्या सप्तमी त्रिपुरान्तक ।
यामुपोष्य नरो भक्त्या अचलान्मंगलान्लभेत् ॥

सङ्क्रान्तिविशेषेण देयविशेषमाह विश्वामित्रः ।
मेषसङ्क्रमणे भानोर्मेषदानं महाफलम् ।
वृषसङ्क्रमणे दानं गवां प्रोक्तं तथैव च ॥
वस्त्रान्नपानयानानि मिथुने विहितानि तु ।
घृतधेनुप्रदानं तु कर्कटे परिशस्यते ॥
ससुवर्णं पात्रदानं सिंहे च विहितं सदा ।
कन्याप्रवेशे वस्त्राणां सुरभीणां तथैव च ॥

तुलाप्रवेशे धान्यानां बीजानामेव चोत्तमम् ।
कीटप्रवेशे वस्त्राणां वेश्मनां दानमेव च ॥

कीटो वृश्चिकः ।

धनुःप्रवेशे वस्त्राणां यानानां च महाफलम् ।
झषप्रवेशे दारूणां दानमग्नेस्तथैव च ॥
कुम्भप्रवेशे दानं तु गवामम्बुतृणस्य च ।
मीनप्रवेशे ह्यम्लानमाल्यानां दानमुत्तमम् ॥
दानान्यथैतानि मया द्विजेन्द्र
प्रोक्तानि काले तु नरः प्रदत्वा ।
प्राप्नोति कामं मनसस्त्वभीष्टं
तस्मात्प्रशंसन्ति हि कालदानम् ॥

स्कान्दे—धेनुं तिलमयीं राजन् दद्याद्यश्चोत्तरायणे ।
सर्वान्कामानवाप्नोति विन्दते परमं सुखम् ॥

विष्णुधर्मोत्तरे—

उत्तरे त्वयने विप्रा वस्त्रदानं महाफलम् ।
तिलपूर्वमनड्वाहं दत्वा रोगैः प्रमुच्यते ॥

कालिकापुराणे—

कनकं कुलिशं नीलं पद्मरागं च मौक्तिकम् ।
एतानि पञ्च रत्नानि न्यसेद्देवस्य मूर्द्धनि ॥
रत्नानां चाप्यभावे तु कर्षं कर्षार्द्धमेव वा ।
सुवर्णं योजयित्वा तु तस्मिन्नेवोत्तरायणे ॥
विधिवच्च तथाभ्यर्च्य गव्येनाज्येन भूरिणा ।
प्रक्षाल्य मर्दयित्वा तु प्रदद्याद्घृतकम्बलम् ॥
दत्त्वा चोपस्करं भूयो ब्राह्मणान्यतिभिः सह ।
संयोज्य दक्षयित्वा तु कल्पयेदनिवारितम् ॥

कुलिशं हीरकम् । दक्षयित्वा दक्षिणया संपूज्य । कल्पयेद्भोजनमिति शेषः ।

उपोष्य सर्वमेवैतत्कुर्याद्भक्तिपुरःसरः ।
पञ्चगव्यं तिलैर्युक्तं पीत्वा वै पारयेत्स्वयम् ॥
तिलैः स्नानं प्रकुर्वीत तैरेवोद्वर्तनं बुधः ।
देवतानां पितॄणां च उभाभ्यां तर्पणं तथा ॥

पारयेत्पारणं कुर्यात् । तिलस्नानपारणयोर्नात्र क्रमो विवक्षितः। उभाभ्यामिति तादर्थ्ये चतुर्थी ।

होमं तैश्च प्रकुर्वीत सर्वदैवोत्तरायणे ।
तान्वै देवाय विप्रेभ्यो हाटकेन समं ददेत् ॥
यत्नादेव करोत्येवं चित्तं शम्भौ निवेश्य यः ।
उत्तरायणमासाद्य नरः कस्मात्स शोचते ॥

इति सङ्क्रान्तिकृत्यम् ।

अथ पक्षः ।

स च द्विविधः शुक्लः कृष्णश्च । चन्द्रकलावृद्ध्युपलक्षितः पक्षः शुक्लः । चन्द्रकलाक्षयोपलक्षितः पक्षः कृष्णः । स तु दैवे शुक्लः । पित्र्ये कृष्णः । तदाह माधवः—

दैवे मुख्यः शुक्लपक्षः कृष्णः पित्र्ये विशिष्यते । इति ।

श्रुतिः—तौ पूर्वपक्षश्चापरपक्षश्च भवेताम् । पूर्वपक्षं देवा अन्वसृज्यत । अपरपक्षं त्वसुरा इति ।

इति पक्षनिर्णयः ।

अथ मासः ।

स च मस्यते परिमीयते चन्द्रवृद्धिक्षयादिनेति व्युत्पन्नेन मासशब्देन रूढ्याऽभिधेयः । स च त्रेधा । चान्द्रः सावनः सौरश्चेति । तदुक्तं माधवीये ब्रह्मसिद्धान्ते—

चान्द्रः शुक्लादिदर्शान्तः सावनस्त्रिंशता दिनैः ।
एकराशौ रविर्यावत्कालं मासः स भास्करः ॥ इति ।

'नाक्षत्रमपि मासं केचिदिच्छन्ति' इति माधवीये मदनरत्ने च । एतेषां व्यवस्थामाह ज्योतिर्गर्गः—

सौरो मासो विवाहादौ यज्ञादौ सावनः स्मृतः ।
आब्दिके पितृकार्ये च चान्द्रो मासः प्रशस्यते ॥

तत्र ब्राह्मणस्य चान्द्र एव मुख्यः । तदुक्तं ब्रह्मसिद्धान्ते—

अमावास्यापरिच्छिन्नो मासः स्याद्ब्राह्मणस्य तु ।
संक्रान्तिपौर्णमासीभ्यां तथैव नृपवैश्ययोः ॥

पितामहोपि—

दैवे कर्मणि पित्र्ये च मासश्चान्द्रमसः स्मृतः ।

यतिधर्मप्रकरणे तु 'ऋतुसन्धिषु वापयेत्' इति वचनात् पूर्णिमायां वपनं कुर्वन्ति । तस्माद्दर्शान्तत्वपूर्णिमान्तत्वयोः समो विकल्पो दृश्यते । अनुष्ठाने तु तत्र तत्र वचनविशेषाच्छिष्टाचाराच्च व्यवस्था द्रष्टव्येति माधवः । [अत्र[1] कर्मव्यवस्थावचः शूद्रादीन्प्रति सावकाशम् । वर्णव्यवस्थापकमपि विवाहाब्दिकादिभिन्ने कर्मणि । तेन बाध्यबाधकभावे विनिगमनाविरहाद्विवाहे विप्रस्याऽऽब्दिकादिश्राद्धे च क्षत्रियस्य सौरचान्द्रयोर्विकल्प एव । न चैवं द्विविधवाक्यानर्थक्यं तदभावेऽपि विकल्पसिद्धेरिति वाच्यम् । वचनद्वयाभावे चान्द्रस्य मुख्यत्वात्सौरादीनां च गौणत्वात् 'मुख्यामुख्ययोर्मुख्ये कार्यसंप्रत्ययः' इति न्यायेन चान्द्र एव स्यान्न विकल्पः । तर्हि सौरस्यैव विधिस्तद्बाधाय साधकोऽस्तु न चान्द्रस्येति चेन्न, मुख्यस्यापि चान्द्रस्य वचनेन बाधे 'ऐन्द्र्या गार्हपत्यमुपतिष्ठते' इत्यत्र श्रुत्या मुख्येन्द्रबाधेन गौणगार्हपत्यवत्सौरस्यैव नियमः स्यात् । अतः उभयसार्थक्याय विकल्प एव युक्त इति केचित् । तन्न । व्यवस्थासम्भवे विकल्पायोगात् । सा चैवम् । विप्रादीनां साक्षान्मासविशेषे विध्ययोगात्तदधिकारिकं कर्म लक्षणीयम् । कर्मतो व्यवस्थाविधौ तु श्रुत्युपात्त एव विवाहादौ सौरविधिः । तेन विवाहादौ सौर एव शीघ्रं प्रवर्तते, न चान्द्रः । यथा । 'यदाऽऽहवनीये जुहोति' इत्यत्र सामान्यवाचिजुहोतिना लक्षणया पदहोमव्यक्तेरुपस्थितिर्मन्थरा 'पदेजुहोति' इत्यत्र तु द्राक् । अतः पदेनाऽऽहवनीयस्य बाधस्तस्मान्न विकल्पः । कर्मव्यवस्थैव तु बलीयसी विवाहादौ सौर एवेति] दर्शान्तानां पूर्णिमान्तानां च मासविशेषाणां चैत्रादिसंज्ञा नक्षत्रप्रयुक्ताः 'सास्मिन्पौर्णमासीतिसंज्ञायाम्' इत्यनुशासनात् । तेन यस्मिन्मासे पौर्णिमा चित्रायुता स चैत्रः । एवं वैशाखादयोऽपि । [अतः सम्भवत्पौर्णमासीयोगेष्वमान्तेष्वेव चैत्रादिपदं मुख्यम् । पौर्णिमान्तसौरयोस्तु गौणम् । एवं मासपदमपि । 'इन्द्राग्नी यत्र हूयेते मासादिः स प्रकीर्तितः । अग्नीषोमौ स्थितौ मध्ये समाप्तौ पितृसोमकौ' इति शक्तिग्राहकवाक्यात् ।]

इति मासनिर्णयः ।

---

१ कुण्डलितौ पाठौ लिखितपुस्तकयोरेव दृश्यते ।

अथ चैत्रकृत्यम् ।

भविष्योत्तरे—

चैत्रे त्रिरात्रं नक्ताशी नद्यां स्नात्वा ददाति यः ।
राजा पञ्च पयस्विन्यो दरिद्राय कुटुम्बिने ॥
न जायते पुनरसौ जीवलोके कदाचन ।

तत्रैव—चैत्रे मासे तु संप्राप्ते यः कुर्यान्नक्तभोजनम् ।
पिष्टं तु पयसा युक्तं भुञ्जानः शालिसम्भवम् ॥
पूजयेत्पार्वतीं शक्त्या कृत्वा वै चन्दनस्य च ।
गन्धपुष्पोपहारैश्च विंशार्द्धभुजसंमिताम् ॥
देवीं ज्वालामुखीनाम्नीं कुङ्कुमागरुचन्दनैः ।
धूपं सागरुकर्पूरं भगवत्यै निवेदयेत् ॥

वामनपुराणे—

चैत्रे मासि विचित्राणि शयनान्यासनानि च ।
विष्णोः प्रीत्यर्थमेतानि देयानि ब्राह्मणेष्वपि ॥

मात्स्ये—वर्जयित्वा मधौ यस्तु दधिक्षीरघृताक्षतम् ।
दद्याद्वस्त्राणि सूक्ष्माणि रसवस्त्रयुतानि च ।
संपूज्य विप्रमिथुनं गौरी मे प्रीयतामिति ॥

इति चैत्रकृत्यम् ।

अथ वैशाखकृत्यम् ।

विष्णुस्मृतौ—

तुलामकरमेषेषु प्रातःस्नायी भवेन्नरः ।
हविष्यं ब्रह्मचर्यं च महापातकनाशनम् ॥ इति ।

वैशाखस्नानम् ।

पद्मपुराणे—

वैशाखे विधिना स्नानं देवनद्यादिके बहिः ।
हविष्यं ब्रह्मचर्यं च भूशय्या नियमस्थितिः ॥
व्रतं दानं दमो देवि मधुसूदनपूजनम् ।
अपि जन्मसहस्रोत्थं पापं दहति दारुणम् ॥ इति ।

तथा— मधुमासस्य शुक्लायामेकादश्यामुपोषितः ।

पञ्चदश्यां च भो वीर मेषसंक्रमणे तु वा ॥
वैशाखस्नाननियमं ब्राह्मणानामनुज्ञया ।
मधुसूदनमभ्यर्च्य कुर्यात्सङ्कल्पपूर्वकम् ॥

मन्त्रस्तु—वैशाखं सकलं मासं मेषसंक्रमणं रवेः ।
प्रातः सनियमः स्नास्ये प्रीयतां मधुसूदनः ॥
मधुहन्तुः प्रसादेन ब्राह्मणानामनुग्रहात् ।
निर्विघ्नमस्तु मे पुण्यं वैशाखस्नानमन्वहम् ॥
माधवे मेषगे भानौ मुरारे मधुसूदन ।
प्रातःस्नानेन मे नाथ फलदो भव पापहन् ॥

इत्युच्चार्य विधिवत्स्नायात् । एवं स्नानाशक्तौ तत्रैव—

त्रयोदश्यां चतुर्दश्यां वैशाख्यां वा दिनत्रये ।
अपि सम्यग्विधानेन नारी वा पुरुषोऽपि वा ॥
प्रातः स्नातः सनियमः सर्वपापैः प्रमुच्यते ॥ इति ।

तथा— कण्डूय पृष्ठतो गां तु स्नात्वा पिप्पलतर्पणम् ।
कृत्वा गोविन्दमभ्यर्च्य न दुर्गतिमवाप्नुयात् ॥

पिप्पलतर्पणम् पिप्पलमूलसेचनम् । अर्चनेऽपि विशेषस्तत्रैव—

माधवं सकलं मासं लक्ष्मीं योऽर्चयते नरः ।
त्रिसन्ध्यं मधुहन्तारं नास्ति तस्य पुनर्भवः ॥ इति ।

भारते— निर्झरेदेकभक्तेन वैशाखे यो जितेन्द्रियः ।
प्रातःस्नायी नरः स्त्री वा ज्ञातीनां श्रेष्ठतां व्रजेत् ॥

वामनपुराणे—

वैशाखेऽप्यूषलवणं वर्जयित्वा च गोप्रदः ।
भूत्वा विष्णुपदे कल्पं स्थित्वा राजा भवेदिह ॥

नृसिंहप्रसादे पद्मपुराणे—

तीर्थे वाऽनुदिनं स्नानं तिलैर्येतपितृतर्पणम् ।
दानं धर्मघटादीनां मधुसूदनपूजनम् ।
माधवे मासि कुर्वीत मधुसूदनतुष्टिदम् ॥

अपरार्के वामनपुराणे—

गन्धाश्च माल्यानि तथा वैशाखे सुरभीणि च ।
देयानि द्विजमुख्येभ्यो मधुसूदनतुष्टये ॥

उद्यापनं च तत्रैवोक्तम्—

मासमेकं बहिः स्नात्वा नद्यादौ विमले जले ।
एकादश्यां वा द्वादश्यां पौर्णमास्यामथापि वा ॥
उपोष्य नियतो भूत्वा कुर्यादुद्यापनं बुधः ।
मण्डपं कारयेदादौ कलशं तत्र विन्यसेत् ॥
निष्केण वा तदर्द्धेन तदर्द्धेनाथ वा पुनः ।
शक्त्या वा कारयेद्देवं सौवर्णं लक्षणान्वितम् ॥
लक्ष्मीयुतं जगन्नाथं पूजयेदासने बुधः ।
भूषणैश्चन्दनैः पुष्पैर्दीपैर्नैवेद्यसञ्चयैः ॥
एवं संपूज्य विधिवद्रात्रौ जागरणं चरेत् ।
श्वोभूते कृतमैत्रोऽथ ग्रहवेद्यां ग्रहान्यजेत् ॥
होमं कुर्यात्प्रयत्नेन पायसेन विचक्षणः ।
तिलाज्येन यवैर्वापि सर्वैर्वापि स्वशक्तितः ॥
अष्टोत्तरसहस्रं वा शतमष्टोत्तरं तु वा ।
प्रतद्विष्णुरनेनैव इदं विष्णुरनेन वा ॥
व्रतसंपूर्तिसिध्यर्थमेकां धेनुं पयस्विनीम् ।
पादुकोपानहौ छत्रं गुरवे व्यजनं तथा ॥
शय्यां सोपस्करां दद्याद्दीपिकां दर्पणं तथा ।
ब्राह्मणान्भोजयेत्त्रिंशत्तेभ्यो दद्याच्च दक्षिणाम् ॥
कलशाञ्जलपूर्णांश्च तेभ्यो दद्याद्यवांस्तथा ।
एवं कृते माधवस्य उद्यापनविधौ शुभे ॥
फलमाप्नोति सकलं विष्णुसायुज्यमाप्नुयात् ।

वैशाखस्य मलत्वेऽपि तत्रैव स्नानादि समाप्यमितिहेमाद्रिमदनरत्नौ । तथा च काठकगृह्ये—

आरब्धं मलमासात्प्राग्यत्काम्यमसमापितम् ।
संप्राप्ते मलमासेऽपि तत्समाप्यमसंशयम् ॥ इति ।

इति वैशाखोद्यापनविधिः ।

अथ ज्येष्ठकृत्यम् ।

भविष्योत्तरे—

पिष्टेन पङ्कजं कृत्वा ज्येष्ठे मासि सवेदकम् ।
पुष्पैः संपूज्य गन्धाढ्यैर्नानावस्त्रविभूषितैः ।
वर्षकोटियुगं साग्रं सूर्यलोके महीयते ॥

पङ्कजो ब्रह्मा । वामनपुराणे—

उदकुम्भांश्च धेनुं च तालवृन्तं स चन्दनम् ।
त्रिविक्रमस्य प्रीत्यर्थं दातव्यं ज्येष्ठमासि च ॥

इति ज्येष्ठकृत्यम् ।

अथ आषाढकृत्यम् ।

वामनपुराणे—

उपानद्युगलं छत्रं लवणाऽऽमलकानि च ।
आषाढे मानसप्रीत्यै दातव्यानीह भक्तितः ॥

भारते— आषाढमेकभक्तेन स्थित्वा मासमतन्द्रितः ।
बहुधान्यो बहुधनो बहुपुत्रश्च जायते ॥

इति आषाढकृत्यम् ।

अथ चातुर्मास्यव्रतानि ।

भविष्योत्तरे—

स्त्री वा नरो वा मद्भक्तो धर्मार्थं सुदृढव्रतः ।
गृह्णीयान्नियमानेतान्दन्तधावनपूर्वकम् ॥
तेषां फलानि वक्ष्यामि तत्कर्तॄणां पृथक् पृथक् ।
कटुतैलपरित्यागाच्छत्रुनाशमवाप्नुयात् ॥

तथा—योगाभ्यासी भवेद्यस्तु स ब्रह्मपदमाप्नुयात् ।
कट्वम्लतिक्तमधुरक्षारकाषायसञ्चयम् ॥
यो वर्जयेत्स वैरूप्यं दौर्गन्ध्यं नाप्नुयात्कचित् ।
ताम्बूलवर्जनाद्भोगी रक्तकण्ठश्च जायते ॥
मधुरस्वरो भवेद्राजन् पुरुषो गुडवर्जनात् ।
तैलस्य वर्जनाद्राजन्सुन्दराङ्गः प्रजायते ॥
घृतत्यागाच्च लावण्यं सर्वस्निग्धतनुर्भवेत् ।
फलत्यागाच्च मतिमान्बहुपुत्रश्च जायते ॥
शाकपत्राशनाद्रोगी अपक्वादोऽमलो भवेत् ।
पादाभ्यङ्गपरित्यागाच्छिरोभ्यङ्गविवर्जनात् ॥
दीप्तिमान्दीप्तकिरणो यक्षो द्रव्यपतिर्भवेत् ।
दधिदुग्धतक्रनियमी गोभक्तो गोपतिर्भवेत् ॥
इन्द्रातिथित्वमाप्नोति स्थालीपाकस्य वर्जनात् ।

लभते सन्ततिं दीर्घां तैलपक्वविवर्जनात् ॥
भूमौ प्रस्तरशायी च वीरो मुनिवरो भवेत् ।
सदा मुनिः सदा योगी मधुमांसस्य वर्जनात् ॥
तथा—एकान्तरोपवासेन ब्रह्मलोके महीयते ।
मौनव्रती भवेद्यस्तु तस्याज्ञाऽस्खलिता भवेत् ॥
भूमौ भुङ्क्ते सदा यस्तु स पृथिव्याः पतिर्भवेत् ।
नमो नारायणायेति जपन्यज्ञफलं लभेत् ॥
पादाभिवन्दनाद्विष्णोर्लभेद्गोदानजं फलम् ।
विष्णुपादाब्जसंस्पर्शाद्दिनपापात्प्रमुच्यते ॥
पादोदकाभिषेकाद्वैगङ्गास्नानं दिने दिने ।
विष्णुदेवकुले कार्ये उपलेपनमार्जने ॥
कल्पस्थायी भवेद्राजा स नरो नात्र संशयः ।
प्रदक्षिणाशतं यस्तु करोति स्तुतिपाठकः ॥
हंसयुक्तविमानेन स वै विष्णुपुरं व्रजेत् ।
गीतवाद्यकरो विष्णोर्गान्धर्वं लोकमाप्नुयात् ॥
नित्यं शास्त्रसमाख्यानाल्लोकान् यस्तु प्रबोधयेत् ।
व्यासस्तुष्यति तस्याशु विष्णुलोकं स गच्छति ॥
कृत्वा प्रदक्षिणां विष्णोर्लोकमप्सरसां व्रजेत् ।
तीर्थेषु स्नपनाद्विष्णोर्निर्मलं ज्ञानमाप्नुयात् ॥
पञ्चगव्याशनात्पार्थ चान्द्रायणफलं लभेत् ।
अयाचितेन प्राप्नोति पुत्रधर्मानशेषतः ॥
षष्ठान्नकालभोक्ता यः कल्पस्थायी भवेद्दिवि ।
शिलोञ्छेन तु भुञ्जानः प्रयागस्नानमाप्नुयात् ।
पर्णेषु यो नरो भुङ्क्ते कुरुक्षेत्रफलं लभेत् ॥
यामद्वयं जलत्यागान्न रोगैरभिभूयते ।
गुडवर्जी नरो दद्यात्तद्भूतं ताम्रभाजनम् ॥
सहिरण्यं नृपश्रेष्ठ लवणस्याप्ययं विधिः ।

ब्रह्मवैवर्ते—

एकभक्तं नरः कृत्वा नित्यस्नायी दृढव्रतः ।
योऽर्चयेच्चतुरो मासान्वासुदेवं स नाकभाक् ॥
यस्तु सुप्ते हृषीकेशे नक्तमाचरते व्रती ।

वस्त्रयुग्मं नरो दत्त्वा शिवलोके महीयते ॥
अपूपवर्जनं कृत्वा भोजने व्रतमाचरेत् ।
कार्तिके स्वर्णगोधूमान्वस्त्रं दत्त्वाश्वमेधभाक् ॥
अन्नं दत्त्वा च विप्राय ब्रह्मलोकमवाप्नुयात् ।
एकान्तरोपवासेन विष्णुपूजनतत्परः ॥

एकान्तरोपवासः उपवासद्वयान्तरितनक्तः ।

गां दत्त्वा वासुदेवस्य लोके संपूज्यते नरः ।
यस्तु सुप्ते हृषीकेशे क्षितिशायी भवेन्नरः ॥
शय्यां सोपस्करां दत्त्वा इन्द्रलोके महीयते ।
वार्षिकांश्चतुरो मासान् मद्यं मांसं च यस्त्यजेत् ॥
स्वर्णदो हरिमुद्दिश्य स भवेद्वेदवित्तमः ।
क्षपयेत्कृच्छ्रपादेन आषाढादिचतुष्टयम् ॥
विष्णुपूजनकृन्मर्त्यः स भवेत्तन्निकेतनः ।

व्रतान्ते कृत्यं तत्रैव—

समाप्तौ भोजयेद्विप्रान् भक्त्या दद्याच्च दक्षिणाम् ।

तथा—समाप्ते गोयुगं दद्याद्दत्त्वा विप्रायभोजनम् ॥

तथा—समाप्तौ गोवृषं दद्याद्वस्त्रं काञ्चनसंयुतम् ॥

तथा—व्रतान्ते च तथा दद्याद्गामेकां च पयस्विनीम् ।

तथा—वस्त्रयुग्मं समाप्तौ तु वस्त्रं दद्याद्द्विजातये ॥ इति ।

तथा—व्रतान्ते विप्रमिथुनं पूज्य धेनुसमन्वितान् ।
वृषान्हिरण्मयान्दद्यात्सोश्वमेधफलं लभेत् ॥

एतेषां च पक्षाणां शक्तितो व्यवस्था । चातुर्मास्ये निषिद्धान्युक्तानि भविष्योत्तरे—

सुप्ते यस्मिन्निवर्तंते क्रियाः सर्वाः शुभोदयाः ।
विवाहव्रतबन्धादि चूडासंस्कारवीक्षणम् ॥
यज्ञा गृहप्रवेशाश्च प्रतिष्ठा देवभूभुजाम् ।
पुण्यानि यानि कर्माणि न स्युः सुप्ते जगत्पतौ ॥

वीक्षणमपूर्वदेववीक्षणम् । पुण्यानि कर्माणि ज्योतिष्टोमादीनि ।

इति चातुर्मास्यविधिः ।

अथ नदीनां रजोदोषः ।

तत्र तावन्नद्यो द्विविधाः । महत्योऽल्पाश्चेति । तथा च ब्रह्मपुराणे—

गोदावरी भीमरथी तुङ्गभद्रा च वेणिका ।
तापी पयोष्णी विन्ध्यस्य दक्षिणे तु प्रकीर्तिताः ॥
भागीरथी नर्मदा च यमुना च सरस्वती ।
विशोका च वितस्ता च विन्ध्यस्योत्तरतः स्थिताः ॥
द्वादशैता महानद्यो देवर्षिक्षेत्रसंभवाः ।

एतदन्या अल्पाः । ततोऽप्यल्पा गर्ताः । तथा च स्मृत्यन्तरे—

धनुःसहस्राण्यष्टौ च गतिर्यासां न विद्यते ।
न ता नदीशब्दवहा गर्तास्ते परिकीर्तिताः ॥

तत्र महतीषु भविष्योत्तरे—

आदौ तु कर्कटे देवि महानद्यो रजस्वलाः ।
त्रिदिनं तु चतुर्थेऽह्नि शुद्धाः स्युर्जाह्नवी यथा ॥ इति ।

देवलः—गङ्गा च यमुना चैव प्लक्षजाता सरस्वती ।
रजसा नाभिभूयन्ते ये चान्ये नदसंज्ञिताः ॥
शोणसिंधुहिरण्याक्षाः कोकलोहितघर्घराः ।
शतद्रुश्च नदाः सप्त पावनाः परिकीर्तिताः ॥

स्मृतिसंग्रहे—

तपनस्य सुता गङ्गा गौतमी च सरस्वती ।
रजसा नाभिभूयन्ते वेणा च नदसंज्ञिताः ॥

निगमः—गङ्गा धर्मद्रवः पुण्या यमुना च सरस्वती ।
अन्तर्गतरजोदोषाः सर्वावस्थासु चामलाः ॥

एवं च—प्रथमं कर्कटे देवि त्र्यहं गङ्गा रजस्वला ।
तथा— कर्कटादौ रजोदुष्टा गौतमी वासरत्रयम् ॥
चन्द्रभागा सती सिन्धुः सरयूर्नर्मदा तथा ।

इत्यादि तदन्तर्गतरजोदोषविषयम् । अल्पनदीषु विशेषान्तरमाह देवलः—

नभोनभस्ययोर्मध्ये सर्वा नद्यो रजस्वलाः ।
तासु स्नानं न कुर्वीत देवर्षिपितृतर्पणम् ॥

अत्रिश्च—सिंहकर्कटयोर्मध्ये सर्वा नद्यो रजस्वलाः ।
न स्नानादीनि कर्माणि तासु कुर्वीत मानवः ॥

न चैतयोः सर्वा नद्य इत्यविशेषोक्त्या महानदीविषयत्वमपीति ग्राह्यम् ।

सिंहकर्कटयोर्मध्ये सर्वा नद्यो रजस्वलाः ।
तासु स्नानं न कुर्वीत वर्जयित्वा समुद्रगाः ॥

इति व्याघ्रपदोक्तेः । अल्पनदीषु ऋत्ववधिर्मात्स्ये—

यावन्नोदेति भगवान् दक्षिणाशाविभूषणम् ।
तावद्रजोवहा नद्यः करतोयाः प्रकीर्तिताः ॥ इति ।

करतोयाः अल्पोदकाः कात्यायनेन त्वत्रोक्तो विशेषः—

याः शोषमुपगच्छन्ति ग्रीष्मे कुसरितो भुवि ।
तासु प्रावृषि न स्नायादपूर्णे दशवासरे ॥ इति ।

रजोदोषश्च न तत्तीरवासिनाम् । 'न तु तत्तीरवासिनाम्' इति निगमोक्तेः । विशेषान्तरं मत्स्यपुराणे—

पुण्याम्भसा समायोगाद्दुष्टमप्यम्बु पावनम् ॥ इति ।

भारते च—

अपवित्रमपि प्राप्य गङ्गां याति पवित्रताम् ।

रजोयुतनदीजलपाने प्रायश्चित्तं स्मृतिसङ्ग्रहे—

काले नभस्यशुद्धं स्यात्त्रिरात्रं तु नवोदकम् ।
अकाले तु दशाहं स्यात् पीत्वा नाद्यादहर्निशम् ॥ इति ।

भविष्ये—महदम्बु समं वाऽपि यदि तिष्ठेत्पुरातनम् ।
नवाम्बु मिश्रितं तेन न दुष्टमिति सूरयः ॥

योगयाज्ञवल्क्यः—

रजोदुष्टेऽम्भसि स्नानं वर्ज्यं नद्यादिषु द्विजैः ।
कदर्थितं रजस्तेषां संध्योपास्तिश्च तर्पणम् ॥

तथा—अजा गौर्महिषी चैव ब्राह्मणी च प्रसूतिका ।
भूमेर्नवोदकं चैव दशरात्रेण शुद्ध्यति ॥

कृतनूतनकूपाद्युदकमपि नवोदकम् । व्याघ्रपादः—

अभावे कूपवापीनामनपायिपयोभृताम् ।
रजोदुष्टेऽपि पयसि ग्रामभोगो न दुष्यति ॥

वसिष्ठः—उपाकर्मणि चोत्सर्गे प्रेतस्नाने तथैव च ।
चन्द्रसूर्यग्रहे चैव रजोदोषो न विद्यते ॥ इति ।

अथ श्रावणकृत्यम् । तत्र मासव्रतानि ।

भारते— श्रावणं नियतो मासमेकभक्तेन यः क्षिपेत् ।
यत्र तत्राभिषेकेण पूज्यते ज्ञातिवर्द्धनः ॥

वामनपुराणे—
घृतं च क्षीरकुम्भांश्च घृतपक्कं फलानि च ।
श्रावणे श्रीधरप्रीत्यै दातव्यानि दिने दिने ॥

इति श्रावणकृत्यम् ।

अथ भाद्रपदकृत्यम् ।

भारते— प्रोष्ठपद्यं तु यो मासमेकाहारो भवेन्नरः ।
धनाढ्यः स्फीतमहतामैश्वर्यं प्रतिपद्यते ॥

वामनपुराणे—
मासि भाद्रपदे दद्यात्पायसं मधुसर्पिषा ।
हृषीकेशप्रीणनार्थं लवणं सगुडोदनम् ॥

इति भाद्रपदकृत्यम् ।

अथ आश्विनकृत्यम् ।

यमः— घृतमाश्वयुजे मासि नित्यं दद्याद्द्विजातये ।
प्रीणयित्वाऽश्विनौ देवौ रूपभागधिजायते ॥

वामने— तिलाः स्थिराङ्गवृषभं दधि ताम्ररसादिकम् ।
प्रीत्यर्थं पद्मनाभस्य देयमाश्वयुजे नरैः ॥

भारते— तथैवाश्वयुजं मासमेकभक्तेन यो नयेत् ।
धनवान्बहुपुत्रश्च वाहनाढ्यश्च जायते ॥

इति आश्विनकृत्यम् ।

अथ कार्तिककृत्यम् । स्नानादिव्रतानि ।

विष्णुः— कार्तिकं सकलं मासं नित्यस्नायी जितेन्द्रियः ।
जपन्हविष्यभुग्दान्तः सर्वपापैः प्रमुच्यते ॥

जपश्चेष्टदेवतामन्त्रस्य गायत्र्या वा । एतच्च शक्तपरम् । अशक्तस्य तूक्तं काशीखण्डे—

वाराणस्यां पञ्चनदे त्र्यहं स्नातास्तु कार्तिके ।
अमी ते पुण्यवपुषः पुण्यभाजोऽतिनिर्मलाः ॥ इति ।

स्नानकालश्चोक्तस्तत्रैव—

कार्तिके बिन्दुतीर्थे यो ब्रह्मचर्यपरायणः ।
स्नास्यत्यनुदिते भानौ भानुजात्तस्य भीः कुतः ॥

भानुजाद्यमात् । तत्रैव स्नानमन्त्रः—

कार्तिकेऽहं करिष्यामि प्रातःस्नानं जनार्दन ।
प्रीत्यर्थं तव देवेश दामोदर मया सह ॥
इमं मन्त्रं समुच्चार्य मौनी स्नायाद्व्रतीनरः ॥ इति ।

अर्घ्यमन्त्रश्च तत्रैव—

व्रतिनः कार्तिके मासि स्नातस्य विधिवन्मम ।
दामोदर गृहाणार्घ्यं दनुजेन्द्रनिषूदन ॥
स्नाने नैमित्तिके कृष्ण कार्तिके पापशोषणे ।
गृहाणत्वर्घ्यं मया दत्तं राधया सहितो भवान् ॥
इमौ मन्त्रौ समुच्चार्य्य योऽर्घ्यं मह्यं प्रयच्छति ।
सुवर्णरत्नपुष्पाम्बुपूजाशङ्खेन पुण्यवान् ॥
सुवर्णपूर्णपृथिवी सङ्कल्पोदकपूर्वकम् ।
तेन दत्ता भवेत्सम्यक् सुपात्राय सुपर्वणि ॥ इति ।

पाद्मे— तुलसीदललक्षेण कार्तिके योऽर्चयेद्धरिम् ।
पत्रे पत्रे मुनिश्रेष्ठ मौक्तिकं लभते फलम् ॥

तत्रैव— कुरुक्षेत्रे कोटिगुणं गङ्गायामपि तत्समः ।
ततोऽधिकः पुष्करे स्याद्द्वारावत्यां च भार्गव ॥
दुर्लभः कार्तिको विप्र मथुरायां नृणामिह ॥ इति ।

स्कान्दे कार्तिकमाहात्म्ये—

धात्रीछायायां यः कुर्यात्पिण्डदानं महामुने ।
मुक्तिं प्रयान्ति पितरः प्रसादान्माधवस्य च ॥

दानमाह वामनः—

कनकं रजतं दीपान् मतिमुक्ताफलादिकम् ।
दामोदरस्य प्रीत्यर्थं प्रदद्यात्कार्तिके नरः ॥

चन्द्रप्रकाशे वर्षदर्पणे—

विप्रवेश्मनि यो दद्यात्कार्तिके मासि दीपकम् ।
अग्निष्टोमफलं तस्य प्रवदन्ति मनीषिणः ॥

चतुष्पथेषु रथ्यासु ब्राह्मणावसथेषु च ।
वृक्षमूलेषु गोष्ठेषु कान्तारगहनेषु च ॥
दीपदानाद्धि सर्वत्र महाफलमवाप्नुयात् ।
उच्चैः प्रदीपमाकाशे यो दद्यात्कार्तिके नरः ॥
सर्वं कुलं समुद्धृत्य विष्णुलोकमवाप्नुयात् ॥ इति ।

मन्त्रोऽपि तत्रैव—

दामोदराय नभसि तुलायाते मया सह ।
प्रदीपं ते प्रयच्छामि नमोऽनन्ताय वेधसे ॥ इति ।

स्कान्दे—प्रदीपमालां यः कुर्यात्कार्तिके मासि वै मम ।
अवसानेषु दीपानां ब्राह्मणान् भोजयेच्छुचिः ॥
गाणपत्यं स लभते दीप्यते च रविर्यथा ॥ इति ।

भारते—कार्तिके तु नरो मासं यः कुर्यादेकभोजनम् ।
शूरश्च बहुवीर्यश्च कीर्तिमांश्चैव जायते ॥

काशीखण्डे—

कृच्छ्रं वा चातिकृच्छ्रं वा प्राजापत्यमथापि वा ।
संप्राप्ते कार्तिके मासि कुर्याच्छक्त्याऽतिपुण्यवान् ॥
एकान्तरं व्रतं कुर्यात्त्रिरात्रव्रतमेव वा ।
पञ्चरात्रं सप्तरात्रं संप्राप्ते कार्तिके व्रती ॥
पक्षव्रतं वा कुर्वीत मासोपोषणमेव वा ।
शाकाहारं पयोहारं फलाहारमथापि वा ॥
चरेद्यवान्नाहारं वा संप्राप्ते कार्तिके व्रती ।
ब्रह्मचर्यं चरेदूर्जे महाव्रतफलाप्तये ॥
पत्रभोजी भवेदूर्जे कांस्यं त्याज्यं प्रयत्नतः ।
कांस्यस्य नियमे दद्यात्कांस्यं सर्पिःप्रपूरितम् ॥

नारदीये—

कार्तिके वर्जयेत्कांस्यं कार्तिके शुक्तसन्धितम् ।

शुक्तं पर्युषितम् । सन्धितं लवणशाकः ।

पाद्मे—राजिकां मादकं चैव नैवाद्यात्कार्तिके व्रती ।
द्विदलं तिलतैलं च तथान्यन्मतिदूषितम् ॥

द्विदलं तु—

माषमुद्गमसूराश्च चणकाश्च कुलत्थकाः ।

निष्पावा राजमाषाश्च आढक्यं द्विदलं स्मृतम् ॥

इति स्कान्दोक्तम् ।

भारते—कार्तिके वर्जयेन्मांसं कार्तिके वर्जयेन्मधु ॥ इति ।

काशीखण्डे—

मधुत्यागे घृतं दद्यात्पायसं च स शर्करम् ।
मांसाशिनोऽपि ये भूपास्त्यजेयुस्तेऽपि कार्तिके ॥
नियमान्मत्स्यमांसानां प्रदद्यात्कार्तिके व्रती ।
कूष्माण्डानि समांसानि दशस्वर्णयुतान्यपि ॥
कार्तिके मौनभोजी यः सोऽश्नात्यमृतमेव हि ।
सुघण्टां सतिलां मौनी सहिरण्यां प्रदापयेत् ॥
कार्तिके लवणं त्यक्तं येन व्रतभृता सता ।
त्यक्ताः सर्वे रसास्तेन तत्त्यागी गां प्रदापयेत् ॥
भूशय्यां कार्तिके कुर्यान्न भवं संस्पृशेद्व्रती ।
पर्यङ्कं भूषणैर्दद्यात्सतूलं सोपधानकम् ॥

सर्वचातुर्मास्यान्यपि चतुर्ष्वसंभवे कार्तिक एव कार्याणि ।

तथा च तत्रैव—

चतुर्ष्वपि च मासेषु न सामर्थ्यं व्रते यदि ।
तदोर्जे व्रतिना भाव्यमप्यब्दफलमिच्छता ॥ इति ।

अथ भीष्मपञ्चकम् ।

कार्तिकं प्रक्रम्य ब्राह्मे—

एकादश्यां तु गृह्णीयाद्व्रतं पञ्चदिनात्मकम् ।
व्रती स्नात्वा विधानेन मध्याह्ने तु तथा पुनः ॥

अत्र प्रातर्मध्याह्ने च मृद्गोमयाभ्यां स्नात्वा देवर्षिपितॄन्संतर्प्य विष्णुं पञ्चामृतपञ्चगव्यैः संस्नाप्य कर्पूरकस्तूरीकुङ्कुमचन्दनैरनुलिप्य पुष्पैरभ्यर्च्य कृष्णागरुणा धूपयित्वा पाञ्चाह्निकमनवरतदीपं प्रज्वाल्य हविष्यान्नं निवेद्य सायंसन्ध्यामुपास्य मूलमन्त्रं जपेत् । तत्र पञ्चसु दिनेषु विशेषः । आद्ये पद्मैः पादौ पूजयेत् । द्वितीये बिल्वपत्रैर्जानुनी । तृतीये जानुत आनाभि तुलसीपत्रैः । चतुर्थे जातिपुष्पादिभिः स्कन्धौ । पञ्चमे मालतीपुष्पैः शिरः । तथा पञ्चस्वपि दिनेषु पूजोत्तरम्,

सत्यव्रताय शुचये गाङ्गेयाय महात्मने ।
भीष्माय वै ददाम्यर्घ्यमाजन्मब्रह्मचारिणे ॥
वसूनामवताराय शन्तनोरात्मजाय वै ।
अर्घ्यं ददामि भीष्माय सोमवंशोद्भवाय च ॥
वैयाघ्रपादगोत्राय साङ्कृत्यप्रवराय च ।
गङ्गापुत्राय भीष्माय प्रदास्येऽहं तिलोदकम् ॥
अपुत्राय ददाम्येतत्सतिलं भीष्मवर्मणे ।

इत्येतैर्मन्त्रैर्भीष्मं संतर्प्य गोमयगोमूत्रदुग्धदधिघृतानि क्रमेण पञ्चसु दिनेषु पिबेत् । एवं पञ्च दिनान्युपोष्य षष्ठदिवसे विधिवत्स्नात्वा पक्वान्नेन पञ्च ब्राह्मणान्संभोज्य बन्धुभिः सह रात्रौ भुञ्जीत । अत्र च एकादश्यां सुवर्णं द्वादश्यां वस्त्रं त्रयोदश्यां गौश्चतुर्दश्यां घृतपायसं पौर्णमास्यां श्वेतकृष्णतिला वस्त्रं च देयम् । मैथुनानृतवादमधुमांसताम्बूलाभ्यङ्गादिवर्ज्यानि । एतेषु च स्नानादिषु सौरश्चान्द्रो वा मास आश्रयणीयः । [[1]अभ्यङ्गमाषमसूरमुद्गचणककुलायनिष्पावराजमाषाढक्यादीनि वर्ज्यानि । अन्यान्यपि वर्ज्यान्युक्तानि पाद्मे—

पलाण्डुं लशुनं हिङ्गुं छत्राकं गृञ्जनं तथा ।
नालिकां मूलकं शिग्रुं वर्जयेत्कार्तिके व्रती ॥
अलाबुं चापि वृन्ताकं कूष्माण्डं बृहतीफलम् ।
कलिङ्गं चक्रपिष्टं च वर्जयेद्वैष्णवो व्रती ॥

तथा च—पाचितं च तदा धात्रीं नैवाद्याद्वैष्णवो व्रती ।
क्रमात्कूष्माण्डं बृहतीं छत्राकं मूलकं तथा ॥
श्रीफलं च कलिङ्गं च फलं धात्रीभवं तथा ।
नारिकेलं तथाऽलाबुं पटोलं बदरीफलम् ॥
चर्मवृन्ताक···तं शाकं तुलसिजं तथा ।
शाकान्येतानि वर्ज्यानि क्रमात्प्रतिपदादिषु ॥
धात्रीफलं रवौ तद्वद्वर्जयेत्सर्वदा गृही ।]
तुलामकरमेषेषु प्रातःस्नानं विधीयते ॥
हविष्यं ब्रह्मचर्यं च महापातकनाशनम् ।

इति विष्णुस्मृतेः ।

---

१ कुंडलीतः पाठो ग. पुस्तके दृश्यते ।

आश्विनस्य तु मासस्य या शुक्लैकादशी भवेत् ।
कार्तिकस्य व्रतानीह तस्यां वै प्रारभेत्सुधीः ॥

इति पाद्मोक्तेश्च ।

इति कार्तिककृत्यम् ।

अथ कार्तिकव्रतोद्यापनम् ।

पाद्मे नारद उवाच—

अथोर्जव्रतिनः सम्यगुद्यापनविधिं नृप ।
तं शृणुष्व मयाऽऽख्यातं सविधानं विशेषतः ॥
ऊर्जशुक्लचतुर्दश्यां कुर्यादुद्यापनं व्रती ।
व्रतसंपूर्णतार्थाय विष्णुप्रीत्यर्थमेव च ॥
तुलस्या उपरिष्टात्तु कुर्यान्मण्डपिकां शुभाम् ।
सुतोरणां चतुर्द्वारां पुष्पचामरशोभिताम् ॥
द्वारेषु द्वारपालांश्च पूजयेन्मृन्मयान्पृथक् ।
पुण्यशीलं सुशीलं च जयं विजयमेव च ॥
तुलसीमूलदेशे तु सर्वतोभद्रमेव च ।
पञ्चभिर्वर्णकैः सम्यक् शोभाढ्यं समलङ्कृतम् ॥
तस्योपरि सपिधानं पञ्चरत्नसमन्वितम् ।
महाफलेन संयुक्तं कुम्भं तत्र निधाय च ॥
पूजयेत्तत्र देवेशं शङ्खचक्रगदाधरम् ।
कौशेयपीतवसनं युक्तं जलधिकन्यया ॥
इन्द्रादिलोकपालांश्च मण्डले पूजयेद्व्रती ।
द्वादश्यां प्रतिबुद्धोऽसौ त्रयोदश्यां यतः सुरैः ॥
दृष्टोऽर्चितश्चतुर्दश्यां तस्मात्पूज्यस्तिथाविह ।
तस्यामुपवसेद्भक्त्या शांतः प्रयतमानसः ॥
पूजयेद्देवदेवेशं सौवर्णं गुर्वनुज्ञया ।
उपचारैः षोडशभिर्नानाभक्ष्यसमन्वितैः ॥
रात्रौ जागरणं कुर्याद्गीतवाद्यादिमङ्गलैः ।
मतिं कुर्वन्ति ये भक्त्या जागरे चक्रपाणिनः ॥
जन्मान्तरशतोद्भूतैस्ते मुक्ताः पापसञ्चयैः ।
नराणां जागरे विष्णोर्गीतनृत्यं प्रकुर्वताम् ॥

गोसहस्रं च ददतां फलं समुदाहृतम् ।
गीतनृत्यादिकं कुर्वन् दर्शयन्कौतुकानि च ॥
पुरतो वासुदेवस्य रात्रौ वै हरिवासरे ।
पठन्विष्णुचरित्राणि यो रञ्जयति वैष्णवान् ॥
मुखेन कुरुते वाद्यं स्वेच्छालापांश्च वर्जयेत् ।
ततश्च पौर्णमास्यां च सपत्नीकान्द्विजोत्तमान् ॥
त्रिंशन्मितांस्तथैकं वा स्वशक्त्या वा निमन्त्रयेत् ।
वरान्दत्वा यतो विष्णुर्मत्स्यरूप्यभवत्ततः ॥
तस्यां दत्तं हुतं जप्तं तदक्षय्यफलं स्मृतम् ।
अतस्तान्भोजयेद्विप्रान्पायसान्नादिना व्रती ॥
अतोदेवाइतिद्वाभ्यां जुहुयात्तिलपायसम् ।
प्रीत्यर्थं देवदेवस्य देवानां च पृथक्पृथक् ॥
दक्षिणां च यथाशक्ति प्रदद्यात्प्रणमेच्च तान् ।
देवदेवं समभ्यर्च्य देवांश्च तुलसीं तथा ॥
ततो गां कपिलां तत्र पूजयेद्विधिवद्व्रती ।
गुरुं व्रतोपदेष्टारं वस्त्रालङ्करणादिभिः ॥
सपत्नीकं समभ्यर्च्य तांश्च विप्रान्क्षमापयेत् ।
युष्मत्प्रसादाद्देवेशः प्रसन्नो मम सर्वदा ॥
व्रतादस्माच्च यत्पापं सप्तजन्मकृतं मया ।
तत्सर्वं नाशमायातु स्थिरा मे चास्तु सन्ततिः ॥
मनोरथाश्च सफलाः सन्तु नित्यं तवार्चनात् ।
देहान्ते वैष्णवं स्थानं प्राप्नुयामतिदुर्लभम् ॥
इति क्षमाप्य तान्विप्रान्प्रसाद्य च विसर्जयेत् ।
कार्तिके वाऽथ तपसि विधिरेवंविधः स्मृतः ॥

नारद उवाच—

एवं यः कुरुते सम्यक् कार्तिकस्य व्रतं नरः ।
विपाप्मा स तु निर्मुक्तो विष्णुसान्निध्यगो भवेत् ॥
सर्वव्रतैः सर्वतीर्थैः सर्वदानैश्च यत्फलम् ।
ज्ञेयं तत्कोटिगुणितं सम्यगस्य विधानतः ॥
ते धन्यास्ते महापुण्यास्तेषां सर्वफलोदयः ।
विष्णुभक्तिरतास्ते स्युः कार्तिकव्रतकारिणः ॥

देहस्थितानि पापानि वितर्कं यान्ति तद्भयात् ।
क्व यास्यामो वयं त्वेवं यदूर्जे व्रतकृन्नरः ॥

नारद उवाच—

इत्यूर्जव्रतनियमाञ्शृणोति भक्त्या
यो वैतत्कथयति वैष्णवाय नित्यम् ।
सम्यग्व्रतकरणात्फलं भवेद्यत्
तत्सर्वं कलुषविनाशनं लभन्ते ॥

इति कार्तिकोद्यापनविधिः ।

अथ मार्गशीर्षकृत्यम् ।

महाभारते—

मार्गशीर्षं तु यो मासमेकभक्तेन संक्षपेत् ।
भोजयेत्तु द्विजाञ्शक्त्या स मुच्येद्व्याधिकिल्बिषैः ॥
कृषिभागी बहुधनो बहुधान्यश्च जायते ।

वामनपुराणे—

खरोष्ट्राश्वनरा गावः शकटानि अजाविकम् ।
दातव्यं केशवप्रीत्यै मासे मार्गशिरे नरैः ॥

इति मार्गशीर्षकृत्यम् ।

अथ पौषकृत्यम् ।

महाभारते—

पौषमासं तु कौंतेय एकभक्तेन यः क्षिपेत् ।
सुभगो दर्शनीयश्च यशोभागी च जायते ॥

इति पौषकृत्यम् ।

अथ माघकृत्यम् ।

विष्णुस्मृतौ—

तुलामकरमेषेषु प्रातःस्नायी भवेन्नरः ।
हविष्यं ब्रह्मचर्यं च महापातकनाशनम् ॥ इति ।

प्रभासखण्डे—

माघे मासि च यः स्नायान्नैरन्तर्येण भारत ।
पौण्डरीकफलं तस्य दिवसे दिवसे भवेत् ॥

ब्रह्मपुराणे—

एकादश्यां शुक्लपक्षे पौषमासे समारभेत् ।
द्वादश्यां पूर्णिमायां वा शुक्लपक्षे समापनम् ॥

पद्मपुराणे—

पौषस्यैकादशीं शुक्लामारभ्य स्थण्डिलेशयः ।
मासमात्रं निराहारस्त्रिकालं स्नानमाचरेत् ॥
त्रिकालमर्चयेद्विष्णुं त्यक्तभोगो जितेन्द्रियः ।
माघस्यैकादशीं शुक्लां यावद्विद्याधरोत्तम ॥

इदं त्रिकालस्नानं निराहारस्यैव साहचर्यात् । स्नानकालश्च पद्मपुराणे—

माघमासे रटन्त्यापः किञ्चिदभ्युदिते रवौ ॥ इति ।

भविष्योत्तरे—

यो माघमास्युषसि सूर्यकराभितप्ते
स्नानं समाचरति चारुनदीप्रवाहे ॥ इति ।

ब्राह्मे— अरुणोदये तु संप्राप्ते स्नानकाले विचक्षणः ॥ इति ।
माधवाङ्घ्रियुगं ध्यायन्यः स्नाति सुरपूजितः ॥ इति ।

एतानि शक्त्यपेक्षया व्यवस्थाप्यानि । तत्र सङ्कल्पमाह विष्णुः—

तत्र चोत्थाय नियमं गृह्णीयाद्विधिपूर्वकम् ।
माघमासमिमं पूर्णं स्नास्येऽहं देव माधव ॥
तीर्थस्यास्य जले नित्यमिति सङ्कल्प्य चेतसि ।

स्नानमंत्रः पाद्मे—

दुःखदारिद्र्यनाशाय श्रीविष्णोस्तोषणाय च ।
प्रातःस्नानं करोम्यद्य माघे पापप्रणाशनम् ॥
मकरस्थे दिवानाथे गोविन्दाच्युत माधव ।
स्नानेनानेन मे देव यथोक्तफलदो भव ॥
इमं मन्त्रं समुच्चार्य स्नायान्मौनसमन्वितः ॥ इति ।
सवित्रे प्रसवित्रे च परं धाम जले मम ।
त्वत्तेजसा परिभ्रष्टं पापं यातु सहस्रधा ॥

इति मन्त्रेण सूर्यायार्घ्यदानमुक्तं पृथ्वीचन्द्रोदये । मासपर्यन्तमसम्भवे त्र्यहं कर्तव्यम्—

अस्मिन्योगे त्वशक्तस्तु स्नायादपि दिनत्रयम् ॥
प्रयागे माघमासे तु त्र्यहं स्नातस्य यत्फलम् ।
नाश्वमेधसहस्रेण तत्फलं लभते नरः ॥

इति पाद्मात् । प्रयागासम्भवे काशीखण्डे—

काश्युद्भवे प्रयागे ये तपसि स्नान्ति मानवाः ॥
दशाश्वमेधजनितं फलं तेषां भवेद्ध्रुवम् ।

भविष्योत्तरे—

अप्रावृतशरीरस्तु यः कष्टं स्नानमाचरेत् ।
पदे पदे ऽश्वमेधस्य फलं प्राप्नोति मानवः ॥

नारदीये—न वह्निं सेवयेत्स्नातो ह्यस्नातोऽपि वरानने ।
होमार्थे सेवयेद्वह्निं शीतार्थे न कदाचन ॥
अहन्यहनि दातव्यास्तिलाः शर्करयान्विताः ।
त्रिभागास्तु तिलानां हि चतुर्थः शर्करान्वितः ॥

तथा— तिलस्नायी तिलोद्वर्ती तिलहोमी तिलोदकी ।
तिलभुक् तिलदाता च षट् तिलाः पापनाशनाः ॥
तैलमामलकाश्चैव तीर्थे देयास्तु नित्यशः ।
तथा प्रज्वालयेद्वह्निं सेवनार्थं द्विजन्मनाम् ॥

पाद्मे— दातव्यो दीपकोऽखण्डो देवमुद्दिश्य माधवम् ।

विष्णुः—'माघे मास्यग्निं प्रत्यहं तिलैर्हुत्वा सघृतकृसरं ब्राह्मणान् भोजयित्वा दीप्ताग्निर्भवतीति' । माघव्रतोद्यापनमाह चन्द्रप्रकाशे विष्णुः—

एवं स्नानावसाने तु भोज्यं देयमवारितम् ।
भोजयेद्द्विजदाम्पत्यं भूषयेद्वस्त्रभूषणैः ॥
कम्बलाजिनरत्नानि वासांसि विविधानि च ।
चोलकानि च देयानि प्रच्छादनपटास्तथा ॥
उपानहौ तथा गुप्तमोचकौ पापमोचकौ ।
अनेन विधिना दद्यान्माधवः प्रीयतामिति ॥

अत्र समापनमन्त्रः—

सवित्रे प्रसवित्रे च परं धाम जले मम ।
त्वत्तेजसा परिभ्रष्टं पापं यातु सहस्रधा ॥

दिवाकर जगन्नाथ प्रभाकर नमोऽस्तु ते ।
परिपूर्णं करिष्येऽहं माघस्नानं तवाऽऽज्ञया ॥
अहन्यहनि दातव्यास्तिलाः शर्करयान्विताः ।
माघावसाने सुभगे षड्रसं भोजनं तथा ॥
सूर्यो मे प्रीयतां देवो विष्णुमूर्तिर्निरञ्जनः ।
दम्पत्योर्वाससी सूक्ष्मे सप्तधान्यसमन्विते ॥
त्रिंशत्तु मोदका देयाः शर्करातिलसंयुताः ।
भागत्रयं तिलानां तु चतुर्थः शर्करांशकः ॥
अनभ्यङ्गी वरारोहे सर्वं मासं नयेदघम् ।

विशेषोद्यापनं तु ।

कार्तिके वाथ तपसि विधिरेवंविधः स्मृतः ॥

इति वचनात्पूर्वोक्त एव ज्ञेयः ।

इति माघकृत्यम् ।

अथ फाल्गुनकृत्यम् ।

स्कान्दे—एकभक्तं तु कुर्वाणः फाल्गुने मासि नित्यशः ।
स्त्रीषु सौभाग्यमाप्नोति स्त्रियाश्च परमप्रियः ॥

वामने— फाल्गुने व्रीहयो गावो वस्त्रं कृष्णाजिनान्वितम् ।
गोविन्दप्रीणनार्थाय दातव्यं पुरुषर्षभ ॥

तथा— प्रातःस्नायी भवेन्नित्यं द्वौ मासौ माघफाल्गुनौ ।

इति फाल्गुनकृत्यम् ।

अथ मलमासः ।

स द्विविधः । अधिमासः क्षयमासश्चेति । तदुक्तं मदनरत्ने काठकगृह्ये—

यस्मिन् मासे न सङ्क्रान्तिः सङ्क्रान्तिद्वयमेव वा ।
मलमासः स विज्ञेयो मासः स्यात्तु त्रयोदशः ॥ इति ।

आद्यस्वरूपं माधवीये ब्रह्मसिद्धान्ते—

चान्द्रो मासो ह्यसङ्क्रान्तो मलमासः प्रकीर्तितः ॥ इति ।

तस्य कालनियमोऽपि ब्रह्मसिद्धान्ते—

द्वात्रिंशद्भिर्गतैर्मासैर्दिनैः षोडशभिस्तथा ।

घटिकानां चतुष्केण पतत्यधिकमासकः ॥ इति ।

द्वितीयस्वरूपमपि सिद्धान्तशिरोमणौ—

असङ्क्रान्तमासोऽधिमासः स्फुटः स्या-
द्विसङ्क्रान्तमासः क्षयाख्यः कदाचित् ।
क्षयः कार्तिकादित्रये नान्यतः स्या-
त्तदा वर्षमध्येऽधिमासद्वयं च ॥ इति ।

अधिमासद्वयं क्षयात्पूर्वमेकः परस्तदनन्तरमित्यर्थः । तस्यागमनकालोऽप्युक्तः सिद्धान्तशिरोमणौ—

गतोऽब्ध्यद्रिनन्दैर्मिते शाककाले
तिथीशैर्भविष्यत्पथाङ्गाक्षसूर्यैः ।
गजाद्र्यग्निभूमिस्तथा प्रायशोऽयं
कुवेदेन्दुवर्षैः कचिद्गोकुभिश्च ॥ इति ।

अस्यार्थः—अब्धयश्चत्वारः, अद्रयः सप्त, नन्दा नव, एतत्सङ्ख्यात्रयमङ्कानां वामतो गतिरिति प्रकारेण प्रातिलोम्येन बोध्यम् । एवं च मेलने चतुःसप्तत्यधिकनवशतसङ्ख्या संपद्यते । एभिर्वर्षैः परिमिते काले कश्चित्क्षयमासः पूर्वं जात इत्यर्थः । एवमग्रेपि प्रातिलोम्येन सङ्ख्या बोद्धव्या । तिथयः पञ्चदश, ईशा एकादश, पञ्चदशाधिकशतयुतसहस्रसङ्ख्याकैर्वर्षैर्मिते याते कश्चित्क्षयमासोपेतः संवत्सरो भविष्यतीत्यर्थः । अङ्गानि षट्, अक्षाणि पञ्च, सूर्या द्वादश, षट्पञ्चाशदधिकशतद्वयोपेतसहस्रसङ्ख्याकैर्वत्सरैर्मिते जाते भविष्यतीत्यर्थः । गजा अष्ट, अद्रयः सप्त, अग्नयस्त्रयः, भूरेका, एवमष्टसप्तत्यधिकशतत्रयसङ्ख्याकैर्वत्सरे याते कश्चिद्भविष्यति । कुरेका, वेदाश्चत्वारः, इन्दुरेकः, एकचत्वारिंशदधिकशतसङ्ख्याकैर्वर्षैः । तथा गावः नव कुरेका एकोनविंशतिसङ्ख्याकैर्वर्षैरयं प्रायशो जायत इत्यर्थः ।

इति मलमासस्वरूपम् ।

अथ वर्ज्यावर्ज्यमुच्यते ।

तत्र माधवीये पैठीनसिः—

श्रौतस्मार्तक्रियाः सर्वा द्वादशे मासि कीर्तिताः ।
त्रयोदशे तु सर्वास्ताः निष्फलाः परिकीर्तिताः ॥

जाबालिरपि—

नित्यनैमित्तिके कुर्यात् श्राद्धं कुर्यान्मलिम्लुचे ।
तिथिनक्षत्रवारोक्तं काम्यं नैव कदाचन ॥

' कानिचिन्नित्यान्यपि मलिम्लुचे वर्ज्यानीति काठकगृह्ये—

षष्ठीज्याग्रयणाधानचातुर्मास्यादिकान्यपि ।
महालयाष्टकाश्राद्धोपाकर्माद्यपि कर्म यत् ॥
स्पष्टमासविशेषाख्याविहितं वर्जयेन्मले ॥ इति ।

षष्ठीष्टिः काठकादौ प्रसिद्धा । मदनरत्ने स्मृतिसंग्रहे—

जातकर्म च पुंसूतिः सीमन्तोन्नयनव्रतम् ।
मलिम्लुचेऽपि कुर्वीत निमित्तं यदि जायते ॥ इति ।

माधवीये भृगुः—

वृद्धिश्राद्धं तथा सोममग्न्याधेयं महालयम् ।
राजाभिषेकं च तथा न कुर्याद्भानुलङ्घिते ॥ इति ।

वृद्धमनुरपि—

अग्न्याधेयं प्रतिष्ठां च यज्ञदानव्रतानि च ।
वेदव्रतवृषोत्सर्गचूडाकरणमेखलाः ॥
माङ्गल्यमभिषेकं च मलमासे विवर्जयेत् ।

वृषोत्सर्गः काम्यः । ज्योतिःशास्त्रे—

तत्र दत्तमदत्तं च हुतं चाहुतमेव वा ।
सुजप्तमप्यजप्तं स्यान्नोपवासः कृतो भवेत् ॥
न यात्रां न विवाहं तु न च वास्तुनिवेशनम् ।
न प्रतिष्ठा च देवानां प्रासादग्रामभूरुहाम् ॥ इति ॥

स्मृत्यन्तरेऽपि—

वापीकूपतडागादिप्रतिष्ठा यज्ञकर्म च ।
न कुर्यान्मलमासे च महादानव्रतानि च ॥ इति ।

प्रजापतिरपि—

उपाकर्म च हव्यं च कव्यं पर्वोत्सवं तथा ।
उत्तरे नियतं कुर्यात्पूर्वे तन्निष्फलं भवेत् ॥

अन्यत्रापि—

अवरोहश्च हैमन्तः सर्पाणां बलिरष्टकाः ।
ईशानस्य बलिर्विष्णोः शयनं परिवर्तनम् ॥

प्रायश्चित्तं तु सर्वस्य मलमासे विवर्जयेत् ।

गृह्यपरिशिष्टे—

अवषट्कारहोमाश्च पर्व चाऽऽग्रयणं तथा ।
मलमासेऽपि कर्तव्यं काम्या इष्टीश्च वर्जयेत् ॥

अवषट्कारहोमाः अग्निहोत्रौपासनवैश्वदेवादयः। पर्व दर्शपौर्णमासौ स्थालीपाकौ च। आग्रयणमाग्रयणेष्टिः । सा च दुर्भिक्षे इति दीपिकायाम् ।

बृहस्पतिः—

बाले वा यदि वा वृद्धे शुक्रे वास्तङ्गते गुरौ ।
मलमासे इवैतानि वर्जयेद्देवदर्शनम् ॥ इति ।
आधानं यज्ञकर्मादि प्रायश्चित्तव्रतानि च ।
न कुर्यान्मलमासेऽपि शुक्रगुर्वोरुपप्लवे ।
अस्तङ्गते गुरौ शुक्रे वृद्धे बाले मलिम्लुचे ॥
व्रतारम्भापवर्गं च न कुर्यान्मौञ्जिबन्धनम् ।
निष्क्रमं जातकर्माणि काम्यं वृषविसर्जनम् ॥ इति ।

जातकर्माणि जातेष्टिः । बहुवचनं छान्दसम् ।

अस्त उक्तो ब्रह्मसिद्धान्ते—

रविणासत्तिरन्येषां ग्रहाणामस्त उच्यते ।
ततोऽर्वाग्वार्द्धकं मौढ्यादूर्ध्वं बाल्यं प्रकीर्तितम् ॥ इति ।

वार्द्धकबाल्ययोर्मानमपि तत्रैव—

पक्षं प्राग्दिशि वृद्धत्वं पश्चात्पञ्च दिनं कवेः ।
शैशवं प्राक्तु पञ्चाहं पश्चाद्दशदिनं स्मृतम् ॥ इति ।

कविः शुक्रः । अत्र विशेषः—

पक्षं वृद्धो महास्ते तु बालश्चात्र दशाहिकः ।
पादास्ते तु दशाहानि वृद्धो बालो दिनत्रयम् ॥

महास्तपादास्तलक्षणं तु ।

द्वात्रिंशद्दिवसाश्चास्ते जीवस्य भार्गवस्य तु ।
द्वासप्ततिर्महत्यस्ते पादास्ते द्वादश क्रमात् ॥ इति ।

अत्रैव— प्राक्पश्चादुदितः शुक्रः पञ्चसप्तदिनं शिशुः ।
विपरीतं तु वृद्धत्वं तद्वदेव गुरोरपि ॥

इत्यादिना न्यूनाधिकभावः श्रूयते । एतद्व्यवस्थामाह गर्गः—

शुक्रो गुरुः प्रागपराक्क बालो
विन्ध्ये दशावन्तिषु सप्तरात्रम् ।
वङ्गेषु हूणेषु च षट् च पञ्च
शेषे च देशे त्रिदिनं वदन्ति ॥

वृद्धत्वमप्येतत्प्रमाणं ज्ञेयम् । एवं वक्रातिचारसिंहराशिगतो गुरुरस्तङ्गत इव शुभकर्मसु वर्ज्यः । तदुक्तं लल्लेन—

नीचस्थे वक्रसंस्थेऽप्यतिचरणगते बालवृद्धास्तगे वा
संन्यासो देवयात्रा व्रतनियमविधिः कर्णवेधोऽपि दीक्षा ।
मौञ्जीबन्धोऽथचूडा परिणयनविधिर्वास्तुदेवप्रतिष्ठा
वर्ज्याः सद्भिः प्रयत्नात्त्रिदशपतिगुरौ सिंहराशिस्थिते च ।

नीचस्थो मकरस्थः । विशेषमाह माण्डव्यः—

श्रुतिवेधजातकान्नप्राशनचूडादिकं सर्वम् ।
रविभवनस्थे जीवे कार्यं वर्ज्यो विवाहस्तु ॥ इति ।

तथा— रविक्षेत्रं गते जीवे जीवक्षेत्रं गते रवौ ।
वर्जयेत्सर्वकार्याणि व्रतस्वस्त्ययनानि च ॥

तथा— गुर्वादित्ये गुरौ सिंहे शुक्रे चास्तमुपागते ।
त्यजेद्यानं महादानं व्रतं देवविलोकनम् ॥

लल्लः— गुरुक्षेत्रगतो भानुर्भानुक्षेत्रगतो गुरुः ।
गुर्वादित्यः स विज्ञेयः सर्वकर्मसु गर्हितः ॥

शौनकः—एकराशिगतौ भानुजीवौ स्यातां यदा पुनः ।
व्रतबन्धविवाहादि शुभं कर्माखिलं त्यजेत् ॥

राजमार्तण्डे—

यात्रां चूडां विवाहं श्रुतिविवरविधिं शङ्खसद्मप्रवेशे
प्रासादोद्यानहर्म्यं सुरनरभवनारम्भविद्याविधानम् ।
मौञ्जीबन्धं प्रतिष्ठां मणिकनकरदाधारणं कुर्वते ये
मृत्युः सिंहस्थितेज्ये गुरुदिनकरयोरेकराशिस्थयोश्च ॥

तथा— गुर्वादित्ये गुरौ सिंहे नष्टे शुक्रे मलिम्लुचे ।
याम्यायने हरौ सुप्ते सर्वकर्माणि वर्जयेत् ॥

सिंहस्थे गुरौ विशेषमाह शतानन्दः—

माघ्यां यदि मघा नास्ति सिंहे गुरुरकारणम् ॥ इति ।

अन्यत्रापि—

मघाऽऽर्क्षं परित्यज्य यदा सिंहे गुरुर्भवेत् ।
तदा चेत्कन्यका ऊढा सुभगा सुप्रिया भवेत् ॥

तथा— माघी मघा च संयुक्ता मघायां च गुरुर्भवेत् ।
महामाघस्तदा प्रोक्तो व्रतोद्वाहौ च वर्जयेत् ॥

वृद्धगार्ग्यः—

मीने धनुषि सिंहे च स्थिते सप्ततुरङ्गमे ।
क्षौरमत्र न कुर्वीत विवाहो गृहकर्म च ॥

तथा— वापीकूपतडागयागगमनक्षौरप्रतिष्ठाव्रतं
विद्यामन्दिरकर्णवेधनमहादानं वनं सेवनम् ।
तीर्थस्नानविवाहदेवभवनं मन्त्रादिदेवेक्षणं
दूरेणैव जिजीविषुः परिहरेदस्तङ्गते भार्गवे ॥ इति ।

लल्लोऽत्र पुनर्विशेषमाह—

उपप्लवे शीतलभानुभान्वो-
रर्द्धोदये वा कपिलाख्यषष्ठ्याम् ।
सुरासुरेज्यास्तमये च तीर्थे
यात्राविधिः सङ्क्रमणेऽपि शस्तः ॥

गुरुशुक्रास्तमघादिनिषिद्धकाले ग्रहणादौ न दोषः । इति लल्लोदाहृतवचनार्थः ।

स एव—अतिचारगतो जीवस्तं राशिं नैति चेत्पुनः ।
लुप्तसंवत्सरो ज्ञेयः सर्वधर्मबहिष्कृतः ॥

अस्यापवादः—

मेषे वृषे झषे कुम्भे यद्यतीचारगो गुरुः ।
न तत्र काललोपः स्यादित्याह गालवो मुनिः ॥ इति ।

गयाविषये वायुपुराणे विशेष उक्तः—

गयायां सर्वकालेषु पिण्डं दद्याद्विचक्षणः ।
अधिमासे जन्मदिने अस्ते च गुरुशुक्रयोः ॥
न त्यक्तव्यं गयाश्राद्धं सिंहस्थे च बृहस्पतौ ।

तथा— गोदावर्यां गयायां च श्रीशैले ग्रहणद्वये।
सुरासुरगुरूणां च मौढ्यदोषो न विद्यते ॥
तथा— शान्तिकर्म प्रकुर्वीत रोगे नैमित्तिके तथा।
गुरुभार्गवमौढ्यादिदोषस्तत्र न विद्यते ॥

तथा। काश्यामपि च स्कान्दे—

सदा कृतयुगं चात्र महापर्व सदाऽत्र वै।
न ग्रहास्तोदयकृतो दोषो विश्वेश्वरालये ॥
सदा सौम्यायनं तत्र सदा तत्र महोत्सवः।

एतानि काशीस्तुतिमात्रपराणीति वृद्धाः। मात्स्ये—

दर्शेऽप्यहरहः श्राद्धं दानं च प्रतिवासरम्।
गोभूतिलहिरण्यानां मासेऽपि स्यान्मलिम्लुचे ॥

मदनरत्ने यमः—

आब्दिकं प्रथमं यत्स्यात्तत्कुर्वीत मलिम्लुचे।
चतुर्दशे तु संप्राप्ते कुर्वीत पुनराब्दिकम् ॥

पुनराब्दिकं द्वितीयाद्याब्दिकम्। सत्यव्रतोऽपि—

वर्षे वर्षे तु यच्छ्राद्धं मातापित्रोर्मृतेऽहनि।
मलमासे न कर्तव्यं व्याघ्रस्य वचनं यथा ॥

यानि 'मासद्वयेऽपि कुर्वीत' इत्यादिवचनानि तानि मासिकविषयाणीति मदनरत्ने। मलमासमृतानां तु यदाकदाचित्स एव मलमास उपागतस्तदा तत्रैव प्रत्याब्दिकं कार्यम्। न तु शुद्धमासे। तदाह माधवीये भृगुः—

मलमासमृतानां तु यच्छ्राद्धं प्रतिवत्सरम्।
मलमासे तु कर्तव्यं नान्येषां तु कदाचन ॥ इति।

यत्तु हेमाद्रौ व्यासः—

मलमासमृतानां तु सौरं मानं समाश्रयेत्।
स एव दिवसस्तस्य श्राद्धपिंडोदकादिषु ॥ इति

तदप्येतत्परमेव। क्षयमासे तु तत्रैव प्रत्याब्दिकं कार्यम्। तदाह मदनरत्ने सत्यव्रतः—

एक एव यदा मासः संक्रान्तिद्वयसंयुतः।

मासद्वयगतं श्राद्धं मलमासेऽपि शस्यते ॥ इति ।

तच्च यस्यास्तिथेः पूर्वार्द्धे मृतः सैव तिथिः क्षयात्पूर्वमासस्थिता ग्राह्या । उत्तरार्द्धे चेत्तदा उत्तरमासस्थिता ग्राह्या । तथाचोक्तं दीपिकायाम्—

तिथ्यर्द्धे प्रथमे पूर्वो द्वितीयेऽर्द्धे तदुत्तरः ।
मासाविति बुधैश्चिन्त्यौ क्षयमासस्य मध्यगौ ॥ इति ।

अथात्र दानमुक्तं हेमाद्रौ पाद्मे—

अधिमासे तु संप्राप्ते गुडसर्पिर्युतानि च ।
त्रयस्त्रिंशदपूपानि दातव्यानि दिने दिने ॥
अधिमासे तु संप्राप्ते त्रयस्त्रिंशत्तु देवताः ।
उद्दिश्यापूपदानेन पृथ्वीदानफलं लभेत् ॥
त्रयस्त्रिंशदपूपान्नं कांस्यपात्रे निधाय च ।
सघृतं सहिरण्यं च ब्राह्मणाय निवेदयेत् ॥
विष्णुरूपी सहस्रांशुः सर्वपापप्रणाशनः ।
अपूपान्नप्रदानेन मम पापं व्यपोहतु ॥
नारायण जगद्बीज भास्करप्रतिरूपक ।
व्रतेनानेन पुत्रांश्च सम्पदं चाभिवर्द्धय ॥
यस्य हस्ते गदाचक्रे गरुडो यस्य वाहनं ।
शङ्खः करतले यस्य स मे विष्णुः प्रसीदतु ॥
कलाकाष्ठादिरूपेण निमेषघटिकादिना ॥
यो वञ्चयति भूतानि तस्मै कालात्मने नमः ।
कुरुक्षेत्रमयं देशः कालः पर्व द्विजो हरिः ॥
पृथ्वीसममिदं दानं गृहाण पुरुषोत्तम ।
मलानां च विशुद्ध्यर्थं पापप्रशमनाय च ॥
पुत्रपौत्राभिवृद्ध्यर्थं तव दास्यामि भास्कर ।
मन्त्रेणानेन यो दद्यात्त्रयस्त्रिंशदपूपकान् ॥
प्राप्नोति विपुलां लक्ष्मीं पुत्रपौत्रादिसंपदः ।

इति मलमासनिर्णयः ।

अथर्तुनिर्णयः ।

स च षड्विधो मासद्वयात्मकश्चान्द्रः सौरश्च । वसन्तो ग्रीष्मो वर्षाः

शरद्धेमन्तः शिशिर इति । 'षड्वा ऋतवः' इतिश्रुतेः । यत्तु श्रुतौ द्वादश मासाः पञ्चर्तव इत्युक्तं , तत्र पञ्चप्रयाजानुरोधेन हेमन्तशिशिरयोरेकीकरणं विवक्षितम् । ते च वसन्तोपक्रमाः । 'मुखं वा एतदृतूनां यद्वसन्त' इतिश्रुतेः । मासद्वयात्मकत्वं चाग्निचयनेष्टकोपधानब्राह्मणे । द्वन्द्वमुपदधाति तस्माद्द्वन्द्वमृतव इति वसन्ताद्यृतुक्रमेण चैत्रमासादिद्वन्द्वमिति । 'मधुश्च माधवश्च वासन्तिकावृतू' इति श्रुतेः । ननु कदाचिदधिमासे सति मासत्रयात्मकः कश्चिदृतुर्भवति तत्कथं मासद्वयात्मक इति चेन्न । अधिमासस्य षष्टिदिनात्मकमासावयवत्त्वस्य प्रतिपादितत्वात् । अयं चान्द्रः । सौरोऽप्युक्तो रत्नमालायाम्—

मृगादिराशिद्वयभानुभोगात्षडर्तवः स्युः शिशिरो वसन्तः ।
ग्रीष्मश्च वर्षाश्च शरच्च तद्वद्धेमन्तनामा कथितोऽत्र षष्ठः ॥ इति ।

इत्यृतुनिर्णयः ।

अथायनम् ।

यत्तु, 'ऋतुत्रयात्मकं सौरमेव' तदुक्तं दीपिकायाम् । 'सौरर्तुत्रितयं प्रदिष्टमयनं च' इति । 'ऋतुत्रयं चायनं स्यात्' इति मदनरत्ने विष्णुधर्मोक्तेश्च । तद्द्विविधम् । उत्तरं दक्षिणं च । शिशिराद्युत्तरम् । वर्षादि दक्षिणम् । तदुक्तं रत्नमालायाम्—

शिशिरपूर्वमृतुत्रयमुत्तरं ह्ययनमाहुरहश्च तदामरम् ।
भ्रमति दक्षिणमन्यदृतुत्रयं निगदिता रजनी मरुतां च सा ॥ इति ।

श्रुतिरपि 'तस्मादादित्यः षण्मासान् दक्षिणेनैति षडुत्तरेण' इति । अनयोरुपयोगमाह माधवीये कण्वः 'उदगयन आपूर्यमाणपक्षे पुण्याहे द्वादशाहमुपवसेद्व्रती भूत्वा' इत्यादि ।

सत्यव्रतोऽपि—

देवतारामवाप्यादिप्रतिष्ठोदङ्मुखे रवौ ।
दक्षिणाशामुखे कुर्वन्न तत्फलमवाप्नुयात् ॥ इति ।

वैखानससंहितायाम्—

मातृभैरववाराहनरसिंहत्रिविक्रमाः ।
महिषासुरहन्त्री च स्थाप्या वै दक्षिणायने ॥ इति ।

मदनरत्ने ज्योतिःशास्त्रे—

गृहप्रवेशत्रिदशप्रतिष्ठाविवाहचौलव्रतबन्धपूर्वम् ।
सौम्यायने कर्म शुभं प्रदिष्टं यद्गर्हितं तत्खलु दक्षिणे च ॥ इति ।

इत्ययननिर्णयः ।

अथ संवत्सरः ।

स च मासत्रैविध्यात्त्रिविध इति हेमाद्रिः । अत एव ब्रह्मसिद्धान्ते—

चान्द्रसावनसौराणां मासानां तु प्रभेदतः ।
चान्द्रसावनसौराः स्युस्त्रयः संवत्सरा इति ।

तत्र चान्द्रसंवत्सरश्चैत्रशुक्लप्रतिपदादिः फाल्गुनदर्शान्तः । सौरस्तु रवेर्द्वादशराशिभोगेन । सावनः षष्ट्युत्तरशतत्रयाहोरात्रात्मकः । आद्य उक्तो ब्रह्मपुराणे—

चैत्रे मासि जगद्ब्रह्मा ससर्ज प्रथमेऽहनि ।
शुक्लपक्षे समग्रं तु तदा सूर्योदये सति ॥ इति ।

आर्ष्टिषेणोऽपि—

स्मरेत्सर्वत्र कर्मादौ चान्द्रं संवत्सरं सदा ।
नान्यं यस्माद्वत्सरादौ प्रवृत्तिस्तस्य कीर्तिता ॥ इति ।

इमे चारम्भसमाप्ती कर्माङ्गस्मरण एवोपयुज्येते । वस्तुतस्तु । 'मासान्तरस्थतिथ्यन्तरमारभ्य वर्षान्तरस्थतत्पूर्वभावितिथ्यन्तोऽपि वत्सरश्चान्द्र एव । चन्द्रकलारूपतिथिघटितत्वात् । अन्यानपि भेदानाह नारदः—

प्रभवो विभवः शुक्लः प्रमोदोऽथ प्रजापतिः ।
अङ्गिराः श्रीमुखो भावो युवा धाता तथैव च ॥
ईश्वरो बहुधान्यश्च प्रमाथी विक्रमो वृषः ।
चित्रभानुः सुभानुश्च तारणः पार्थिवो व्ययः ॥
सर्वजित्सर्वधारी च विरोधी विकृतिः खरः ।
नन्दनो विजयश्चैव जयो मन्मथदुर्मुखौ ॥
हेमलम्बो विलम्बोऽथ विकारी शार्वरी प्लवः ।
शुभकृच्छोभनः क्रोधी विश्वावसुपराभवौ ॥
प्लवङ्गः कीलकः सौम्यः साधारणविरोधकृत् ।
परिधावी प्रमाथी च आनन्दो राक्षसो नलः ॥

पिङ्गलः कालयुक्तश्च सिद्धार्थी रौद्रदुर्मती ।
दुन्दुभी रुधिरोद्गारी रक्ताक्षी क्रोधनः क्षयः ॥

एताश्च संज्ञा यद्यपि ज्योतिःशास्त्रे बार्हस्पत्यस्यैवोक्तास्तथापि चान्द्राणां प्रभवादीनामिति चान्द्रस्यैव प्रभवादिनामभिर्व्यवहाराच्छिष्टाचाराच्च मासपक्षादिवत् प्रभवादिश्चान्द्रः संवत्सरोऽपि सङ्कल्पादौ सङ्कीर्त्यः । ज्योतिःशास्त्रे बार्हस्पत्यनाक्षत्रावपि वत्सरावुक्तौ । तत्र बृहस्पतेर्मध्यममानेन एकराशिभोगो बार्हस्पत्यः । सप्तविंशतिनक्षत्रपरिवृत्त्या एको मासः तैर्द्वादशभिर्नाक्षत्रो वत्सरः । अनयोस्तु धर्मशास्त्रे न कोऽप्युपयोगः ।

इति संवत्सरनिर्णयः ।

अथ जन्मतिथिकृत्यम् ।

तन्मलमासे न कर्तव्यं चान्द्रमासीयत्वेन सावकाशात् । ब्रह्मपुराणे—

सर्वैश्च जन्मदिवसे स्नातैर्मङ्गलपाणिभिः ।
गुरुदेवाग्निविप्राश्च पूजनीयाः प्रयत्नतः ॥
स्वनक्षत्रं च पितरस्तथा देवः प्रजापतिः ।
प्रतिसंवत्सरं चैव कर्तव्यश्च महोत्सवः ॥

स्नातैस्तिलस्नातैः । तथा च तिथिमधिकृत्य—

तिलस्नायी तिलोद्वर्ती तिलहोमी तिलप्रदः ।
तिलभुक् तिलवापी च षट्तिली नावसीदति ॥

मङ्गलपाणिभिः । अभिप्रेतार्थसिद्धिहेतुतया गोरोचनादिकं मङ्गलं तत्पाणिभिः । तथा च कृत्यचिन्तामणौ—

गुडदुग्धतिलानद्याज्जन्मग्रन्थेश्च बन्धनम् ।
गुग्गुलं निम्बसिद्धार्थौ पूर्वं गोरोचनायुतम् ॥
संपूज्य भानुविप्रेभ्यो महर्षिं प्रार्थयेदिदम् ।
चिरञ्जीवी यथा त्वं भो भविष्यामि महामुने ॥
रूपवान् वित्तवांश्चैव श्रिया युक्तश्च सर्वदा ।
मार्कण्डेय महाभाग सप्तकल्पान्तजीवन ॥
आयुरिष्टार्थसिध्यर्थमस्माकं वरदो भव ।

स्वनक्षत्रं जन्मकालीनम् । नामकरणे तथा दर्शनात् । तथा श्रीपतिरत्नमालायाम्—

नववस्त्रधरो भूत्वा पूजयेच्च चिरायुषम् ।
द्विभुजं जटिलं सौम्यं सुवृद्धं चिरजीविनम् ॥
मार्कण्डेयं नरो भक्त्या पूजयेत्प्रयतस्तथा ।
ततो दीर्घायुषं व्यासं रामं द्रौणिं कृपं बलिम् ॥
प्रह्लादं च हनूमन्तं बिभीषणमथार्चयेत् ।
षष्ठीं च दधिभक्तेन वर्षे वर्षे पुनः पुनः ॥

रामः परशुरामः । द्रौणिरश्वत्थामा । ततस्तिलहोमः पूजितदेवतानाम-मन्त्रैः स्वाहान्तैः कार्यः । देवीपुराणे—

होमो ग्रहादिपूजायां शतमष्टोत्तरं भवेत् ।
अष्टाविंशतिरष्टौ वा यथाशक्ति विधीयते ॥

ततो गुडदुग्धतिलपानम् । तत्र मन्त्रः—

सगुडं तिलसंमिश्रमञ्जल्यर्द्धमितं पयः ।
मार्कण्डेयवरं लब्ध्वा पिबाम्यायुषहेतवे ॥ इति ।

स्कान्दे—खण्डनं नखकेशानां मैथुनाध्वगमौ तथा ।
आमिषं कलहं हिंसां वर्षवृद्धौ विवर्जयेत् ॥

कलहमित्यत्र सङ्करमिति क्वचित्पाठः । वृद्धमनुः—

मृते जन्मनि सङ्क्रान्तौ श्राद्धे जन्मदिने तथा ।
अस्पृश्यस्पर्शने चैव न स्नायादुष्णवारिणा ॥

जन्मनि पुत्रजन्मनि । ज्योतिषे—

स्नात्वा जन्मदिने स्त्रियं परिहरन्प्राप्नोत्यभीष्टं फलं
मत्स्यान्मोचयतो द्विजाय ददतोऽप्यर्थश्चिरं वर्द्धते ।
सक्तून्खादति यश्च तस्य रिपवो नाशं प्रयान्ति ध्रुवं
भुङ्क्ते यस्तु निरामिषं स हि भवेज्जन्मान्तरे पण्डितः ॥

जन्मतिथेः खण्डत्वे तु देवीपुराणे—

घस्रद्वये जन्मतिथिर्यदा स्यात्पूज्या तदा जन्मभसंयुता च ।
असंस्कृता मेन दिनद्वयेऽपि पूज्या परा या भवतीह तन्त्रम् ॥

उभयदिने जन्मनक्षत्रलाभे तु पूर्वाह्णव्यापिनी ग्राह्या । तस्य कर्म-कालत्वात् ।

अथ केचिन्निषेधाः ।

केषुचित्पदार्थेषु वर्ज्यतिथयः ।

सिंहादित्ये शुक्लपक्षे चतुर्थ्यां चन्द्रदर्शनम् ।
मिथ्याभिदूषितं कुर्यात्तस्मात्पश्येन्न तं सदा ॥
सप्तम्यां न स्पृशेत्तैलं नीलवस्त्रं न धारयेत् ।
न चाप्यामलकैः स्नायान्न कुर्यात्कलहं नरः ॥
निम्बस्य भक्षणं तैलं तिलैस्तर्पणमञ्जनम् ।
सप्तम्यां नैव कुर्वीत ताम्रपात्रे च भोजनम् ॥

स्कान्दे— शिरःकपालमन्त्राणि नखचर्मतिलास्तथा ।
एतानि क्रमशो नित्यमष्टम्यादिषु वर्जयेत् ॥

शिरः नालिकेरम् । कपालमलाबु । अन्त्राणि पटोलम् । नखं निष्पावाः । चर्म मसूरिकाः । तिला वृन्ताकमिति हेमाद्रौ । चतुर्विंशतिमते तु 'यदीच्छेदूर्ध्वगमनमष्टम्यादिषु वर्जयेत्' इति उत्तरार्द्धं पठितम् । व्यासः—

षष्ठ्यष्टमी अमावास्या पक्षद्वयचतुर्दशी ।
अत्र संनिहितं पापं तैले मांसे क्षुरे भगे ॥

गार्ग्यः— त्रयोदश्यां तृतीयायां प्रतिपद्दशमीद्वये ।
तैलाभ्यङ्गं न स्पृशेद्वा द्वादशीं नवमीं तथा ॥
मोहात्प्रतिपदं षष्ठीं कुहूं रिक्तां तिथिं तथा ।
तैलेनाभ्यञ्जयेद्यस्तु चतुर्भिः परिहीयते ॥

व्यासः— आदित्यादिषु वारेषु तापः कीर्तिर्मतिर्धनम् ।
दारिद्र्यं दुर्भगत्वं च कामाप्तिः स्नानतः क्रमात् ॥

अत्र प्रतिप्रसवमाह प्रचेताः—

सार्षपं गन्धतैलं च यत्तैलं पुष्पवासितम् ।
अन्यद्रव्ययुतं तैलं न दुष्यति कदाचन ॥

निषिद्धतिथिष्वपि शुभवारयोगे तैलस्नानं कार्यम् । तिथ्यपेक्षया वारस्य प्रबलत्वात् । तदुक्तं ब्रह्मसिद्धान्ते—

तिथिरेकगुणा प्रोक्ता नक्षत्रं च चतुर्गुणम् ।
करणं षड्गुणं चैव वारस्त्वष्टगुणः स्मृतः ॥

वामनपुराणे—

नन्दासु नाभ्यङ्गमुपाचरेत
क्षौरं च रिक्तासु जयासु मांसम् ।
पूर्णासु योषित्परिवर्जनीया
भद्रासु सर्वाणि समारभेत ॥ इति ।

अत्र नन्दानिषेधादेव षष्ठीनिषेधे सिद्धे पुनस्तद्ग्रहणं दोषाधिक्यार्थमिति द्वैतनिर्णये तातचरणाः । व्यासः—

सङ्क्रान्त्यां पञ्चदश्यां च द्वादश्यां श्राद्धवासरे ।
वस्त्रं निष्पीड्यते नैव क्षुरेणापि न हिंस्यते ॥

वस्त्रनिष्पीडनं यत्तर्पणान्ते तस्य निषेधः । स एव—

तैलं च न स्पृशेदामं वृक्षान्वै छेदयेन्न च ।
पक्षादौ च रवौ षष्ठ्यां रिक्तायां च हरेस्तिथौ ॥

आमं नीलतृणम् । वामनपुराणे—

नाभ्यङ्गमर्के न च भूमिपुत्रे
क्षौरं च शुक्रे च कुजे च मांसम् ।
बुधे च योषां न समाचरेत
शेषेषु सर्वाणि सदैव कुर्यात् ॥
चित्रासु हस्ते श्रवणे च तैलं
क्षौरं विशाखाप्रतिपत्सु वर्ज्यम् ।
मूले मृगे भाद्रपदेषु मांसं
योषिन्मृगाकृत्तिकसोत्तरेषु ॥ इति ।

हारीतः—तैलं मांसं भगं क्षौरं पर्वकालेषु वर्जयेत् ॥

तथा— अश्वत्थसागरौ सेव्यौ न स्प्रष्टव्यौ कदाचन ।
अश्वत्थं मन्दवारे तु समुद्रं पर्वणि स्पृशेत् ॥

वाराहे— चतुर्दश्यां तथाऽष्टम्यां पञ्चदश्यां च पर्वसु ।
तैलाभ्यङ्गं तथा भोगं योषितश्च विवर्जयेत् ॥
न मृच्च गोमयं चापि न निशायां तु गोमयम् ।
गोमूत्रं च प्रदोषे च गृह्णीयाद्बुद्धिमान्नरः ॥

सन्ध्यावर्ज्यान्याह मनुः—

चत्वारीमानि कर्माणि सन्ध्यायां परिवर्जयेत् ।

आहारं मैथुनं निद्रां स्वाध्यायं च चतुर्थकम् ॥
आहाराज्जायते व्याधिर्गर्भद्रावश्च मैथुनात् ।
निद्रातो जायतेऽलक्ष्मीः स्वाध्यायादायुषः क्षयः ॥

इति कालविशेषे वर्ज्यानि ।

अथ क्षौरे निषिद्धकालः ।

पञ्चदश्यां चतुर्दश्यामष्टम्यां च विशारदः ।
तैलं मांसं व्यवायं च क्षुरं च परिवर्जयेत् ॥ इति ।

यमः— तथा सितास्वष्टमीषु भूताहेन्दुक्षये तथा ।
तैलाभ्यङ्गं क्षौरकर्म स्त्रीसङ्गं चैव वर्जयेत् ॥

व्यासः—क्षौरे शनैश्चरादित्यभौमाहोरात्रमेव च ।
तथा प्रतिपदं रिक्तां तिथिं च परिवर्जयेत् ॥

अहोरात्रग्रहणम् 'न वारदोषाः प्रभवन्ति रात्रौ' इति वचनबाधार्थम् । हेमाद्रौ ज्योतिःशास्त्रे—

नाभ्यक्तभुक्तरणकालनिरासनानां
न स्नातसुप्तगमनांशुकभूषितानाम् ।
सन्ध्यानिशार्ककुजसौरिदिनेश्वराणां
क्षौरं हितं भवति चाह्नि न चापि षष्ठ्याम् ॥

अह्नीत्यहोरात्रोपलक्षणम् । मार्कण्डेयः—

अष्टमी च तथा षष्ठी नवमी च चतुर्दशी ।
क्षुरकर्मणि वर्ज्या च पर्वसन्धिस्तथैव च ॥

वृद्धगार्ग्यः—

मीने धनुषि सिंहे च स्थिते सप्ततुरङ्गमे ।
क्षौरमत्र न कर्तव्यं विवाहं गृहकर्म च ॥ इति ।

श्मश्रुकर्मणि मरीचिः—

निरासनस्य सुप्तस्य तिष्ठतश्च तथैव च ।
सायं भुक्तवतश्चैव स्नातस्य रुषितस्य च ॥
यात्रायुद्धोद्यतस्यापि श्मश्रुकर्म विवर्जयेत् ।

अथ मांसे निषिद्धकालः ।

हेमाद्रौ नन्दीपुराणे—

यदि नाम चतुर्दश्यां सदा मांसं विवर्जयेत् ।
वर्जयेदयने मुख्ये कृतस्वर्गमतिर्नरः ॥
चतुर्थी चाष्टमी चैव द्वादशी च चतुर्दशी ।
तथा पञ्चदशी वार्या षडशीतिमुखानि च ॥
सङ्क्रमे चापि सूर्यस्य विषुवे चापि वार्षिके ।
मांसात्तु विरतो मर्त्यो याति स्वर्गं दिनत्रयम् ॥ इति ।

सङ्क्रमादयनविषुवतोर्ग्रहणं दोषातिशयार्थम् । वार्षिके वर्षाकालसंबन्धिमासचतुष्टये । दिनत्रयमपि वार्षिके विरत इति संबन्धः ।

अथवाऽऽश्वयुजं मासं वर्जयेन्मांसभक्षणे ।
बहुमासकृतं पुण्यं लभेताश्वयुजान्नरः ॥

अन्यत्र मासत्रयपर्यन्तं मांसत्यागे यत्फलं तत्प्राप्नोतीत्यर्थः ।

यो नरः कार्तिके मासि मांसं तु परिवर्जयेत् ।
संवत्सरस्य लभते पुण्यं मांसविवर्जनात् ॥

अथ कलिवर्ज्यानि ।

आदित्यपुराणे—यस्तु कार्त्तयुगो धर्मो न कर्तव्यः कलौ युगे ।
पापप्रयुक्ताश्च सदा कलौ नार्यो नराः सदा ॥ इति ।

कार्तयुगः कृतयुगसंबन्धी । हेमाद्रौ माधवीये च—

विधवायां प्रजोत्पत्तौ देवरस्य नियोजनम् ।
बालिकाक्षतयोन्याश्च वरेणान्येन संस्कृतिः ॥

विधवायां वाग्दानानन्तरं देवरस्य नियोजनम् ।

यस्या म्रियेत कन्याया वाचा सत्ये कृते पतिः ॥
तामनेन विधानेन निजो विन्देत देवरः ।
अपुत्रां गुर्वनुज्ञातो देवरः पुत्रकाम्यया ॥
सपिण्डो वा सगोत्रो वा घृताभ्यक्त ऋतावियात् ।

इति मनुयाज्ञवल्क्याभ्यामुक्तं निषिद्ध्यते । न तु विवाहानंतरं विधवायां 'नान्यस्मिन् विधवा नारी नियोक्तव्या द्विजातिभिः' इति मनुना तन्निषेधात् । वरेणान्येन संस्कृतिरिति न देवरनियोजनपरम्

पूर्वेण पौनरुक्त्यात् । बालिका सङ्कल्पदत्ता न वाग्दत्ता । तदानीं क्षत-योनित्वशङ्काया अभावात् । इदं च विज्ञानेश्वरेण, 'दत्तामपि हरेत्पूर्वा-च्छ्रेयांश्चेद्वर आव्रजेत्' इत्यनेन सप्तपद्युपक्रमणात्प्राग्यदन्यस्मै दानमुक्तं तद्विषयमिति ध्येयम् ।

तथा— कन्यानामसवर्णानां विवाहश्च द्विजातिषु ॥ इति ।
तिस्रो वर्णानुपूर्व्येण द्वे तथैका यथाक्रमम् ।
ब्राह्मणक्षत्रियविशां भार्या स्वा शूद्रजन्मनः ॥

इति विहितः । तथा—

आततायिद्विजाग्र्याणां धर्मयुद्धेन हिंसनम् ॥ इति ।

द्विजाग्र्याणां विप्राणाम् । आततायिनमायान्तं हन्यादेवाविचार-यन्निति विहितं संमुखं कूटशस्त्रेण मारणम् । एतेन 'नाततायिवधे दोषोऽन्यत्रगोब्राह्मणेभ्यः' इति सुमंतुवाक्यं कलिविषयमेवेति सिद्धम् ।

तथा— द्विजस्याब्धौ तु नौयातुः शोधितस्यापि संग्रहः ।
सत्रदीक्षा च सर्वेषां कमण्डलुविधारणम् ॥

इति सत्रदीक्षानिषेधमुखेन सत्राधिकार एव विप्राणां पर्युदस्यते । 'अथ कमण्डलुचर्यामुपदिशन्ति' इत्यादिबौधायने सेतिकर्तव्यताकं सोदकं च कमण्डलुमिति स्नातकस्य विहितं मृन्मयस्य काष्ठमयस्य वा कमण्डलो-र्धारणम् । अन्ये तु कमण्डलुधारणमित्यनेन वानप्रस्थाश्रम एव लक्ष्यत इत्याहुः । तन्न, बृहन्नारदीये उभयोरपि भिन्नत्वेनोपादानात् ।

तथा— महाप्रस्थानगमनं गोसंज्ञप्तिश्च गोसवे ॥ इति ।

महाप्रस्थानगमनमुत्तरदिशागमनम् । गोसवो यज्ञविशेषः ।

तथा— सौत्रामण्यामपि सुराग्रहणस्य च संग्रहः ॥ इति ।
अग्निहोत्रहवण्याश्च लेहो लीढापरिग्रहः ।

लेहो जिह्वयास्वादनं कथंचित् लीढायाः परिग्रहः । पुनर्होमसाधनत्वम् ।

तथा— वानप्रस्थाश्रमस्यापि प्रवेशो विधिबोधितः ।
वृत्तस्वाध्यायसापेक्षमघसङ्कोचनं तथा ॥ इति ।

वृत्तमग्निहोत्रपरिचर्यादि ।

वेदाग्नियुक्तविप्रस्य त्र्यहमाशौचमिष्यते ।

इति देवलवचनविहितम् ।

तथा— प्रायश्चित्तविधानं च विप्राणां मरणान्तिकम् ॥ इति ।

कामकृते पापादौ—

न तस्य निष्कृतिर्दृष्टा भृग्वग्निपतनादृते ॥

इति विहितस्य विधानमुपदेशः । एवं च 'मतिपूर्वमनिर्देश्यं प्राणान्तिकमितिस्थितिः' इति मनुवाक्यमेतद्युगविषयमेव । एकमूलकल्पनालाघवात् ।

संसर्गदोषः स्तेयान्यमहापातकनिष्कृतिः । इति ।

त्यजेद्देशं कृतयुगे त्रेतायां ग्राममुत्सृजेत् ।

द्वापरे कुलमेकं तु कर्तारं तु कलौ युगे ॥

इति पाराशरवचनेन संलापादिनवविधसंसर्गाभावेऽपि विहितस्य देशादित्यागस्य निषेधः । यद्वा—

कृते संभाष्य पतति त्रेतायां स्पर्शनेन तु ।

द्वापरे त्वन्नमादाय कलौ कर्तैव लिप्यते ॥

इत्यनेन संभाषणस्पर्शनादिजन्यपातित्यस्यैव निषेधः, न तु पतितेन सह संवत्सरं नवविधसंस्पर्शे प्राप्तस्य पातित्यस्य; पूर्वोक्तवचनद्वयबाधमात्रेण चरितार्थस्य नवविधसंसर्गनिषेधप्रतिपादकानेकवाक्यबाधस्यान्याय्यत्वात् । 'कलौ पतति कर्मणा' इति वाक्यस्वारस्येन पतितसंसर्गरूपकर्मजन्यस्य पातित्यस्य दुर्निवारत्वाच्च । अतश्चेदानीन्तनानां संसर्गप्रायश्चित्तानुष्ठानाचारः स्वाचार एव । स्तेयान्यमहापातकेषु निष्कृतिः रहस्यप्रायश्चित्तं निषिध्यते । अत्र केचित् स्तेयान्यमहापातके प्रायश्चित्तमेव कलौ न भवतीत्याहुः । तन्न, पराशरस्मृतौ महापातकिनामपि प्रत्येकं प्रायश्चित्तविधानात् ।

कृते तु मानवा धर्मास्त्रेतायां गौतमाः स्मृताः ।

द्वापरे शङ्खलिखिताः कलौ पाराशराः स्मृताः ॥

इत्यनेनान्यस्मृतिविरोधे विकल्पप्रसक्तौ स्मृत्यन्तरीयविशेषशास्त्रेण च बाधप्रसक्तौ पराशरस्मृतेः कलौ बलीयस्त्वनियमेन स्तेयान्येत्यस्या बाधात् । न च बाधे विषयान्तरासम्भवादप्रामाण्यापत्तिः । 'औदुम्बरीं स्पृष्ट्वोद्गायेद्' इति श्रुत्या बाधिताया 'औदुंबरी सर्वा वेष्टयितव्या' इति स्मृतेर्द्वित्राण्यङ्गुलानि मुक्त्वा सर्वा वेष्टयितव्येतिन्यायसुधाकारोक्ततात्पर्यकल्पनवदिहापि स्तेयान्यमहापातकनिष्कृतिर्नोपदेश्या कृतायामपि निष्कृतौ संसर्गो न कर्तव्यः इति तात्पर्यकल्पनात् । वस्तुवस्तु मनुवाक्येनोपदेशनिषेधस्य सिद्धत्वात्, ब्राह्मणभोजनविधिविरो-

धाच्च रहस्यप्रायश्चित्तं निष्कृतिर्न भवतीति कल्प्यम् । अत एव तत्र तत्र रहस्यप्रायश्चित्तं निन्दितं 'तस्मात्प्रकाशयेत्पापम्' इत्यादि चोक्तम्। न चैवं स्तेयपर्युदासोऽसङ्गतः । तस्य कलावनायासेन स्तेयनिष्पत्त्यां प्रतिनिमित्तमुपदेशासम्भवेन रहस्यप्रायश्चित्ताभ्यनुज्ञानार्थत्वात् ।

तथा—वरातिथिपितृभ्यश्च पशूपाकरणक्रिया ॥ इति ।

वरस्य प्राजापत्योऽतिथेराग्नावैष्णव इति यागविधिः । 'वाध्रीणसस्य मांसेन तृप्तिर्द्वादशवार्षिकी' इत्यादिवचनकदम्बकेन त्रिष्वपि प्राप्तिः । अत्र श्राद्धे पशुयागाभावेन तद्धर्मानतिदेशादुपाकरणाप्राप्तेः पशूपाकरणलक्षितं तत्प्रकृतिकं पितृभ्यो मांसदानं निषिद्ध्यते । तथाच 'श्राद्धेमांसम्' इत्यनेनैकमूलत्वान्न कल्पनागौरवम् ।

तथा— दत्तौरसेतरेषां तु पुत्रत्वेन परिग्रहः ।
सवर्णान्याङ्गनादुष्टैः संसर्गः शोधितैरपि ॥

सवर्णान्या असवर्णा या अङ्गनास्ताभिर्दुष्टैस्तत्संस्पृष्टैः कृतप्रायश्चित्तैरपि संसर्गः । इदं चोत्तमवर्णविषयमेवेति युक्तमुत्पश्यामः ।

तथा—अयोनौ संग्रहे वृत्ते परित्यागो गुरुस्त्रियाः ॥ इति ।

चतस्रस्तु परित्याज्याः शिष्यगा गुरुगा च या ।
पतिघ्नी च विशेषेण जुङ्गितोपगता च या ॥

इत्यादिना विहितः । अनेन युगान्तरे अयोनौ संसर्गे परित्यागः इति गम्यते ।

तथा— परोद्देश्यात्मसंत्याग उच्छिष्टस्यापवर्जनम् ।
'गवार्थे ब्राह्मणार्थे वा सद्यःप्राणान्परित्यजेत्'

ति विहितः । 'स्वमुच्छिष्टमुच्छिष्टोपहतं च' इति वसिष्ठाद्युक्तं तन्निमित्तं प्रायश्चित्तं वेति केचित् ।

विश्राणनं वितरणं स्पर्शनं प्रतिपादनम् ।
प्रादेशनं निर्वपणमपवर्जनमंहतिः ॥

इति त्रिकाण्डीस्मरणात् अपवर्जनं दानम् । 'ब्राह्मणायोदद्युच्छिष्टं प्रयच्छेत्' इत्यादिना मधुपर्कादिविहितमिति भ्रातृचरणाः ।

प्रतिमाभ्यर्चनार्थाय सङ्कल्पश्च सधर्मकः ।

'इयमेव प्रतिमा यावज्जीवं मया पूजनीया' इत्येवमादिः ।

अस्थिसंचयनादूर्ध्वमङ्गस्पर्शनमेव च ।
शामित्रं चैव विप्राणां सोमविक्रयणं तथा ॥

शामित्रं यज्ञे स्वयमेव पशुमारणम् ।

षड्भक्तानशनेनान्नहरणं हीनकर्मणः ।

षड्भक्तानशनमुपवासत्रयम् । 'बुभुक्षितस्त्र्यहं स्थित्वा धान्यमब्राह्मणाद्धरेत्' इति विहितम् ।

शूद्रेषु दासगोपालकुलमित्रार्द्धसीरिणाम् ।
भोज्यान्नता गृहस्थस्य तीर्थयात्राऽतिदूरतः ॥

गृहस्थस्य आहिताग्नेरिति केचित् ।

तथा— शिष्यस्य गुरुदारेषु गुरुवद्वृत्तिरीरिता ।

'गुरुवत्प्रतिपूज्यास्तु सवर्णा गुरुयोषितः'

इति मनूक्ता ।

तथा—आपद्वृत्तिर्द्विजाग्र्याणामश्वस्तनिकता तथा । इति ।

'क्षात्रेण कर्मणा जीवेद्विशां वाप्यापदि द्विजः ॥'

'त्र्याहिकोऽश्वस्तनोऽपि वा' इत्युक्ता ।

तथा— प्रजार्थं तु द्विजाग्र्याणां जातारणिपरिग्रहः ।
ब्राह्मणानां प्रवासित्वं मुखाग्निधमनक्रिया ॥

प्रवासशीलत्वं 'वृथा तु न चिरं वसेत्' इति स्मरणादिति केचित् ।

तथा— बलात्कारादिदुष्टस्त्रीसङ्ग्रहो विधिनोदितः ।
यतेस्तु सर्ववर्णेषु भिक्षाचर्या विधानतः ॥
नवोदके दशाहं च दक्षिणा विधिचोदिता ॥ इति ।

'दशरात्रेण शुद्ध्यन्ति भूमिष्ठं च नवोदकम्' इति विहितं 'गुरवे तु वरं दत्वा स्नायीत तदनुज्ञया' इति विहितं दक्षिणादानम् ।

तथा— ब्राह्मणादिषु शूद्रस्य पचनादिक्रियापि च ।

'आर्याधिष्ठिता वा शूद्राः संस्कर्त्तारः स्युः' इत्यापस्तम्बविहिता ।

तथा— भृग्वग्निपतनैश्चैव वृद्धादिमरणं तथा ॥ इति ।

अत्र मूलम्—

वृद्धः शौचस्मृतेर्लुप्तः प्रत्याख्यातभिषक्क्रियः ।

इत्यादि विज्ञानेश्वरग्रन्थाद्द्रष्टव्यम् ।

गोतृप्तिशिष्टे पयसि शिष्टैराचमनक्रिया ।
पितापुत्रविरोधे च साक्षिणां दण्डकल्पनम् ॥

साक्षिणां समाधातॄणां च ।

पितापुत्रविरोधे तु साक्षिणां त्रिगुणो दमः ।
अन्तरे च तयोर्यः स्यात्तस्याप्यष्टगुणो दमः ॥

इति विहितम् ।

यत्रसायंगृहत्वं च मुनिभिस्तत्वदर्शिभिः ।

यत्र सायंकालो जातस्तत्रैव संन्यासिनामवस्थानम् ।

एतानि लोकगुप्त्यर्थं कलेरादौ महात्मभिः ।
निवर्तितानि कर्माणि व्यवस्थापूर्वकं बुधैः ॥
समयश्चापि साधूनां प्रमाणं वेदवद्भवेत् ।

ब्रह्मपुराणे—

दीर्घकालं ब्रह्मचर्यं धारणं च कमण्डलोः ।
गोत्रान्मातृसपिण्डाच्च विवाहो गोवधस्तथा ॥
नराश्वमेधौ मद्यं च कलौ वर्ज्यं द्विजातिभिः ।

दीर्घकालमिति कालपदोपादानबलात् 'अष्टाचत्वारिंशद्वर्षाणि वेदब्रह्मचर्यम्' इति श्रुत्युक्तम् । अन्यथा दीर्घं ब्रह्मचर्यमित्येवाचक्षीत । एतेन 'ब्रह्मव्रतं नैष्ठिकम्' इति रामचन्द्राचार्योक्तिः परास्ता । अत एव द्राविडानां नैष्ठिकब्रह्मचर्याचारः सङ्गच्छते । कमण्डलुधारणं व्याख्यातम् । गोत्रादित्यनेन स्वगोत्रोत्पन्नायाः पितृष्वसुर्मातृसपिण्डादित्यनेन मातुलगोत्रसापिण्ड्ययोः सामान्यनिषेधेनैव प्राप्त्यभावान्मातुलकन्यापरिणयनं निषिद्ध्यते । तेन मातुलकन्यापरिणयननिषेधकानि वाक्यानि कलिविषयाण्येव । अत एवाधुनिकानां तदाचारोऽप्यनाचार एव । कृष्णार्जुनादीनां तु युगान्तरीयत्वात्सदाचार एव । अत एव व्यासेन कलिनिन्दाप्रक्रमे—

तृतीयां मातृतः कन्यां तृतीयां पितृतस्तथा ।
शुल्केन चोद्वहिष्यन्ति विप्राः पापविमोहिताः ॥

इत्युक्तम् । बौधायनेन च 'मातुलपितृष्वसृदुहितृगमनम्' इति दाक्षिणानाचारेषु गणितम् । गोवधो मधुपर्कादौ । नरमेधः 'ब्रह्मणे ब्राह्मणमालभेत' इत्यादि । मद्यं गौडीमाध्वीरूपं क्षत्रियवैश्ययोर्निषिध्यते । तस्माद् 'ब्राह्मणराजन्यौ वैश्यश्च न सुरां पिबेत्' इत्यत्रैव सुराया द्विजात्यवच्छेदेन निषेधस्य सिद्धत्वात् । यद्वा वामागमादौ त्रैव-

र्णिकादिपुरस्कारेण विनायकशान्त्यादौ क्षत्रियादिपुरस्कारेणोक्तं च निषिध्यते । क्रतुः—

देवराच्च सुतोत्पत्तिर्दत्ता कन्या न दीयते ।
न यज्ञे गोवधः कार्यः कलौ न च कमण्डलुः ॥

'विधवायां प्रजोत्पत्तौ' इत्यनेन समानार्थकं पूर्वार्द्धम् । आदित्यपुराणे—

ऊढायाः पुनरुद्वाहं ज्येष्ठांशं गोवधस्तथा ।
कलौ पञ्च न कुर्वीत भ्रातृजायां कमण्डलुम् ॥

ज्येष्ठांशं विषमभागम् । भ्रातृजायां जायामिति शेषः । दानहेमाद्रौ गारुडपुराणे—

न कलौ क्रियते ह्यश्वमेधो वाप्यथ गोसवः ।
नरमेधोऽक्षता नारी देवरात्पुत्रसन्ततिः ॥
गर्हितं सप्तकं ह्येतद्राजसूयकमण्डलू ।

श्राद्धदीपिकायां मदनपारिजाते च निगमः—

अक्षता गोपशुश्चैव श्राद्धे मांसं तथा मधु ।
देवराच्च सुतोत्पत्तिः कलौ पञ्च विवर्जयेत् ॥

यथा वेदिबर्हिधर्माणां(?)प्रधानसम्बन्धिमात्रांशे विधिर्न तु तादर्थ्यांशे प्रमाणाभावात्तद्वत् 'श्राद्धे मांसम्' इत्यत्र श्राद्धसम्बन्धिक्रत्वर्थं पुरुषार्थं च निषिद्धयते । अविशेषात् । पञ्चेत्यत्र न परिसङ्ख्या, दोषत्रयापत्तेः पूर्वोक्तानेकवाक्यानर्थक्यापत्तेश्च । अतः प्रदर्शनार्थमेतद्वचनोपात्तत्वोपाधिना पञ्चत्वोपपत्तिः । आदित्यपुराणे—

शपथाः शकुनाः प्रश्नाः सामुद्रिकमुपश्रुतिः ।
उपयाचितमेतानि संभवन्ति कलौ क्वचित् ॥
तस्मात्तन्मात्रलाभेन कलौ कार्यं न कारयेत् ।

विश्वेश्वरपद्धतौ व्यासः—

चत्वार्यब्दसहस्राणि चत्वार्यब्दशतानि च ।
कलेर्यदा गमिष्यन्ति तदा त्रेतापरिग्रहः ॥
संन्यासश्च न कर्तव्यो ब्राह्मणेन विजानता ॥ इति ।

अत्र त्रेतापरिग्रह इति वदता सर्वाधानमेव निषिद्धयते । अत एव

१ तथा वेदबर्हिर्धर्माणां, यथार्कौवेदबर्हिर्धर्माणां इति च पाठः ।

लौगाक्षिः—

अर्द्धाधानं स्मृतं श्रौतस्मार्ताग्न्योस्तु पृथक्कृतिः ।
सर्वाधानं तयोरैक्यकृतिः पूर्वयुगाश्रिता ॥ इति ।

युगस्य पूर्वं पूर्वयुगं कलेः पूर्वभाग इत्यर्थः । अर्द्धाधानमपि यावद्वर्णवेदविभागं कार्यम् । तदाह देवलः—

यावद्वर्णविभागोऽस्ति यावद्वेदः प्रवर्तते ।
संन्यासं चाग्निहोत्रं च तावत्कुर्यात्कलौ युगे ॥ इति ।

यद्यपि संन्यासस्य चतुश्चत्वारिंशच्छताब्दावधिकत्वं व्यासेनोक्तं तथापि गौणकालोऽनेन समर्थ्यत इति केचित् । त्रिदण्डैकदण्डाभिप्रायेण व्यवस्थेत्यपरे । सामान्यतो निषिद्धस्य व्यासवाक्येनोपसंहार इत्यन्ये । वस्तुतस्तु 'चत्वार्यपि' इत्यादीनि वचनानि महानिबन्धेषु न दृश्यन्ते ।

इति कलिवर्ज्यनिर्णयः ।

इति श्रीमीमांसकशङ्करभट्टात्मजनीलकण्ठकृते भगवद्भास्करे
समयमयूखः समाप्तः ।